No. ४५७६

Title दाहादिकर्म कर्तृ निर्णयः

Author सम्राट्स्थपति महायाज्ञिकदेवः

Extent १२५ पत्राणि Age सं. १९१९

Subject धर्मशास्त्रम्

दाहादिकर्मकर्तृनिर्णयः

४५७६

॥ श्रीः॥२२

७पत्रगमांछे

पत्रा १००
पत्र २५
२३५०
५२५
२८३५
बाकी २५१
२२८६

१७

जोविंदजी

देव ऋ०
१

॥ श्रीगणेशायनमः॥ ॐ नमोवासुदेवाय॰ दुश्चिकित्स्यैर्महारोगैः पीडितस्तु पुमानपि॥ ज्ञात्वारिष्टादिभि
र्मृत्युंस्वर्लोकहितमाचरेत्॥॥१ सितासितेसरितेयत्रसंगतेतत्राप्लुतासोदिवमुत्पतंति॥येवैतत्वंविसृजंति
धीरास्तेवैजनासोअमृतंभजंते २ सर्वोपायविरक्तस्यदुःसाध्यकृतकर्मणः॥ व्याधितस्यस्वतंतीर्थेमरणं
तपसोधिकं ३ असाध्यव्याधिनायुक्तः स्वव्यापाराक्षमःपुमान्॥ प्रविशत्यनलंदीप्तंकरोत्यनशनंतु
वा ४ अगाधंतोयराशिंवाभृगोः पतनमेववा॥ गच्छेन्महापथंवापितुषारगिरिमादरात् ५ प्रयागवट
शाखायादेहत्यागंकरोतिवा॥ स्वयंदेहविनाशस्यकालेप्राप्तेमहामतेः ६ उत्तमान्प्राप्नुयाल्लोकान्नात्मघा
तीभवेत्क्वचित्॥ महापापक्षयात्स्वर्गेदिव्यान्भोगानवाप्नुते ७ एतेषामधिकारोस्तिसर्वेषांसर्वजंतुषु॥
नराणामथनारीणांसर्ववर्णेषुसर्वदा ८ अचिकित्स्यामयग्रस्तोदेशांतरंचदूरंगतः। तपोविशेषैर्विवि
धैः साधयेद्देहमात्मनः ९ अनुष्ठानासमर्थस्यवानप्रस्थस्यजीर्यतः। जलानाशनभृग्वग्निमहाप्र
स्थानमिष्यते १० समाः सहस्राणितस्यवैजलेदेहंशोकमग्नोपतनेचषोडश॥ महापथेषष्टिरग्नौ

राम०
१

तिराहवे भवेन्नाशादिहचाक्षयागतिः॥ आसन्नमृत्युना देया गौरेका विभवान्विता॥ तदलाभे तु गौरेव नरकोद्धरणा
यवै॥ तदायदिनशक्नोति दातुं वैतरणीं तु गां॥ श॥ क्तोन्यो रुक्कदाहृद्याछूपोद्यान्नतस्य च॥ येपिसंकीर्णकर्मणो
राजानो रौद्रकर्मणः॥ तेभ्यः पवित्रमाख्येयं भूमिदानसमुत्तमं॥ दद्यादासन्नमृत्युर्यः सोपस्कारां सदक्षिणां॥
गंगादितीर्थमाश्रित्य कृष्णां वैतरणीं तु गां॥ कृताशेषाघनिष्कृत्यै दानान्यन्यानि शक्तितः॥ यमद्वारे महाघोरे कृष्णा
वैतरणी नदी॥ तर्तुकामः प्रयच्छामि कृष्णां वैतरणीं तु गां॥ पठित्वैवं प्रदातव्या स्तुवर्णेन समन्विता॥ अशक्तो व
स्त्रयुग्मेन सप्तधान्येन वा सह॥ आसन्नमात्मनः कालं ज्ञात्वा प्राज्ञैः समाहितैः॥ समभ्यर्च्य हृषीकेशं पुष्पधूपा
दिभिस्ततः॥ प्रणिपातैः स्तवैः पुण्यैर्ध्यानयोगेन सज्जयेत्॥ दत्वा दानं च विप्रेभ्यो दीनानाथेभ्य एव च॥ बंधौक
लत्रे मित्रे च क्षेत्रे धान्यधनादिषु॥ मित्रवर्गे च सर्वत्र ममत्वं विनिवर्तयेत्॥ त्यजन्नेतान् स्थोपि प्राणान्यः संस्म
रेद्धरिं॥ स याति विष्णुसायुज्यं यावदिंद्राश्चतुर्दश॥ ॐ नमो वासुदेवायेत्येतच्च सततं जपेत्॥ यत्नाद्धीरपि तं नाम
समर्थस्तदुदीरयेत्॥ ध्यायेत्तु देवदेवस्य रूपं विष्णोर्मनोरमं॥ अत्यंतं वयसा हृष्टो व्याधिना चोपपीडितः॥ यदि स्या

तुंनशक्नोतिशयीतोदक्कुशिराः क्षितौ। दक्षिणाग्रेषुदर्भेषु शयीत प्राक्कुशिरा अपि। विष्णोर्नामानि संश्राव्य जपे
द्यारण्यकं स्तुतः। पंचं भावमुपाश्रित्य त्यजन्नंते कलेवरं॥ जंतुस्तन्मयतां याति विश्वरूपो मणिर्यथा॥ वाराहपुराणे
।कंठस्थानगतो जीवो भीतो विभ्रांतमानसः। ज्ञात्वा तु विह्वलं शीघ्रं ततो निःसार्यते गृहात्॥ कुशास्तरणशायी स
दिशः सर्वास्तु पश्यति॥ दापयेत्स्नेहभावेन भूमिसाक्षाद्द्विजातिषु॥ सुवर्णं वा हिरण्यं वा यथोत्पन्नं तु माधवि॥ तत्र
लोकहितार्थाय गोप्रदानं विशिष्यते॥ तथैव दीपदानं च शीघ्रं मुच्येत किल्बिषात्॥ पश्चात्तस्यातिपथ्यं दिव्यमुच्चैः
कर्णे च श्रावयेत्॥ दृष्ट्वा तु विह्वलं प्रेतं यममार्गानुसारिणं॥ प्रयाणकाले तत्ततो मंत्रेण विधिपूर्वकं॥ मद्भक्तेनै
व दातव्यं सर्वसंसारमोक्षणं॥ मधुपर्कं ततो ग्राह्य इमं मंत्रमुदाहरेत्॥ संगच्छ मागच्छ ममैव देहे मधुपर्कं संसारमोक्ष
णं। शरीरशव आगतं तु निहन्मि शरीरशोधनं गृह्ण लोकनाथमिमं मधुपर्कं॥ एतेन मंत्रेण मधुपर्कोत्तमं दद्या
त्। पुरुषो मृत्युकाले तं दत्वा संसारमोक्षणमिति॥ एवंविधैः सत्रैः प्राणैः संसारं स न गच्छति॥ कात्यायनः॥
स्वयं होमासमर्थस्य समीपमुपसर्पणं॥ तत्राथ शक्तस्य सतः शयनाद्योपवेशनं॥ कृतायां सायमाहुत्यां हु

र्वलश्चेद्गृही भवेत्॥ प्रातर्होमस्तद्दैवस्याद्गीवद्धेयः पुनर्नवा॥ दुर्बलो मुमूर्षुः। सायंहोमे कृते दुर्बलं गृहिणं ज्ञात्वा
भविष्यन्प्रातर्होमस्तद्दैवसायमपकृष्यर्त्विग्भिः कर्त्तव्यः। यदि तु प्रातःकालपर्यंतमसौ जीवेत्तदा सायंकृ
तत्वान्न कर्त्तव्य इत्यर्थः। नवेति वाशब्दोत्रावधारणे। नैवेत्यर्थः॥ तथा॥ पौर्णमासे कृते प्राक्चेद्दर्शात्स्वामी
मुमूर्षुः। अपिंडपितृयज्ञः स्याद्दर्शोयेवं तद्दैवतं। वैश्वदेवे कृतेप्येवं चातुर्मास्यसमापनं॥ उपक्रांता
न्यनेकाहः संपाद्यान्येवमेव तु॥ प्रयास्तुं स्वामिनं ज्ञात्वा कर्त्तव्यानि स्तुतादिभिः। तत्रैवं क्रियमाणे तु
हविरास्वादनात्पुरा॥ मरणं चेत्तु हवींषि नयें प्रक्षिप्य संदहेत्॥ तद्दशाहवनीये तान्स्रु ईमासादनान्मृते
मरणांतं हि तत्कर्म कर्त्रभावात्समाप्यते॥ अग्निहोत्रेप्युपक्रांते स्वामी यदि विपद्यते॥ प्राग्युन्नयनतोन्नये
द्दे हेंहोमं तं हुत्वरं॥ तद्दशाहवनीये च कर्म तत्र समाप्यते॥ इष्टिपश्वादिकं तत्र कालाल्पत्वान्न संभवेत्॥
देवतानां प्रधानानामेकैकस्य पृथक्पृथक्॥ पुरोनुवाक्यायाज्याभ्यां च तूर्णां ताहुतां हुतीः॥ जुहुया
देवमन्यत्र सर्वत्रायदि हूयते॥ अथेष्टयनमध्येस्यात्पत्युर्मरणसंशयः॥ अवशिष्टेष्टिदेवेभ्यस्तत्संख्या

देव: ३ नि घृतानि च॥ चतुर्गृहीतान्येकत्र गृहीत्वा च मन्त्रैसह॥ पुरोनुवाक्यायाज्याभिः पूर्ववज्जुहुयात्प्रयत्नतः॥ मंडनः
पूर्वपक्षे तु रात्रौ चेन्मृतिशंकाग्निहोत्रिणः॥ सायं हुत्वा तदैवाथ जुहुयात्प्रातराहुतिं॥ यदि त्वपरपक्षे स्यान्मृ
3 तिशंकाग्निहोत्रिणः॥ हुतावशिष्टाः पक्षेस्मिन्जुहुयात्सकलाहुतीः॥ दर्शेष्टिं च तदा कुर्यादिष्टिर्यद्दिनसंभवे
त्॥ देवतानां प्रधानानां मित्यादित्यसमापनं॥ चातुर्मास्यांतराले चेत्स्वामिनो मृतिशंकनं॥ तत्रातपर्वपर्यंत
मग्निहोत्राण्यशेषतः॥ तदैव कुर्वीत दर्शान्पौर्णमासान्बहूनपि॥ चातुर्मास्या च शिष्टानि पर्वाण्यत्र समापयेत्
पश्वलाभे पुरोडाशं निर्वपेत्पशुदैवतं॥ आमिक्षामथवा कुर्यात्पूर्णाहुतिमथापि वा॥ आहिताग्निः कदाचि
४क्ष त्तु शुक्लपक्षे मृतो यदि। तदाशेषाहुतीः सर्वा जुहोतीत्याश्वलायनः। अन्ये तदैव दर्शेष्टिं कुर्युः कृष्णे मृतस्य तु।
शुक्लपक्षे निशि प्रेतस्येच्छंति प्रातराहुतिं॥ अशक्तौ याजमानं चेत्पत्नीकर्म च लुप्यते॥ न तावता क्रतुभ्रेषः
स्यादाथर्वणसूत्रतः॥ अनुपदसूत्रे॥ तच्चेदपरपक्षे प्रयाणं शंकेत यावत्सोपरपक्षः स्यात्तिशिष्टा रात्रयः स्फस्ता राम०
सां सायं प्रातराहुतीः॥ मतिसंख्याय हुत्वा प्रत्याहृत्यामावास्येन हविषेष्ट्वा समापयेच्छेषमयज्ञविलोपः इति सू ३

र्वपक्षेचेद्रा[illegible]वौ मातराद्धत्तिरेवेति॥ दुर्बलंस्नापयित्वातंशुद्धचैलाभिसंहृतं॥ निवेशयेद्बर्हिष्मत्यांदक्षिणाशिरसं
क्षितौ। विगतासुंतमाल्याद्यस्तुवस्त्रमुपवीतिनं। चंदनोक्षितसर्वांगंसुमनोभिर्विभूषयेत्॥ प्रेतसंबंधियत्कर्मस
र्वंतद्पसव्यवत्॥ उद्धृत्यांहवनीयाग्निंस्वस्थानेदक्षिणानलं॥ सक्तुसक्तुस्तुसक्तुसमूहादिसंस्कृतेदक्षिणामु
खः। कर्त्ताप्रत्यग्म्रधिश्रित्यशुष्कगोमयसंयुता॥ कार्पासादिभिरन्यैश्चस्थाल्यस्तेषुप्रदापयेत्॥ अत्रश्राद्धंभवेद
स्यप्रेतोच्छाननिमित्तकं॥ एकोद्दिष्टविधानेनजपाशीः स्वस्तिवर्जितं॥ अक्षय्योदकसंवेधरहितंप्रेतशाद्ववत्॥
कालनिर्णयदीपिकायां॥ एकोद्दिष्टविधिर्मृतस्यनिधनस्थानेततोवर्त्मनिस्थानेविश्रमणस्यसंचयविधेर्द्दि
शात्रयंस्यादिदंतुर्येह्नित्रयेतीयकेइति॥ तथाचनागरखंडेभर्तृयज्ञः। त्रीणिसंचयनस्यार्थेतानिवेश्मणिसांप्रतं। यत्र
स्थानेभवेन्मृत्युस्तत्रश्राद्धंप्रकल्पयेत्॥ एकोद्दिष्टंततोमार्गेविश्रामोयत्रकारितः। ततः संचयनस्थानेतृतीयं
श्राद्धमिष्यते॥ कूर्मपुराणे प्रेतायपक्वगृहेद्वारिप्रथमेभोजयेद्द्विजान्॥ द्वितीयेहनिकर्त्तव्यंतुरकर्मसबांधवैः
धनिष्ठापंचकमृतेपंचरत्नानितन्मुखे। न्यस्याङ्गत्रयंकर्त्तदद्याद्वहवयामिति॥ ततोनिर्हरणंकुर्यादेवंस्नाने

देव० ४

विधिःस्मृतः। वज्रमौक्तिकवैडूर्यपुष्परागेंद्रनीलकं॰ पंचरत्नमिति प्रोक्तंनारदेनमहर्षिणा॥ इतरंनिखनेद्देव
जलेवा प्रतिपादयेत्॥ त्रिपादर्क्षमृतेतद्वद्धिरण्यपंसकलंमुखे॥ न्यस्यापिष्टमयंकुर्यात्पुरुषत्रितयंततः। होमः
प्रतिमुखंतत्र भवेद्वहवयामिति॥ आस्यएवसकर्पासंकुसुमंप्रतिपद्यतु॥ निर्यात्तिसाग्निंसंस्कुर्याद्दग्ध्व्याग्नौवा
न्यमुत्सृजेत्॥ कुर्यात्त्री त्रितयंपिष्टमयंसाग्नेर्मृतोस्त्रिया॥ हारिद्रांबरसंछन्नंनिर्हरेयुःसुताद्यः॥ स्थापयंत्यन
सिप्रेतमेकाग्निंचकटादिषु। शिबिकायाविमानवाप्रचेतोवचनादिह॥ पृथक्संतापजानग्नीनामपात्रेषुथाहरेत्
सभ्याग्निसावसथ्यंचक्लत्वापात्रांतरेक्कचित्॥ विधुरस्यकपालाग्निमामपात्रेणतंनयेत्॥ पृषदाज्यंघ्नातंदर्भोत्ति
लोन्यात्राणिसमंच॥ हिरण्यानिघृताद्यत्रचंदनावीधमानिच॥ अनस्येवानिकृत्तैवंससिंज्ञदक्षिणांदिशं। अन
सासहतेयांतियमसूक्तादिपाठकाः। अपेतोधायइत्यत्रयमसूक्तंविदुर्बुधाः॥ एकाग्निमितरंपुष्पमालादिभिरलंकृ
तैः।कटादिभिरपिस्कंधेमालादिभिरलंकृतं॥ चत्वारस्तंवहेयुस्तेपंचमःपुरतोनलं। त्रियष्टितलभांडस्कंधेसर्वोपस्क
रसंयुतं मनुः। नविप्रंस्वेषुतिष्ठत्सुमृतंशूद्रेणनाययेत्॥ अस्वर्ग्याह्याहुतिःसास्यात्शूद्रस्पर्शविदूषिता॥ त्वे

पूम० ४

श्रुतिष्वत्र विवक्षितमस्वर्ग्यं त्वाह्निकोय श्रवणात्॥ दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत्। पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्वि-
जातयः॥ वैश्यादारभ्य प्रातिलोम्येन॥ हारीतः। न ग्रामाभिमुखं प्रेतं हरेयुः॥ निर्हरतां यदि वर्त्म नियामः स्यात्तन्मध्येन गंत-
व्यमित्यर्थः॥ जाबालिः॥ शूद्रेण दग्धो यो विप्रो न लभेच्छाश्वतीं गतिं॥ प्रायश्चित्तं प्रकुर्वीत बांधवः पापशुद्धये॥ चांद्राय-
णं पराकं च प्राजापत्यं विशुद्धये। विप्रेभ्यो दक्षिणां दद्यात्ततः स्यादूर्द्ध्वदैहिकं॥ आह विष्णुः तं द्विजं न शूद्रेण निर्हा-
रयेत्। न शूद्रं द्विजेन पितरं मातरं च पुत्रा निर्हरेयुः॥ न द्विजं पितरमपि शूद्राः। यमः॥ यस्यानयति शूद्रोऽग्निं तृणंका-
ष्ठहवींषि च॥ मन्यते ह्येष धर्मोऽस्ति स चाधर्मेण लिप्यते॥ कात्यायनः। हिरण्यसकलान्यस्याक्षिप्त्वा छिद्रेषु सप्तसु। मुखे-
ष्वथापिधानयैनं निर्हरेयुः सुतादयः॥ आमपात्रेऽन्नमादाय प्रेतमग्निपुरःसरं॥ एकोऽनुगच्छेत्तस्यार्द्धमर्द्धपथरजिद्भुवि
ऊर्द्धमादहनं प्राप्त आसीनो दक्षिणामुखः॥ सव्यं जान्वाच्य सैनकैः सतिलं पिंडदानवत्॥ तस्यार्द्धमामपात्रस्थितान्ना-
र्द्धं आदहनं श्मशानं दाहभूरित्यर्थः॥ एकः पुत्रादिरधिकारी॥ आसीन इति उत्स्रजेदित्यनुषंजनीयं। प्रेतोद्देशेन गोत्रनामो-
च्चारणपूर्वकमुत्स्रजेदित्यर्थः॥ विष्णुः। अनाथं ये ब्राह्मणा हरंति ते स्वर्गलोकभाजः। न द्विजं पितरं मातरमपीति। पराश-

देवः ५

रः। अनाथं ब्राह्मणं प्रेतं ये वहंति द्विजातयः। पदे पदे यज्ञफलमानुपूर्व्याप्नुवंति ते॥ न तेषामशुभं किंचित्पापं वाशुभकर्मणां॥ ज
लावगाहनात्तेषां सद्यः शौचं विधीयते॥ प्रेतस्पर्शनसंस्कारैर्ब्राह्मणो नैव दुष्यति॥ वोढा चाग्निप्रदाता च सद्यः स्नात्वा शुचिर्भवेत्
ब्रह्मपुराणे॥ प्रेतः स्नातो वस्त्रमाल्यैर्दिव्यगंधैरलंकृतः। श्मशानभूमिं नेतव्यो मानुषैरनहंकृतैः। मुखे निधाय वा कांस्यं सुवर्णं
मणिविद्रुमं॥ चतुर्विधेन वाद्येन कुर्युः कोलाहलं महत्॥ भूमौ शनैर्निधातव्यो यावत्प्रेतस्य जीवनं॥ गतैस्तु नवभिः प्राणै
रसौ देहं न मुंचति॥ सर्वेषामेव जंतूनां सत्त्ववायुर्धनंजयः। प्रीत्यप्रीतिविभेदांश्च ज्ञानातिनिलयो स्थिताः। ध्वनिमाकोचनं कोपं
करोति कुणपेशयः॥ इति मत्वा शनैः स्थाप्यः स्नप्यः स्नानादिकैः शवः। नदीमध्ये समानीय तत्र दग्धव्य एव न चान्यथा यस्मि
न्देशे जलं न स्यात्तुषारं वा न विद्यते॥ तत्र तोयकथा कार्या वक्तव्यं वा हिमं हिमं॥ वाराहपुराणे॥ तेनाम्भु स्पृष्टपुरुषं स्नाप्य नयेत्तं पै
तृकं वने॥ दक्षिणाशिरसं कृत्वा सचैलं तु शवं तथा॥ तीर्थस्यावाहनं कृत्वा स्नपनं तत्र कारयेत्॥ गयादीनि तु तीर्थानि ये तु पुण्याः
शिलोच्चयाः। कुरुक्षेत्रं च गंगा च यमुना च सरिद्वरा॥ कौशिकी चंद्रभागा च सर्वपापप्रणाशनी॥ भद्रा च काशी गंडकी सरयू राम० ५
तमासा तथा॥ वैनवं च वराहं च तीर्थं पिंडारकं तथा॥ पृथिव्यां यानि तीर्थानि चतुरः सागरास्तथा॥ ध्यात्वा तु मनसः सर्वे

5

कृतस्नानं गता युषं॥ देवाश्चाग्निमुखाः सर्वे गृहीत्वा तु हुताशनं॥ गृहीत्वा पाणिना सर्वे मंत्रमेतदुदीरयेत्॥ कृत्वा सुदुःकरं कर्म
जानता वाप्यजानता॥ मृत्युकालवशं प्राप्य नरं पंचत्वमागतं। धर्माधर्मसमायुक्तं लोभमोहसमावृतं॥ दहेयं सर्वगात्राणि दिव्या
न्लोकान्स गच्छतु॥ एवमुक्त्वा ततः शीघ्रं कृत्वा चैव प्रदक्षिणं। ज्वलमानं तथा वह्निं शिरःस्थाने प्रदापयेत्॥ चतुर्वर्णेषु संस्कार
एवं भवति पुत्रक। गरुड उवाच॥ कर्मयोगाद्यदा देही मुंचत्यत्र निजं वपुः॥ तदा भूमिं गतं कुर्याद्गोमयेनोपलिप्य तु॥ तिलान्
दर्भान्विकीर्याथ मुखे स्वर्णं विनिक्षिपेत्॥ तुलसीं संनिधौ कृत्वा शालिग्रामशिलां तथा॥ सेतुसामादिसूक्तैश्च मरणं मुक्ति
दायकं॥ तिला लोहं हिरण्यं च कार्पासं लवणं तथा॥ सप्तधान्यं क्षितिर्गावः एकैकं पावनं स्मृतं। तिलपात्रं यथाशक्ति शय्यादा
नं तु कारयेत्॥ दीनानाथविशिष्टांस्तु दक्षिणाभिश्च तोषयेत्॥ स्थाने श्राद्धं प्रकुर्वीत तथैवैकादशे दिने॥ मृतस्योत्क्रांतिसमया
८ षट्पिंडान्क्रमशो ददेत्॥ मृतस्थाने तथा द्वारि चत्वरे तार्क्ष्य कारणात्। विश्रामे काष्ठचयने तथा संचयने च षट्॥ तथा कुंभदानम
पि तत्रैवोक्तं॥ षोडशाद्याः प्रदातव्या मासान्नजलपूरिताः। उत्क्रांतिश्राद्धमारभ्य श्राद्धषोडशकं स्मृतं॥ षोडश ब्राह्मणानां तु एकै
कं विनिवेदयेत्॥ आद्याः षट् दशपिंडा दशाहिकाः। एवं श्राद्धषोडशकं॥ तत्र प्रत्येकं घटदानं भवतीत्यर्थः। तथा॥ म

देव॰
६

लिनं श्राद्धसंज्ञा निःपूर्वं षोडशकाश्रय स्थाने चार्द्धपथे तीते चितायां शवहस्तके॥ श्मशानवासिभूतेभ्यः पंचमं प्रातिवेश्मकं
षष्ठः संचयने प्रोक्तो दशपिंडा दशाहिकाः। श्राद्धषोडशकं चैतत्प्रथमं परिकीर्तितमिति॥ शृणु तत्कारणं तार्क्ष्य षट्पिंडपरिक
ल्पने मृतस्थाने शवो नाम तेन नाम्ना प्रदीयते॥ तेन दत्तेन तुष्यंति गृहवास्त्वधिदेवताः। चत्वरे खेचरो नाम तमुद्दिश्य प्रदापयेत्
तेन तत्रोपघाताय भूतकोटिषु दुर्गताः। विश्रामे भूतसंज्ञो यं तेन तत्र प्रदीयते॥ पिशाचा राक्षसा यक्षा ये चान्ये दिग्निवासिनः।
तस्य होतव्यदेहस्य नैवायोग्यत्वकारकाः। चितामोक्षप्रभृति कं प्रेतत्वमुपजायते॥ चितायां साधकं नाम वदंत्येके खगेश्वर॥ केपि
तं प्रेतमेवाहुर्यथाकल्पविदस्तथा॥ दद्यात्तत्र तत्रापि प्रेतनाम्ना प्रदीयते॥ इत्येवं पंचपिंडैर्हि शवस्याहुतियोग्यता॥ अन्य
था चोपघाताय पूर्वोक्तास्ते भवंति हि॥ संमृज्य चोपलिप्याथ उल्लिख्योद्धृत्य वेदिकं॥ अभ्युक्ष्योपसमाधाय वह्निं तत्र विधानतः
पुष्पाक्षतैश्च संपूज्य देवं क्रव्यादसंज्ञकं॥ त्वं भूतकृज्जगद्योने त्वं लोकपरिपालक॥ उक्तः संहारकस्तस्मादेनं स्वर्गं मृतं नय॥ इति
क्रव्यादमभ्यर्च्य शरीराहुतिमाचरेत्॥ अर्द्धदग्धे तथा देहे दद्यादाज्याहुतिं ततः। अस्मात्त्वमधिजातोसि त्वदयं जायतां पुनः
असौ स्वर्गाय लोकाय स्वाहा ज्वलतु पावके। एवमाज्याहुतिं दत्वा तिलमिश्रां समंत्रकां॥ रोदितव्यं ततो गाढमेवं तस्य सुखं

गम॰
६

भवेत्॥ अथ षड्विंशन्मतात्॥ प्रेतं दहेच्छुभैर्गंधैः स्नापितं स्रग्विभूषितं॥ दग्ध्वो ग्रामाद्बहिः कुर्यात्सचैलं स्नावनं जले॥
आह प्रचेताः। अथातः संप्रवक्ष्यामि पिंडदानाह्निकं विधिं॥ मृतो मर्त्यः स्वकुलैस्तु श्मशानं नीयते तदा॥ स्नानं प्रे
तस्य कृत्वा तु शुष्कैर्वस्त्रैश्च भूषणं॥ श्मशानं नीयते पश्चात्ततः संस्कृत्य यत्नतः। नग्नदेहं दहेन्नैव किंचिद्देयं परित्यजे
त्। गोत्रजस्तु गृहीत्वाथ चितामारोपयेत्तदा॥ किंचिद्देयमिति शवं वस्त्रैकदेशं श्मशानवास्यर्थं परित्यजेत्। दग्ध्वा
शवं ततस्त्वेवं प्रादेशाः काष्ठिकास्तथा॥ सप्त प्रदक्षिणं कृत्वा एकैकां तु विनिक्षिपेत्॥ नदीकूलं ततो गत्वा शौचं कृ
त्वा प्रयत्नतः। वस्त्रं संशोधयेद्धीमान्ततः स्नानं समाचरेत्॥ सचैलस्तु ततः स्नात्वा शुचिः प्रयतमानसः। पाषाणांस्त
त्र आदाय विप्रे दद्याद्दशांजलीन्॥ द्वादशे क्षत्रिये दद्याद्वैश्ये पंचदश स्मृताः। त्रिंशच्छूद्राय दातव्यास्ततः संप्रविशे
त्। ततः स्नानं पुनः कार्यं गृहशौचं च कारयेत्। पिंडोपकरणं कुर्यात्तद्दानेयत्नमाचरेत्॥ ब्रह्मपुराणे॥ स्वगोत्रजै
र्गृहीत्वा तु चितामारोप्यते शवः। अधोमुखो दक्षिणादिक्चरणस्तु पुमानपि॥ उत्तानदेहा नारी तु सपिंडैरपि बंधु
भिः। मरणादेव कर्तव्यः संयोगो यस्य ताग्निना॥ दाहादूर्ध्वमशौचं स्याद्यस्य वैतानिको विधिः॥ तथा॥ दरिद्रोपि न

दग्धव्योनग्नः कस्यांचिदापदि॥ केनापिवस्त्रखंडेनछादितव्यः प्रयत्नतः। यत्रतत्रभवेद्दुःखीयद्दिनग्नस्तुदह्यते॥ नि:
शेषस्तुनदग्धव्यः शेषंकिंचित्यजेत्ततः। गच्छेत्प्रदक्षिणांसमसत्रिद्धिः सप्तभिः सह॥ देयाः प्रहाराः सप्तैवकुठारे
णोल्मुकोपरि॥ आत्मादायनमस्त्वस्मिनितिजल्पेत्समाहितः। नावेक्षितव्यः क्रव्यादोगंतव्याचततोनदी प्रचेताः॥
आहयाज्ञवल्क्यः। ऊनद्विवर्षंनिखनेन्नकुर्यादुदकंततः। आश्मशानादनुव्रज्यइतरोज्ञातिभिर्वृतः। यमसूक्तंयमगा
थांगायद्भिर्लौकिकाग्निना॥ सदग्धव्यउपेतश्चेदाहिताग्न्याहृतार्थवत्॥ पथा स्वग्नेनिधापयेद्बालानेवंधर्मोनही
यते॥ यमगाथांगायमानोयमसूक्तमनुस्मरन्॥ नैवतस्याग्निसंस्कारोनविधिर्नोदकक्रिया॥ कात्यायनः। आमपात्रे
ऽन्नमादायप्रेतमग्निपुरःसरं॥ एकोनुगच्छेत्तस्यार्द्धमर्द्धपथ्युत्सृजेद्भुवि॥ ऊर्द्धमादहनंप्राप्य आसीनोदक्षिणामुखः
सव्यंजान्वाच्यशनकैः सतिलंपिंडदानवत्॥ अथपुत्रादिराप्लुत्यकुर्याद्दारुचयंमहत्॥ भूप्रदेशेशुचौयुक्तेपश्चा
च्चित्यादिलक्षणं॥ गृह्यकारिकायां॥ समेशुचौविहृताग्नीवैतानास्पतरोशुभे॥ उद्धृतस्यक्षीरसंयुक्ताओषधीर्ना
षपर्णिका॥ मुंजाहूर्वाश्वगंधांवाध्याजंचपुरुषाकृती॥ न्यग्रोधाश्वत्थहारिद्रतिल्वकस्पूर्जकादयः॥ हूरेताज्यास्त

तोयैर्नानामंत्रैर्विनिर्दिष्टैरिति ॥ केशश्मश्रूणि लोमानि नखानि वा निकृंतति ॥ पुरीषं चापि निर्यातं केशादीन्निखनेत्ततः
प्रेतदेहं ततः कृत्स्नं घृतेनांतरनक्तितं ॥ विपुषी घसापक्षेतः सर्षपांजनमिष्यते ॥ हारिद्रं वस्त्रखंडं च संचयार्थं
विधाय तु ॥ चितां प्राग्ग्रीवमास्तीर्य जिनमुत्तरलोमकं ॥ तस्मिन्नाकृसिरसं प्रेतमुत्तानं विनिपातयेत् ॥ अथ
सलविस्तृष्टाभिर्ईहाभिः कुशरज्जुभिः। नह्योनिष्क्रांतिसमये छेदयेद्धुनैवताः। हिरण्यसकलान्सप्तमुखेना
सिकयोस्तथा। चक्षुषोः कर्णयोस्तद्वदेकैकं तेषु विन्यसेत् ॥ ज्वुहूमास्येनह्रणं तां सादयेद्दक्षिणे करे ॥ सव्ये
चोपभृतं रिक्तां क्रवामुरसि विन्यसेत् ॥ ध्रुवैकैकं तं शिरोग्रं तद्दक्षिणयानं सिक्त्वं ॥ सर्वाण्येव शिरोग्राणि पात्रा
णि त्वाह गोभिलः। प्राशित्रे कर्णयोर्मूर्द्ध्नि रिक्तं प्राणीतकं न्यसेत् ॥ कपालानि विकल्पेन दृष्टपेपाश्वयोः क्रमात्
प्रपास्त्रमक्तं तं यस्य नश्येद्धा तत्कथं च न ॥ दृषोपधी यते छिन्ने वैकंते निरिपाठम [stain] ।उदरे सादयेत्तस्य पृषदाज्यवती
मिज्ञां ॥ शम्यां शिश्नोणि रद्दं दृमुद्गृहणयोरपि ॥ मुषलेन सह न्युब्जं मंतरोर्वोरुलूखलं ॥ प्रायासिकानि सर्वा
णि तत्रैवोपासनान्यपि ॥ सादयेदंतरेणोरूस्थानानवगमाघतः। मन्मया श्ममयानां चहानं विप्रायप्रकृतो शा

द्वै· ८

४८

साद्यपस्मयंपात्रमौर्वीलीचत्रयोरयः। तद्धद्धिप्रायदातव्यं नो चेदं भसिनिक्षिपेत्॥ यद्यनुस्तरणीपक्षस्ततआनीय
तामपि॥ गांपश्चात्कर्णमाहत्संतन्मासान्यपिहोत्रिणः। प्रत्यंगमुपधीयंतेहस्तयोः कुक्षिगोलकौ। मुखंचवय
पासाद्यततोग्नीनांसमिंधनं॥ गौरनुस्तरणीप्रोक्तानपक्षोयंकलौभवेत्॥ शूर्पेणाग्निंसमिंधीयाद्धूसस्तानमुखेनतु
आज्येनसक्तदातेनजुहुयाद्दाहुतिंततः। शंस्येक्षवासमित्स्वंहिचन्यापितृदिङ्मुखः। प्रेतेनसहितांपुत्रोभ्राता
वातद्भावतः। अन्योवाब्राह्मणः कश्चित्सपिंडाद्स्याभावतः। हीनजात्योर्युदासार्थंदाहादौभ्रातृपुत्रयोः। ब्राह्मण
ग्रहणंसूत्रेवावदीत्यत्रभाष्यकृत्॥ अस्मात्त्वमितिमंत्रेणनूहितेनस्त्रियाअपि॥ ततः प्रचरणीमास्येखादिरंनासि
केस्रुवं॥ वज्रंदक्षिणहस्तेचयोजयेदग्निहोत्रिणः। उत्तानानित्तुपात्राणिवावदीत्यत्रगोभिलः। स्याद्धुतीयांतनि
र्देशात्प्रतिपत्तिरियंस्मृतेः। जुहूंसादयतीत्यादौपात्राणांवचनाद्धिहि॥ अग्निभिर्यज्ञपात्रैस्तंआहिताग्निंदहंततः
पात्राणांकरणात्तास्पष्टाप्रतीयेतापिसादने॥ प्रतिपत्तिर्द्वितीयांतनिर्देशाद्धविरोधतः। तेषांतुप्रतिपन्नानांदाहेकरणा राम· ८
ताभवेत्। अतः पात्रविनाशेचनोसान्निः प्रतिपत्तितः। प्रत्यपादिपुनर्दाहोवेत्यास्मिन्नपिसूत्रतः। एवंगृहपतिर्दग्धः

सर्वंतरति दुष्कृतं॥ यस्यैनं दाहयेत्सोपि प्रजां प्राप्नोत्यनिंदितां। यथा स्वायुधधृक्पांथो ह्यरण्यान्यपि निर्भयः। अति

क्रमात्मनो भीष्टं स्थानमिष्टं च विंदति। एवमेषोग्निमान्दग्धः पात्रायुधविभूषितः॥ लोकाननन्यानतिक्रम्य परं ब्रह्मैव विं

दति। सभ्यावसथ्यौ वितिमुत्तरेणासंस्थापनीयौ पितृदिङ्मुखेन॥ सकृत्सकृत्संस्कृत भूप्रदेशे पदेषु सप्तस्विति गोभिलाख्यः

। तथा च शाट्यायनः॥ सभ्यावसथ्यावाहिताग्नेर्दहनकर्माणि नप्रयुज्येते। चितादेशात्प्रागुदीच्यां दिशि पंचक्रमान

ति क्रम्योत्सृजतीति॥ पात्राणि त्र प्रयुज्यंते इति। उदधमराम विच्छिन्नां सिंचन्नन्यो: प्रदक्षिणं॥ स्कंधावसक्तकुंभेन

पादतः परितस्त्विते। आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः। अनाहिताग्निरेकेन लौकिकेनेतरेजना॥ ॥

अथानाहिताग्नेर्दहिउच्यते अथपुत्रादिराप्लुत्य कुर्याद्दारुचयं बहु। भूप्रदेशे शुचौ युक्ते पश्चाच्चित्यादि

लक्षणे। तत्रोत्तानं निपात्यैनं दक्षिणाशिरसं मुखे। मस्ता हिरण्यपासिरसि प्रणीतं च मसंत्तथा॥ शूर्पेतत्पार्श्वयोरेकं चे

द्विधाप्सर्वं विभ्मसेत्॥ श्रवणाकर्मसंबंधि द्वितीये पिंड्यज्ञियं॥ नपेत्रं शूर्पमन्यत्र न कुर्यादनतिदेशतः। अंडपोररणी

तदूर्ध्वोक्षणीपात्रमादितः। पात्राणि चांतरेनोरून्यन्यपाद्यं मसि क्षिपेत्॥ अथाग्निं सव्यजान्वक्रोदघाद्दक्षिणतः श

देव
९

नैः। पूर्ववद्धुतपाद्यग्नौ समिद्धर्जेस्रुवेणसः। दक्षिणायांस्कंधेद्द्यात्मसि स्फ्यं दक्षिणे करे। समिंधीयात्ततो वह्निं
शेषं स्याद्राहिताग्निवत्। स्त्रीमरणे तु विशेषः छंदोगानां॥ अनेनैव हृतानारी दग्धव्या या व्यवस्थिता। अग्निप्र
दानमंत्रोस्या न प्रयोज्य इति स्थितिः। अग्निनैव दहेद्भार्यां स्वतंत्रां पतितां न चेत्॥ तदुत्तरेण पात्राणि दाहयेत्पृथगंतिके।
श्रौते तु विशेषः। दाहयित्वाग्निभिर्भार्यां सदृशीं सर्वसंस्थितां॥ पात्रैश्चाथाग्निमादध्यात्कृतदारो विलंबितः। एवं
वृत्तां सवर्णां स्त्रीं द्विजातिः सर्वमारिणीं। दाहयेदग्निहोत्रेण यज्ञपात्रैश्च धर्मवदिति॥ तेन सदाचारा पत्नी पात्रैरग्निभि
स्वदाह्या व्यभिचारिणी तु केवलाग्निभिर्दाह्या पात्राणि तु पृथगुत्तरतो दहेत्॥ पतितायाश्चेत्तो तस्मात्ताग्निभिर्दाहोपि
न कार्यः। इति। एवमेवा गृहीताग्नेः प्रेतस्य विधिरिष्यते। तत्र तु स्त्रीभवेत्सर्वपात्रविन्यासमंतरा॥ नग्नदेहं दहेन्नैव।
किंचिद्देयं परित्यजेत्॥ किंचिद्देयं प्रेतवस्त्रैकदेशं परित्यजेत्। श्मशानवासिनामर्थे प्रचेतो वचनादिह। दारुभिर्न
कुर्वीयेत दह्यमानं कलेवरं॥ न हन्यान्नापि तच्छिंद्याद्यतोस्माद्दुःखमश्नुते॥ यजमाने चितारूढे पात्रन्यासे कृते सति
वर्षाद्यभिहतेवाग्नौ तत्वं प्रष्टव्या प्रियाज्ञिकात्॥ वेधकाष्ठार्द्ध दग्धेन मंथनं तत्र कारयेत्॥ तच्छेषालाभतोन्येन दग्धशेषे एम०
९

णा तत्पुनः। अपूर्वप्राशपतिशेषं तत्तदाग्नेय्वस्ताः स्मृता बुधैः। हुत्वा वा लौकिके वह्नौ भूर्भुवः स्वघृताहुतिं। स्रुवेण वा स्रुचा वा तेन
दग्धशेषं दहेत्ततः। आहिताग्न्योस्तु दंपत्योर्यस्त्वादौ म्रियते यदि। तस्य देहः सपिंडैस्तु दग्धव्यस्त्रिभिरग्निभिः। पश्चान्मृतस्य
देहस्तु दग्धव्यो लौकिकाग्निना। दंपत्योरनयोर्मध्ये पूर्वं स्वामी मृतो यदि। न योल्मुखं पृथक्कृत्वा समारोप्याधानलंब्धतेः। धार
येद्दक्षराणिस्तं तदाश्रयाणां त्रय त्वत्ततः। मृता निर्मथ्य दग्धव्या तेन पत्नी सुतादिभिः। यदि पूर्वं मृता पत्नी दाहयित्वाग्निभि
स्त्रिभिः। पुनर्दारक्रियां कृत्वा पुनराधानमेव च॥ न दहेदग्निहोत्रेण पूर्वं पत्नीं मृतामिति॥ निषेधः श्रूयते शास्त्रे द्वि
तीयां विषयो ह्यसौ। द्वितीयां चैव यो भार्यां दहेद्वैतानिकाग्निभिः। जीवंत्यां प्रथमायां तु सुरापानसमं हि तत्॥ सत्यमेवं तथा
पि स्त्रीसामान्यविषयो ह्ययं। निषेधः परिशिष्टादावेवं हि स्मर्यते त्वतः॥ तस्मान्नैर्येकदेशेन दग्धव्या पूर्वमारिणी। पत्नी ज्येष्ठे
तरा वापि यत्र पार्श्वे निरूपितं॥ मृतायामपि भार्यायां वैदिकाग्नीन्नहि त्यजेत्॥ उपाधिनापि तत्कर्म यावज्जीवं समापयेत्
उपाधिः कुशपत्न्यादि विष्णुनोक्ता न युज्यते॥ द्वितीया विषयत्वे तु प्रथमा विद्यते यतः। पुनः परिणयाधाने न सिध्येत्ते म्यता
चेत्। गार्हपत्यैकदेशेन दाह्या निर्मथ्य वा ततः। पुनः परिणयाधाने तारुण्यात् संभविष्यतः। तेन पत्न्यग्निहोत्रेण दाह्याम

देव०

१० न्वाहिताशसनात्॥ शालाग्निनावाकृतस्तेन पक्षेतात्र नराहितिः। सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभेसलिल
माधाय पंचगव्यं क्षिपेदिह॥ तल्लिंगैर्वामदेवाद्यैः पुण्यर्ग्भिरभिमंत्रयेत्॥ विप्राणां वचनात्स्नात्वा प्रायश्चित्तं यथोदितं॥
कृत्वा धेन्वादि दत्वा वा कृच्छ्रान्पंच दशाथवा॥ उदक्यासूतिका वापि यदि प्रेतां स्पृशंति हि। तस्यैष विधिरादिष्टो वात्स्ये
नापि महात्मना॥ तेनैव शतकृत्वस्तां स्नापयेद्विधिनादहेत्॥ प्रक्षाल्य पंचगव्येन स्नापयित्वा रजस्वलां। स्नापयेत् पूर्व
वत्प्रेतां प्रायश्चित्ते कृते सति। वस्त्रांतरावृतां कृत्वा विधिवत्तां दहेद्बुधः। चतुर्थेहनि संप्राप्ते द्धरितां तु रजस्वलां॥ अवगा
ह्यावगाह्यान्मासचैला स्त्री स्पृशेत्तु तां। कृतशौचां तया चम्याचम्य द्वादशवारतः। दशकृत्वोथवां तेसात्यजेद्वासो रजस्वला
शक्त्या दानं ततः कुर्यात्पुण्याहेन विशेषतः। रजस्वलायाः प्रेतायाः संस्कारं न समाचरेत्। अहाहं स्नापयित्वा दाहयेद्वि
धिपूर्वकं॥ एष एव विधिः कार्यः सूत्यामेकादशेहनि॥ प्रोषितस्य न्मृतस्तस्य विशेषः प्रतिपाद्यते॥ पराकद्वयमद्वैवा
कृत्वा कृच्छ्रास्तुतादिभिः। मृताग्निहोत्रं होतव्यं प्राग्दाहात्तत्र कथ्यते॥ प्राचीनावीनः सर्वं शस्यमेवोद्धरेत्खरे। सादनाभा एम०
वात् कूर्मस्थापनं न भवेदिह॥ प्रागग्रैर्दक्षिणाग्रैश्च तृणैः शंस्यपरिस्तृतिः। पर्युक्षणं च तस्यैव कार्यममंत्रा प्रदक्षिणं। १०

नयेद्दक्षिणतोभस्मनिरुद्धोष्णंवसंधिनीं। दुग्धाभस्मन्यधिश्रित्यावनीतासेकवर्जितं। उद्वास्यसहदासाद्यंदक्षिणस्कंक
वेततः। प्रत्यप्रेषरहितंतत्त्वयः सकृदुन्नयेत्। धारयेत्समिधंवाथनयेद्दक्षिणतोनयेत्। तूष्णींसमिधमाधायसव्यंजानु
निपात्यच। अपसव्यंश्रुवंकृत्वासकृत्सर्वंविनिक्षिपेत्॥ ततः कृत्वाजिनेस्थीनिपुरुषाकारवन्न्यसेत्। ऊर्णाभिश्छादये
त्तानिघृतेनाभ्युक्षपूर्ववत्॥ पात्राणियोजयित्वातंदहेत्संतापजाग्निभिः। अनाहिताग्निमप्येवंनिरग्निंचदहेदपि। प्र
थमंतद्दहः कृत्वायथाशास्त्रंचसंचयः। अस्थीनिचेन्नलभ्यंतेप्रोषितस्याग्निहोत्रिणः। पलाशपत्रवृंतानांषष्ट्या
धिकंशतत्रयं॥ कृत्वाजिनेनराकारंकृत्वावेष्ट्याजिनेनतं। ऊर्णासूत्रेणबध्वैवयववपिष्टैः प्रलेपयेत्। निर्दिश
देवदत्तोयंनाम्नेत्याहाश्वलायनः। अकाजेनदहेकृत्वाम्हिग्धंसंचयार्थतः। देशांतरप्रमीतस्यसाग्निकस्यद्विजन्म
नः। यदाप्रतिकृतेर्दाहस्तद्दहस्तक्रियामता॥ तदहश्चेत्प्रदृष्येतकेनचित्सूतकादिना॥ सूतकानंतरंकुर्यात्पुनस्तद्द
हरेवतत्॥ अथपर्णनरेदग्धेपात्राणापासेकृतेसति। गतेषण्मिषुतद्देहाद्यदिचेल्लभ्यतेक्वचित्। तदार्द्रदग्धकाष्ठानि
त्तानिनिर्मथ्यतंदहेत्। यद्यार्द्रदग्धकाष्ठंतुतदीयंचेन्नलभ्यते॥ तदातदस्थिखंडंचप्रक्षेप्तव्यंमहाजले। प्रेताकारंत

तः कुर्यादस्थिपातादिविवर्जितं ॥ अपेतइतिजप्त्वा वै दहेत्तविधिपूर्वकं ॥ नराकारेविभागोत्रदत्तानांप्रतिपद्यते । निगमे
पत्रपार्श्वे च दृष्टः संस्कारकर्मणि । चत्वारिंशच्छिरःस्थाने ग्रीवायां च दशैव तु ॥ उरःस्थाने शतं दद्यात् षष्टिश्च जठरो
दरे ॥ बाह्वोः स्थाने शतं दद्यात्त्रिंशतं जानुजंघयोः । दद्याच्चत्वारिंशिश्नेत्वष्टदद्याद्वृषणद्वये । पादांगुलीषु दशकल्प
येदस्थिसंग्रहं ॥ संचयः पितृमेधश्च स्मृतस्तत्र्यापिपाक्षिकः । पलाशवृन्तैर्दहेत्तैर्दहिस्यादस्थ्यालाभेग्निहोत्रिणः । दर्भैरना
हिताग्नेः स्यादितरस्येतिसंग्रहणः । कात्यायनः । विदेशमरणेस्थीन्याहृत्याभ्यज्य सर्पिषा ॥ दाहयेदूर्णयाच्छाद्य पात्र
न्यासादिपूर्ववत् । अस्थ्नामलाभेपर्णानि शकलान्युक्तयावृता ॥ दाहयेदस्थिसंख्यानि ततःप्रभृतिसूतकं ॥ अनये
वावृत्तानारी दग्धव्याद्याव्यवस्थिता ॥ व्यवस्थिता अव्यभिचारिणी । अग्निप्रदानमंत्रोस्यानप्रयोज्यइतिस्थितिः । अग्निनैवदहे
ज्ज्ञायांस्वतंत्रांपतितांनचेत् । तदुत्तरेणपात्राणिदाहयेत्पृथगंतिके ॥ आश्वलायनगृह्यपरिशिष्टे । अस्थिनाशेपलाशवृं
तानांत्रीणिषष्टिशतानि पुरुषप्रतिनिधिं कृत्वा अशीत्यर्द्धं शिरसि ग्रीवायां दश योजयेत् ॥ उरसि त्रिंशतं दद्याद्विंशतिं
जठरे न्यसेत् ॥ बाहुभ्यां तु शतं दद्याद्दद्यादंगुलिभिर्दश ॥ अंगुलीषु दशोत्सर्थः स्तु द्यास्पयात् ॥ द्वादशार्द्धं वृषणयोर्दद्या

द्वे शिश्नरवत्तु॥ ऊरुभ्यांतुशतंदद्यात्त्रिंशतंजानुजंघयोः।पादांगुलीषुदशधारयेत्तत्रैतेषुलक्षणं॥ ऊर्णासूत्रेणसंवेष्ट्य
यवपिष्टेनलेपयेत्॥ संस्कृत्यविधिनाग्निभिर्दग्धारांततोहरेत्॥ अत्रदृतंपद्मपत्रपरं॥ ब्रह्मपुराणोक्तंरोगपरिक्लिष्टयो
र्त्याद्दर्शनात्॥ पक्षांतरंवेदं॥ ब्रह्मपुराणे॥ आहिताग्नोस्तुदंपत्योस्तुदंपत्योर्यस्त्वादौम्रियतेध्रुवंवि॥ तस्यदेहःस
पिंडैस्तुदग्धव्यस्त्रिभिरग्निभिः॥ पश्चान्मृतस्यदेहस्तुदग्धव्योलौकिकाग्निना॥ अनाहिताग्नेर्देहस्तुदाह्योगृह्याग्नि
नाद्विजैः। तदभावेपलाशोत्थैः पत्रैःकार्यःपुमानपि॥ अनाहिताग्नेरितिश्रौताग्निरहितस्य॥ शतैस्त्रिभिस्तथाषष्ट्याश
रत्नातैर्विधानतः॥ वेष्टितव्यस्तथायत्नात्कृष्णसारस्यचर्मणा॥ ऊर्णासूत्रेणवध्वात्तुप्रलेपस्तथायवैः। सुपिष्टैर्ज
लसंमिश्रैर्दग्धव्यस्तथाग्निना॥ असौस्वर्गायलोकायस्वाहेत्युक्त्वाबांधवैः। एवंपर्णनरंदग्ध्वात्रिरात्रमशुचिर्भवेत्
एवंकृतेमृतेभ्रांत्याययद्यागच्छेत्पुमान्कचित्॥ कुर्यादथायुषीलिष्टिंपुनराधायपावकं। निर्णयेविशेषः। प्रोषितमरणे
पतस्यद्वथादग्धदेशांतरमृतस्याशौचांतेप्रायश्चित्तार्थंविष्णुबलिंकृत्वैकादशाहादिकुर्यात्॥ नप्रकृतिदाहमेवप्रा
प्ताग्निसंस्कारस्यनपुनर्दाहःस्मर्यते। तथाचप्रेतप्रदीपेसकृद्दग्धशरीरस्यपुनर्दाहोनविद्यतेजातूकर्ण्यः॥ इतिसं

देव· १२ स्कारविधिः॥ अथोदकदानं॥ तत्रवैजवापः॥ प्रेतमरणंपंगत्वायथोक्तमग्निंगमयित्वानवेक्षमाणा आयांत्येकवाससो
।रतीभूताः कनिष्ठपूर्वायमगाथांगायंतोयमसूक्तंच जपंतो हरहर्नयमानोगामश्वंपुरुषंपशुंवैवस्वतोन तृप्यतिसुर
याइवदुर्मतिरित्युदकांतंगत्वासकृदुन्मज्ज्यास्वप्रसव्यस्यपाणेः कनिष्ठिकया अवलिखंतिकनिष्ठंपापमितितस्मिन्ने
कमुदकांजलिंप्रेतायदद्युः अमुष्मैस्वधेतिसव्यांगुष्ठेनाकंकतरूपेणविलिखेत्संवलिखंतपापमिति अयमर्थः॥
अरण्यंश्मशानं अनवेक्षमाणाः श्मशानं॥ अरतीभूताउद्विग्नाः। रीताभूताइतिक्वचित्पाठः॥ तत्ररातीभूताः पंक्तिभूता
इत्यर्थः। कनिष्ठपूर्वाः। कनिष्ठानन्नेहत्वाः दुर्मतिर्मद्यमः। कनिष्ठंपापमितिमंत्रेणस्थलेरेखांकुर्वंतितत्ररेखायामुदक
दानं। सव्यांगमवलिखंतिकंकतरूपेणप्रसारितांगुलिना अवलेखनं॥ अवलेखनंद्रूपनं॥ तत्रमंत्रोत्रोवलिखंत
पापमिति॥ पारस्करः॥ संयुक्तंमैथुनंवोदकंयाचेरन्नुदकंकरिष्यामहइतिकुरुध्वंमाचैवंपुनरित्यशतवर्षेप्रेतेकुरुध्व
मेवेतरस्मिनसर्वेज्ञातयोप्यवयंत्वासप्तमात्पुरुषाद्दशमाद्वासमानग्रामवा॥ सेयावत्संबंधमनुस्मरेयुरेकवस्त्राः
प्राचीनावीतिनः सव्यस्यानामिकयापापनोद्यापनः। शोशुचदघमितिदक्षिणामुखानिमज्जंतिप्रेतायोदकं सकृत्प्रसि राम· १२

चंतंजलिनासावेतन्नउदकमिति। अस्यार्थः। संयुक्तं विद्यासंयुक्तं उत्तरदानाभिज्ञं॥ मैथुनं स्त्रीपुरुषयुग्मं तत्संबंधिनं श्या
लकं। मैथुनं श्यालकमिति कर्कः। कुरुह्वमित्याह्वियावितस्योत्तरं। यावत्संबंधमनुस्मरेयुरिति यावतिस्वयंशजत्वं नाम
चज्ञायते तावतिप्रतीभूते निमज्जंति स्नांति॥ असप्तमादिकं तु संबंधज्ञानोपयोगितयोक्तं। सप्तानामिकयेति वाम
हस्तानामिकया। अपनोघेत्यत्रोदकमित्यनुषंगः। अपनः। शोशुचदित्ति स्नानमंत्रः। सचस्त्रीभिर्न पठनीयः। अ
मंत्रा हि स्त्रियो माता इति बौद्धायनवाक्यात्॥ विष्णुः। निर्हृत्य बांधवं प्रेतं संस्कृत्या प्रदक्षिणेन चितामभिगम्याप्सु स
वाससो निमज्जनं कुर्युः। प्रेतस्योदकनिर्वपणं कृत्वा एकं च पिंडं कुशेषु दद्युः॥ वशिष्ठः। शरीरमग्निना संयोज्या
नवेक्षमाणा अपोभ्यवयंति सव्योत्तराभ्यां पाणिभ्यां मुदकक्रियां कुर्वतीः युग्मा दक्षिणामुखाः पितॄणां वा एषा दि
क्यादक्षिणा॥ शंखलिखितौ॥ अथोदकक्रियाप्रेतस्य बांधवा यथावृद्धमुदकमवतीर्य नोद्घर्षयेरन् सकृत्प्रा
ग्दक्षिणामुखाः राजन्यवैश्यावप्यपसव्येन वासो यज्ञोपवीते कृत्वा सवैतन्न इति॥ नोद्घर्षयेन् अंगमिति शेषः। प्रा
ग्दक्षिणामुखा आग्नेय्यभिमुखाः। अपसव्ये वासो यज्ञोपवीते कृत्वेत्यनेन क्षत्रियवैश्या यारुत्तरीयवासो दर्शयति॥

13

ब्राह्मणानामेकवस्त्रत्वस्य पारस्कारेणोक्तत्वात्॥ हारीतः। निष्क्रम्य संस्कृत्यायोगत्वाद्ग्रामात्सौ त्वप्पत्वामित्युदकांजलिं नि
वपंति॥ आश्वलायनगृह्यं॥ सव्याहृत्तयोव्रजंत्यनवेक्षमाणाय त्रोदकमवहृद्भवति। तत्राप्यसकृदुन्मज्य एकांज
लिमुत्सृज्य तस्य नामगोत्रे गृहीत्वोत्तीर्याम्यानि परिधाय सकृदेव निपीड्योदग्धृशानि विसृज्यासत आनक्षत्राणां द
र्शनाद्यादित्ये दृश्यमाने प्रविशेयुर्ब्राह्मणानुमत्या वा॥ ॥ पैठीनसिः॥ स्नानविधिर्मृतं मनसा ध्यायन् दक्षिणामु
खस्त्रीनुदकांजलीन्निर्वपेत्॥ शावप्रभृत्येकादशाहे विरमेत्॥ शावप्रभृति मरणदिनादारभ्येत्यर्थः। एकादशाहे आशौ
चांतदिने॥ स्मृतिमंजर्यां॥ प्रेतं मनसा ध्यायंस्त्रीनुदकांजलीन्निनयेद्वा यप्रत्यहं दशाहाद्विरमेत्॥ तत्र मुक्तशिखाः
सर्वे यावत्संबंधसंस्मृति॥ स्नात्वा सचैलमावध्य शिखामाचम्य वाग्यताः। स्थलेतस्योदकं दद्युर्नामगोत्रेण वाश्मनि॥ ४
ब्रह्मपुराणे॥ आदौ वस्त्रं च प्रक्षाल्य तेनैवाच्छादितैस्ततः। कर्तव्यं तैः सचैलं तु स्नानं सर्वमलापहं॥ ततः पाषाणपृष्ठे तु
सर्वैर्देयं तिलोदकं॥ एकैकेन देयास्तु विप्रायांजलयो दश॥ राज्ञे द्वादश देयास्तु वैश्याय दश पंच च॥ त्रिंशच्छूद्राय
देयास्तु प्रेतभूमिगताय च॥ अपसव्यं ततः कृत्वा वस्त्रयज्ञोपवीतकैः। दक्षिणामुखैर्विप्रैर्देयं तस्यांजलित्रयं। वामांगु

छत्रवाहेणभूमावेवावपेत्कचित्॥ अमुकोमुकगोत्रस्स्कप्रेतात्स्प्याविंदंपठन्॥ तेनैवाच्छादितैरिति तेनैवप्रक्षालितवस्त्रेण
च्छादितैः स्नानकर्तृभिरित्यर्थः। एवंचगात्रस्थंवस्त्रप्रक्षाल्यतदेवपरिधायस्नातव्यंसचैलमिति। यावच्चैलंदेहेविद्यते
तावद्भिःसहस्नातव्यमितिविवक्षितं॥ क्वचिद्देशविशेष। एकेनपुरुषेणविप्रायदशांजलयोदेयाः। अन्येत्वेवमाहुः
विप्रांजलयोदशेति प्रतिदिनमेकैकंक्रमेणदशभिर्दिनैर्दशांजलयोदेयाः॥ एवमेवक्षत्रियादीनामपि॥ ॥
बौधायनः॥ मरणेतुयथाकालंकृत्वाप्रयज्ञोपवीतान्यपसव्यानिकृत्वातीर्थमवतीर्यसकृन्निमज्योन्मज्यततःप्रेता
र्थमुदकमुत्सृज्यातएवोत्तीर्याचमंति॥ अतस्तीर्थात्॥ प्रचेताः। दक्षिणाभिमुखोब्राह्मणस्यउदङ्मुखः प्राङ्मुखोरा
जन्यवैश्ययोःत्रिः प्रत्येकंकुर्युः प्रेतस्त्वप्यत्विति॥ हारीतः॥ निःक्रम्यात्वाप्योगत्वा असौतृप्यतामितुदकांजलिं
निनयंति॥ शंखलिखितौ॥ उदकक्रियाकामश्च्छ्वशुरमातुलयो॥ शिष्येसहाध्यायिनिराजनिच॥ अत्रकाममिति
अभिधानात्फलार्थं॥ तेषामुदकार्थमुदकक्रिया॥ नावश्यं॥ ०॥ पारस्करः। आचार्येचैवंमातामहयोः। स्वस्त्रीणां
चाप्रत्तानांकुर्वीरन् त्ताश्चतेषामिति प्राचीनावीतिनाघंगकोदक्रियातिदेशः। याज्ञवल्क्यः। असप्तमाद्दशमाद्वापि ज्ञात

देव
१४ योप्युपयंत्यय:। अपनः शोशुचदघमनेन पितृदिङ्मुखाः सप्तमाद्दशमाद्वाध इति केचित्पाठः॥ तत्र सप्तमात्पुरुषाद्दश
माद्वा अध इति व्याचक्षते॥ अन्ये त्वाहुः। तत्र सप्तमाद्दिवसादधः प्रथमतृतीयसप्तमदिनेषु। मिलिता ज्ञातयो प्युपयंति
स्नानं कुर्वंतीत्यर्थः। ज्ञातयः सपिंडाः समानगोत्राश्च सप्तवा दशवा दिनानि यावद्दक्षिणाभिमुखास्नातुं जलं च प्रेताय स
14 तुमपोप्यवेयु रितिहेमाद्रिः। तत्र स्नानमपन इति मंत्रेण दक्षिणाभिमुखाः कुर्युः दशमाध्ये नवमदिने। प्रथमतृतीय
सप्तमनवमेषूदकक्रियेति गौतमवचनात्॥ वाकारोवधारणे। उदकक्रिया। उदकेन क्रिया स्नानं तर्पणं च। सकृत्प्रसेक
स्त्ववश्यं कर्त्तव्यः त्रिः प्रसेकस्तु प्रकारातिशयार्थ इति नानामुनिवचनेष्वविरोधः॥ तथा॥ कामोदकं सखिप्रत्तास्वस्रीय
श्वशुरर्त्विजां। सकृत्प्रसिंचंत्युदकं नामगोत्रेण वाग्यताः। प्रत्ता विवाहिता। कामोदकमिच्छोदकं॥ अप्रकरणे प्रत्यवायाभावो
प्यत एवेति॥ ॥ आपस्तंबः॥ मातुश्चायोनिसंबंधेभ्यः पितुश्चासप्तमपुरुषात्॥ यावतां वा संबंधो ज्ञायते तेषां प्रेतेषूपद गम०
कोपस्पर्शनं। गर्भान्परिहाप्यापरिवत्सरात् मातापितरावेव तेषु हर्त्तारश्चैव। भार्यापरमगुरुसंस्थायां वा कालमभोजनमा १४
तुरव्यंजनानि कुर्वीरन् केशान्प्रकीर्य पांसुनाध्येकवाससो दक्षिणामुखाः सकृदुपमज्ज्योत्तीर्योपविशंसेवं त्रिरस्तमयप

मुदकमुपसिच्याप्रतीक्ष्यप्यामसेत्यपस्त्रियआचक्षीरंस्तत्कुर्वीरन्नूइतरेषुचौरादेवैक उपदिशंति॥ अयमर्थः। मातृयोनिसंबंधा
मातुलमातृष्वसृप्रभृतयः। यदेतदुदकोपस्पर्शनमुक्तं॥ तद्गर्भत्वंवर्जयित्वा॥ अपरिवत्सरानितिगर्भानितस्यविशेषणं
तत्रमातापितरावेवस्नातस्तेषुगर्भेषुमृतेषुदत्तरिश्चैवस्नानंकुर्वीरन्नू॥ परमगुरवः। मातापितरावाचार्यश्चसंस्थामरणं
। आकालं। यत्रकालेमरणंभूतंतत्कालपर्यंतमित्यर्थः॥ आतुरव्यंजनानिदुःखितव्यंजनानि॥ यास्त्रियआचक्षीरं
न्नितियास्त्रियउपदिशंतितत्कुर्वीरन्नूसमाचारात्॥ इतिरेष्टित्वादि॥ यदेतदाकालमभोजनादिकमुक्तं। तद्भार्यापरमे
गुरुव्यतिरिक्तेष्वपिसपिंडेषुकार्यमित्येकेआहुः॥ ॥ बौधायनः॥ पिंडेषुसप्तमाद्दाहंतजननाद्धुदकोपस्पर्शनं
प्रेतानांत्रिवर्षेविधीयते॥ आदंतजननाद्वापिनादंतानस्यकारयेत्॥ अप्रत्तास्तुचकन्यास्तुप्रत्तास्त्वेकेहकुर्वते॥ ॥
विष्णुः॥ यावदाशौचंतावत्प्रेतस्योदकंपिंडंचदद्युरिति॥ प्रचेताः॥ दिनेदिनेजलीन्पूर्णान्प्रदद्यात्प्रेतकारणात्
तावद्वृद्धिश्चकर्तव्यायावत्पिंडः समाप्यते॥ तथाचमपिविशेषस्तेनैवोक्तः। नदीकूलंततोगत्वाकृत्वाशौचंयथार्थवत्
वस्त्रंसंशोधयेद्दाहौततः स्नानंसमाचरेत्॥ सचैलस्तततःस्नात्वाशुचिःप्रयतमानसः। पाषाणंततआधायवि

प्रेतद्याद्दशांजलीन्॥ द्वादशक्षत्रियेदद्याद्वैश्येपंचदशस्मृताः॥ त्रिंशच्छूद्रायदातव्यास्ततःसंप्रविशेद्गृहं॥ ततःस्ना
नपुनः कार्यंगृहेशौचंचकारयेत् कात्यायनः॥ अथानपेक्षमेत्यापः सर्वएवशवस्पृशः। स्नात्वासचैलमाचम्यदद्युर
स्योदकंस्थले॥ गोत्रनामपदांतेचतर्पयामीत्यहंवदेत्॥ दक्षिणाग्रान्कुशान्कृत्वासतिलंतुपृथक्पृथक्॥ विष्णुपुराणे
सपिंडीकरणंयावदृजुदर्भैः पितृक्रिया॥ वाससांचत्यागः॥ अंतेवंत्यानां॥ अयमर्थः। प्रथमादिष्वहःसूदकदानंस
पिंडैः कार्यं। नप्रतिदिनं। पुत्रेणतुप्रतिदिनंनियमेनकार्यं। वाससांत्यागः। पूर्वंउदककियाकालेधृतानांवस्त्राणां।
त्यागः परिवर्तनमात्रं॥ प्रक्षालनायचतुरजकस्यदानं॥ सूतकेपांसदिनेएवांत्यानां शूद्राणां॥ मार्कंडेयपुराणविष्णुपुराण
योः। प्रथमेह्नितृतीयेचसप्तमेनवमेतथा॥ वस्त्रत्यागंबहिःस्नानंकृत्वादद्यात्तिलोदकं॥ संवर्तः। प्रेतस्यतुजलंदेयं
दग्ध्वातद्गोत्रजैर्बहिः॥ प्रथमेह्निचतुर्थेचपंचमेनवमेतथा॥ मरीचिः। प्रथमेह्नितृतीयेचसप्तमेनवमेतथा। ज्ञा
तिभिःसहभोक्तव्यमेतत्प्रेतेषुदुर्लभं॥ हारीतः॥ त्रिपंचसप्तरात्रेषुस्नायीरन्नवमेहनि॥ वासांसिशौचायदद्युः॥ बृ
हस्पतिः। प्रथमेह्नितृतीयेचसप्तमेनवमेपिवा। नवमेवाससांत्यागोनखलोम्नांतदंतिके॥ आशौचांतदिने॥ मार्कंडेयपु

णो॥ तैलाभ्यंगोवांधवानामंगसंवाहनंचयत्॥ तेनचाप्यायतेजंतुयच्चाश्नातिस्ववांधवाः॥ एतच्चतैलाभ्यंजनादि
चतुर्थदिनादूर्ध्वं॥ ततः प्राग्निषेधात्॥ महाभारते। तिलान्दत्तपानीयंदीपंददत्तजागृह॥ ज्ञातिभिःसह मोदध्वमेतत्प्रे
तेषुदुर्लभं॥ जागरणंचयथाशक्तियावदाशौचं निगमः॥ संध्यायांवातथारात्रौदाहःपाथेयकर्मच॥ नवश्राद्धं
चनोकुर्यात्कृतंनिःफलतांव्रजेत्॥ रात्रौवारात्रिशेषेवाम्रियंतेयेद्विजातयः॥ दाहंकृत्वायथान्यायंद्वौपिंडौनिर्वपे
त्सुतः॥ रात्रिमृतस्यतुरात्रावेवदाहः कार्यः॥ वपनंचप्रातःकुर्यात्॥ तदुक्तंस्मृतिसंग्रहे॥ रात्रौदग्ध्वातुपिंडांतंकृत्वावप
नवर्जितं। वपनंनेष्यतेरात्रौश्वस्तनीवपनक्रियेति। निगमवचनंतुदिनमृतस्यालस्यादिनारात्रौदाहोनकार्य इत्येवंपरं।
वपनंचगुरुमरणेमृतदिनेद्वितीयेपंचमेसप्तमे॥ तृतीयेवाकुर्यात्॥ स्नातकांतेचस्नातकनिवृत्त्यर्थंपुनः कुर्यात्॥ त
दुक्तं।द्वितीयेहनिकर्तव्यंक्षुरकर्मप्रयत्नतः। तृतीयेपंचमेवापिसप्तमेवाप्रदानतः॥ सर्वत्रसर्वत्रासंभवेएतेविक
ल्पाः॥ आपस्तंवः॥ अनुभाविनांचपरिवपनमिति॥ अनुभाविनःकनिष्ठाः॥ पुत्रभ्रात्रादयः तुः एवानुभाविनश्च
पुत्राएवेत्यपरे॥ व्यासः॥ पुत्रःपत्नीचवपनंकुर्यादंतेयथाविधि॥ पिंडदानोचितोन्योपिकुर्यादित्यंसमाहिताः

हेवं
१६

अंतेदशमहिने॥ आदित्यश्रराणो॥ यथापोधसहस्रेणवृतोराजानुगच्छति॥ तद्वत्तिलसमायुक्तं जलंप्रेतेषुगच्छति
इत्युदकदानं॥ अथोदकदाननिषेधः॥ नब्रह्मचारिणः कुर्युरुदकं पतितास्तथा॥ आदेष्टीनोदकंकुर्यादाव्रतस्य
समापनात्॥ समाप्तेतूदकंकृत्वात्रिरात्रमशुचिर्भवेत्॥ आदेष्टीब्रह्मचारीतिकेचित्॥ प्रक्रांतप्रायश्चित्तइत्यपरे
कुंडमनुः॥ स्त्रीवाघानोदकंकुर्युस्तेनाज्ञात्माविधर्मिणः॥ गर्भभर्तृद्रुहश्चैवसुरापश्चैवयोषितः॥ एवमुदकदा
नेकर्तृविशेषप्रतिषेधमुक्त्वासंप्रदानविशेषेप्रतिषेधमाह॥ पाषंडमनाश्रितास्तेनाभर्तृघ्न्यः कामगादिकाः॥ सुरा
प आत्मघातिन्योनाशौचोदकभाजनाः॥ तथामृत्युविशेषादपिआशौचादिनिषेधः॥ चांडालादुदकात्सर्पाद्ब्राह्म
णाद्वैद्युतादपि॥ दंष्ट्रिभ्यश्चपशुभ्यश्चमरणंपापकर्मिणां॥ उदकंपिंडदानंचप्रेतेभ्योयत्प्रदीयते॥ नोपतिष्ठतित
त्सर्वमंतरिक्षेविनश्यति॥ नाशौचंनोदकंनाश्रुनदाहाद्यंतकर्मच॥ ब्रह्मदंडहतानांचनकुर्यात्कटधारणमिति
ब्रह्मदंडहताब्राह्मणाहताः॥ कृत्वाग्निमुदकंस्नानंस्पर्शनंवहनंकथां॥ रज्जुच्छेदाश्रुपातंचतप्तकृच्छ्रेणविशुध्यति राम०
महापातकसंयुक्तोदैवात्स्यादग्निमान्यदि॥ पुत्रादिः पालयेदग्नीन्युक्तआदोषसंक्षयात्॥ होमेष्टिकरणादिना १६

नारक्षेत्॥ उक्तोनियुक्तः। प्रायश्चित्तंनकुर्याद्यः कुर्वत्वा मृयतेयदि॥ गृह्यंनिर्वापयेच्छ्रौतमप्स्वस्येत्सपरिच्छदं।
स्मृत्तंच। प्रक्षिपेदप्सुवैतानमावसथ्यंचतुष्पथे। पात्राणिचदहेदग्नौ यजमानेवृथामृते। सादयेदुभयंवाप्स्वग्नौ
न्निरभवद्यतः। पात्राणिदग्धाहिप्रायदहेदप्स्वेववाक्षिपेत्॥ दुर्मरणेतुस्मृतावुक्तं॥ वैतानंप्रक्षिपेत्तोयेगृह्याग्निंच
चतुष्पथे॥ पात्राणिसंदहेदग्नौयजमानेवृथामृते। साग्निकेपापकर्मणीतिचतुर्थः। पादः क्वचित्॥ अयंचदाहा
दिप्रतिषेधोनुष्ठानासमर्थज्ञानवानप्रस्थादिव्यतिरिक्तविषयस्तेषामभ्यनुज्ञादर्शनात्। दुश्चिकित्स्यैर्महारोगैः
पीडितस्तुपुमानपि। प्रविशेज्ज्वलनंदीप्तंकरोत्यनशनंतथा॥ अगाधंतोयराशिंवाभृगोः पतनमेववा॥ गच्छेन्महापथंवा
पितुषारगिरिमादरात्॥ प्रयागवटशाखाग्राद्देहत्यागंकरोतिवा। स्वयंदेहविनाशेतुकालेप्राप्तेमहामति। उत्त
मान्प्राप्नुयाल्लोकान्नात्मघातीभवेत्क्वचित्॥ आशौचंचत्र्यहंतेषांवज्रानलहतेतथा॥ वृद्धः शौचस्मृतेर्लुप्तः प्रत्या
ख्यातभिषक्क्रियः। आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः॥ तस्यत्रिरात्रमाशौचंद्वितीयेत्वस्थिसंचयः। तृतीयेतू
दकंकृत्वाचतुर्थेश्राद्धमाचरेदितिस्मरणात्॥ तथा॥ अथकश्चित्प्रमादेनम्रियेताग्न्युदकादिभिः। तस्याशौचंविधातव्यं

देव कर्त्तव्याचोदकक्रिया॥ गरुडपुराणे॥ जलांजलौकृतेपश्चाद्विधायदंतधावनं॥ त्यजंतिगोत्रिणः सर्वेदिनानितवका
१७ श्यप॥ इत्युदकदानं॥ अथशोकापनोदः॥ तत्रयाज्ञवल्क्यः॥ कृतोदकान्समुत्तीर्णान्मृदुशाद्वलसंस्थितान्
स्नातोनपवदेयुस्तानितिहासैःपुरातनैः॥ मानुष्येकदलीस्तंभनिःसारेसारमार्गणं॥ करोतियः ससंमूढोजलबुद्बुद
संनिभे। माशोकंकुरुतानित्येसर्वस्मिन्प्राणधर्मिणि॥ धर्मंकुरुत्वयत्नेनयोवः सहगमिष्यति। सर्वेक्षयांतानिच
याः पतनांताः समुच्छ्रयाः। संयोगाविप्रयोगांतामरणांतंहिजीवितं॥ पंचधासंभृतः कायोयदिपंचत्वमागतः। कर्मभिः
स्वशरीरोत्थैस्तत्रकापरिवेदना॥ गंत्रीवसुमतीनाशमुदधिर्दैवतानिच। फेनप्रख्यः कथंनाशंमर्त्यलोकेनयास्यति।
श्लेष्माश्रुबांधवैर्मुक्तंप्रेतोभुंक्तेयतोवशः। अतोनरोदितव्यंहिक्रियाःकार्याःस्वशक्तितः। इतिसंश्रुत्यगच्छेद्गृ
हंबालपुरःसराः॥ एवमस्मिन्निरालंबकालेसततयायिनि॥ नतद्रूपंप्रपश्यामिस्थितिर्यस्यभवेद्ध्रुवा। गंगायाः
सिकताधारास्तथावर्षतिवासवे॥ शक्यागणयितुंलोकेनव्यतीताःपितामहाः॥ चतुर्दशविनश्यंतिकल्पेकल्पेसु राम०
रेश्वराः। सर्वलोकप्रधानाश्चमनवश्चचतुर्दश॥ बहूनीन्द्रसहस्राणिदैत्येंद्रनियुतानिच। विनष्टानीहकालेन १७

मानुषस्य तु का कथा। राजर्षयश्च बहवः सर्वे समुदिता गुणैः। देवर्षयश्च कालेन सर्वे ते निधनं गताः। ये सर्वथा जगत्त्रान
सृष्टिसंहारकारिणः। ते ऽपि कालेन लीयंते कालो हि बलवत्तरः। आक्रम्य सर्वः कालेन परलोकाय नीयते। कर्मप
थ्यो हनो जंतुस्तत्र का परिदेवना॥ जातस्य हि ध्रुवो मृत्युर्ध्रुवं जन्म मृतस्य च॥ अर्थेहुः परिहार्येस्मिन्नास्ति शो
के सहायिता। शोचंतो नोपकुर्वंति मृतस्येह जना यतः। अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः। सुकृतं
दुःकृतं यस्य सहायो यस्य गच्छतः। बांधवैस्तस्य किं कार्यं शोचद्भिरथवा तथा॥ बांधवैर्नाम शोचद्भिः स्थितं प्रेतो न विं
दति। आक्रंदा अश्रुपाताश्च मृतस्यानुपकारकाः। एवं विदित्वा मतिमान्कश्मलं परिवर्जयेत्॥ नाक्रंदितं भवेत्
श्लाघ्यं तथा शोके कदाचन। क्रियाभिः कुरुते साह्यं नास्ति शोके सहायता॥ तस्मात्सपिंडैः सकुल्यैश्च सुहृत्संबं
धवांधवैः। मृतस्य सलिलं देयमुपकाराय तस्य तत्॥ श्रीरामायणे शोचमानाश्च सस्नेहा बांधवाः सुहृदस्तथा
पातयंति गतं स्वर्गमश्रुपातेन राघव॥ अकृत्स्नेवैक्षत्रियेधर्मे पुरा परमधार्मिकः। भूरिद्युम्नो गतः स्वर्गं राजा पुण्ये
न कर्मणा। न पुनर्बंधुवर्गस्य शोकबाष्पेण राघव॥ अकृत्स्नेवैक्षत्रियेधर्मे पुनः स्वर्गान्निराकृतः। अपिशोकाग्नि

नाहुषः पितातेस्वर्गतिःप्रभुः॥ शपेवांमनुनाविष्टस्तस्मादुन्निष्टमाष्ठच॥ संयोगोभिमतोयेषांवियोगः कथमःप्रि
यः। संयोगोहिवियोगेनग्रस्तएवाभिजायते॥ श्रीमाहाभारतेआरके॥ किंनुशोचसिमूढस्त्वंशोच्यः किमनुशोच
सि। यदात्मामपिशोचंतः शोच्यायास्यंतितांगतिं॥ अदर्शनादिहायातः पुनश्चादर्शनंगतः।नचाशोवेदततस्त्वंत
मतः।किमनुशोचसि। नायमत्यंतसंवासः कस्यचित्केनचित्सह॥ अपिस्वेनसहस्वेनकिमुतान्यैः पृथग्जनैः। अव्य
क्तादीनिभूतानिव्यक्तमध्यानिभारत॥ अव्यक्तनिधनान्येवतत्रकापरिदेवना॥ देहिनोस्मिन्यथादेहेकौमारंयौव
नंजरा॥ तथादेहांतरप्राप्तिर्धीरस्तत्रमुह्यति॥ यथाकाष्टंचकाष्टंचसमेयातांमहोदधौ॥समेत्यचव्यपेयातांतद्व
द्भूतसमागमं॥ इतिशोकापनोदः॥ अथप्रवेशनादि॥ तत्रयाज्ञवल्क्यः॥ इतिसंचिंत्यगच्छेयुर्गृहंलघुपुरःस
राः।विदश्यनिंबपत्राणिदशनैर्द्वारिवेश्मनः॥ आचम्याग्निसलिलादिगोमयंगौरसर्षपान्। प्रविशेयुः समाल
भ्यकृत्वाश्मनिपदंशनैः। प्रवेशनादिकंकर्मप्रेतसंस्पर्शिनामपि॥ प्रचेताः।उत्तीर्यप्रेतसंस्पृष्टान्यन्यवासांसिप
रिधायेतराणिगृहद्वारेतस्मैप्रेतायपिंडंदत्वापश्चाद्दूर्वाप्रवालगोमयमग्निंवृषभंवालभ्यप्रविशंतोघृतगौरसर्षपे

मूर्द्धनि मंगानि चालभेरन्नशास्त्रपाणायोयथोक्तकालनियमाः प्रेतावश्यका॥ न्तुभयकालकुर्युः भूमौमाल्यं पिंडैपानी
यमुपलेवाहघः। तत्कालमनध्यायोगोत्रतः। पर्युपासनं। उभयकालमिति। पूर्वाह्णे पिंडदानं। रात्रौ आकाशेपयस
उदकस्यचदानं। सपिंडानामेकरात्रेसहावस्थानमित्यर्थः॥ ॥हारीतः॥ अमुकनीयांसंज्ञे ष्टप्रथमाः प्रत्यायंति। न
प्रेतस्पर्शिनोग्रामंप्रविशेयुराक्षन क्षत्रदर्शनाद्ब्राह्मणानुमत्यावाक्वाहर्यपिसपाणयोधः शायिनोधउपवेशिनए
कंपिंडमुकांजलिंचनिरस्येत्तत्रप्रतिहिनमितिशेषः॥ वैजवापः॥ शमीमालभंतेशमीशमयविति॥ अश्मानमाल
भंतेअश्मेवस्थिरोभूयासं। अग्निर्नः। शर्मयक्षाविति अग्निं। ज्योगित्यंतरागामजंवास्टशांति। क्रीत्वालब्ध्वावान्यगृहादे
कान्नमलवणमेकोरात्रंभुंजीरंस्त्रिरात्रंचकर्मोपरमणं॥ अग्निमित्यत्रालभंतइत्यनुषंगः। ज्योत्तिमंत्रप्रतीकं।
अंतरामध्ये। मध्यत्वेव। गृहप्रवेशापेक्षया। एकान्नमेकभक्तं॥ एकंचदहन्नं। चेतिएकान्नं ब्रीहिमयंयवमयंचे
तिहरिहरः। एकांतरात्रिमित्यहोरात्रमित्यर्थः। प्राप्येतिशेषः। तेनगृहं प्राप्यपश्चादुपवासः। कर्त्तुंनशक्यतेतदाक्री
त्वाअन्यगृहाल्लब्ध्वावाअलवणमेकपारहिवाभुंजीरन्नु। प्राप्यगृहानितिकल्पतरौपाठः। अन्येतुएकांतरात्रिमि

त्युपोष्येति शेषः। नैतस्यां रात्रावन्नं पचेयुरिति भोजनसाधनपाकनिषेधादर्थाद्भोजनस्यापि निषेध इत्याहुः। एतच्चा
श्वलायनवाक्ये स्फुटं। त्रिरात्रं कर्मोपरमणमिति अंगसंवाहनतैलाभ्यंगादिभोगहेतुकर्मत्यागः। अवर्जनीयातिरिक्त
कर्मत्वं चात्र त्याज्यत्वेन विवक्षितं॥ पारस्करः॥ प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात्॥ रात्रौ चेदादित्यस्येति
हारीतः॥ प्रेतस्पर्शिनो ग्रामं न प्रविशेयुरानक्षत्रदर्शनात्॥ ब्राह्मणानुवत्या वेति ब्राह्मणानुज्ञावचनाद्वाधिं प्रतीक्षे
दित्यर्थः॥ यदि नक्षत्रादित्योदयप्रतीक्षणे कालविलंबो भवति तदा ब्राह्मणानुमतिं गृहीत्वा प्रवेष्टव्यमिति कश्चित्
अघस्त्वस्तरे आहमनश्नन्त आसीरन् क्रीतोत्पन्नेन वा वर्त्तेरन्॥ अघस्त्वस्तरे दुःखदेन्नेण मयेशायनीये। पारस्करः
उत्तीर्णेनस्तु चौदेशे शाड्वलवत्यपविष्टांस्तत्रैनानपवदेयुरनपेक्षमाणा ग्राममायंति रीतीभूताः कालेष्टकर्णानिवेश
न द्वारे पिचुमंदपत्राणि विदश्याचम्योदकमग्निं गोमयं गौरसर्षपांस्तैलमालभ्याश्मानमाक्रम्य प्रविशंति त्रिरात्रं ब्र
ह्मचारिणोऽधःशायिनो न किंचन कर्म कुर्युर्न प्रकुर्वीरन्॥ क्रीत्वा लब्ध्वा वा दिवान्नमश्नीयुरमांसं प्रेताय पिंडं दत्वा
वनेजनदानप्रत्यवनेजनेषु नामग्राहमिति॥ विष्णुपुराणे॥ प्रविष्टाश्च समं गोभिर्ग्रामं नक्षत्रदर्शने। कृतकर्मत

तः कुर्युर्भूमौस्वस्तरणामिनः॥ कटः। प्रेतः तन्निमित्तमाशौचकर्म अग्निजलस्पर्शादि॥ भूमौस्वस्तरशायिनोभवेयुरित्यर्थः
आश्वलायनः॥ ज्येष्ठपुत्रः स्वराः कनिष्ठजघन्यानिः स्वस्वकनिष्ठपुत्रःस्वराज्येष्ठजघन्या। प्रविशेयुः प्राप्यसद्योग्निम
स्मानंगोमयंमक्षतंतिलमपउपस्पृशंतिनैतस्यांरात्र्यावन्नंपचेयुस्त्रिरात्रमक्षारलवणाशिनः स्युर्द्वादशरात्रंमहा
गुरुषु। अयमर्थः। सद्योगृहं। एतस्यांरात्रौ। अन्नापचनमुपवासपरं। उपवासाशक्तौक्रीतलब्धंतभोजनं। महा
गुरुर्माता पितरावाचार्यश्चेति॥ ब्रह्मांडपुराणे॥ सैंधवंलवणंचैवतथामानससंभवं॥ पवित्रेपरमेह्येतेप्रत्यक्षमपि
नित्यशः॥मानससंभवंलवणविशेषः॥ तथा॥ मुत्पन्नानिपयः सोमोमांसंयच्चानुपस्कृतं॥ अक्षारलवणंचैवप्र
कृत्याहविरुच्यते॥ क्षारवर्जितंयल्लवणंसैंधवादि॥ तदक्षारलवणमित्युच्यते॥ बौधायनः॥ अक्षारलवणा
शिनोदशाहंकटमुपासीरन्मातापित्रोरेवमरणे॥मनुः। अक्षारलवणान्नास्युः निमज्जेयुश्चतेत्र्यहं॥ मांसाशनं
चनोश्नीरन्शयीरंश्च पृथक्क्षितौ॥ याज्ञवल्क्यः॥ क्रीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्पृथक्। पिंडयज्ञावृता
देयंप्रेतायान्नंदिनत्रयंगौतमः॥ गौतमः॥ अधः शय्यासनिनोब्रह्मचारिणः सर्वेनमार्जयेरन्मांसानिनभक्षये

रन्नाप्रदानात्॥ नमार्जयेरन्नित्यंगकेशवस्त्रादीनीतिशेषः। नोद्धतवेषधारिणः स्युरित्यर्थः। तथा॥ मन्त्रमांसानि हि न
भक्षयेयुरप्रदानात्॥ इति श्राद्धे मांसप्रदानपर्यंतमित्यर्थः। बृहस्पतिः। अधःशय्यासनादीनामलिनाभोगवर्जिताः।
अक्षारलवणान्नाः स्युः कीर्तनखाशनास्तथा॥ अधःशय्यासना इत्यनेन खट्वापीठादिनिवृत्तिः। हीनावर्षशून्याः म
लिनाः मलापकर्षणविमुखाः। भोगवर्जिताः। स्रक्चंदनतांबूलगीतनृत्यादिविरताः। अंगिराः। ब्रह्मचर्यं क्षितौ वासः स्ना
नं मांसाशनं च तैः॥ विष्णुपुराणे॥ शय्यासनोपभोगश्च सपिंडानामपीष्यते॥ अस्थिसंचयनादूर्ध्वं संयोगो न तु योषि
षां। सपिंडानामस्थिसंचयनात्पूर्वं नेष्यत इत्यर्थः। तथा॥ दिवा नक्तं भोक्तव्यं ममांसं मनुजर्षभ॥ दिनानि तानि
चेच्छातः कर्तव्यं विप्रभोजनं॥ इच्छातो ज्ञातिब्राह्मणभोजनं नावश्यं। रागपरिप्राप्ते दिवारात्रौ च भोजने काल विधेरप्यसं
भावात्। दिवा भोक्तव्यमित्यस्य रात्रिभोजननिषेधे तात्पर्यं॥ ब्रह्मपुराणे॥ आशौचमध्ये यत्नेन भोजयेच्च स्वगोत्रजान्
मरीचिः। प्रथमेह्नि तृतीये च सप्तमे नवमे तथा॥ ज्ञातिभिः सह भोक्तव्यमेतत्प्रेतेषु दुर्लभम्॥ मार्कंडेयपुराणे॥ तै
लाभ्यंगो बांधवानामंगसंवाहनं च यत्॥ तेन चाप्यायते जंतुर्यच्चाश्नंति स्वबांधवाः। एतत्तैलाभ्यंजनादि चतुर्थदिना

ता। ततः। पाग्निषेधात॥ महाभारते। तिलान्ददतपानीयंदीपंददतजागृत॥ ज्ञातिभिःसहमोदध्वमेतत्प्रेतेषुदुर्लभं॥ गृह्यकारि
कायां। तत्रप्रेतोपकृतयेदशरात्रमखंडितं। कुर्यात्प्रदीपंतैलेनवारिपात्रंचमार्तिकं॥ भोज्याद्भोजनकालेसभक्तमुष्टिंचनि
र्वपेत। नामगोत्रेणसंबुद्ध्याधरित्र्यांपितृयज्ञवत॥ एवंसंबोधिताःसाङ्ग्निर्प्रुवालपुरःसराः॥ पृष्ठतस्तेऽप्यनीक्षंतोरी
तीमृतास्वगृहं॥ शोषयित्वैववासांसिधृतानिस्नानकालतः। परिधायान्यवासांसिनिष्पीड्यैतानिवैसकृत॥ विस
स्पोदग्दशानीयुरित्येवंशौनकोऽब्रवीत॥ गत्वावहिःस्थिताद्वारिवेश्मनस्तेयथालघु। विदश्यनिंबपत्राणित्रीणित्रीण्य
पिवाग्यताः। आचम्यचाग्निमुदकंगोमयंगौरसर्षपान्॥ तैलंगांवृषभंदूर्वांप्रवालादीन्मणीनपि। आलभ्यप्रविशेयुस्ते
गृहंबालपुरःसराः। शनैःकृत्वाश्मनिपदंद्वारिदक्षिणतःस्थिते॥ तस्मिन्नहनिशिक्यादौवाकाशेमृन्मयेजलं॥ प्रा
चीनावीतिनास्थाप्यंप्रेतात्रस्नाहिमंत्रतः॥ पात्रांतरेतथाक्षीरंप्रेतदंपिवमंत्रतः। नपचेयुर्गृहेतस्मिन्नन्नंकेनापिकिं
चन। अयाचिताहृतेनान्यगृहपक्वेनगोत्रजाः। क्रीतान्नेनापिवर्तेरंस्त्रिरात्रंसाग्निकाअपि। लवणक्षारमाषान्नादूष
मांसानिपायसं। वर्जयेदाहृतान्नेषुबालवृद्धातुरैर्विना॥ उपवासोगुरौप्रेतेपत्न्यापुत्रस्यवाभवेत॥ महागुरुस्मृतौतद्व

दक्षारलवणाशनाः। अविकं दशरात्रं स्यां द्यानाध्ययनवर्जिताः। क्रीतलब्धाशनास्तस्मिन्नहती त्वशनो वचः। दशरात्रम
धः शय्यासनास्तेब्रह्मचारिणः॥ परस्परमसंस्पृशा दिवैवलघुभोजिनः। भवेयुर्मलिनादीनाः सर्वभोगविवर्जिताः। अतैर्
जसेषुपात्रेषुपार्णौ वाम्रमयेषु वा॥ पर्णपात्रेषु वाश्नीयुस्त्रिरात्रमेकरात्रतः। स्वाशौचस्य त्रिभागेन यदंगस्पर्शनं स्मृ
तं। वदत्ताकलिधर्मास्तन्मनुनात्र निषेधितं॥ नप्रेतस्पर्शिनोग्रामं प्रविशेयुर्दिवैवतु॥ आदित्यदर्शनात्पूर्वं रात्रौचेद्गृह
नं भवेत॥ ब्राह्मणानुमता वापि प्रविशंति दिवानिशं॥ इतिहारीतवचनाद्विकल्पः प्रतिभात्ययं॥ प्रविशेयो क्रांति
भवेयुर्ध्वकथंचन॥ इतिप्रवेशनादि॥ अथपिंडोदकदानं॥ तत्रयाज्ञवल्क्यः। पिंडयज्ञावृत्तादेयं प्रेतायान्नं दिनत्रयं
जलमेकाहमाकाशेस्थाप्यं क्षीरंचमृन्मये। पिंडपितृयज्ञस्यावृतेतिकर्तव्यतया॥ आकाशेस्थाप्यमितितन भूमौ।
किंतुशिक्यत्रिकाष्टिका। दावित्यर्थः। दिनत्रयमितित्र्यहाशौचपक्षे। एकाहमित्येकाहाशौचपक्षे॥ प्रेतमुद्दिश्यजलं
क्षीरंचपृथक्पृथक्॥ अपक्केमृन्मयपात्रेस्थापयेदित्यर्थः॥ गरुडपुराणे॥ अपक्केमृन्मयेपात्रेदुग्धं दद्याद्दिनत्रयं रा॰म॰
२१

काष्ठत्रयेगुणैर्वद्धं प्रीत्यैरात्रौ वतुष्पथे॥ प्रथमेह्नि द्वितीयेवा तृतीयेवा तथाथवा॥ आकाशस्थः पिबेद्दुग्धं प्रेतो वायुर्वपुर्हरः
दिनत्रयमिति त्र्यहाशौचपक्षे॥ तथा। तत्रैव। पृथक्कुशरावयोर्दद्याद्देकाहं क्षीरमंबु च॥ यतो दिनसंख्याधिक्यमुक्तं॥ म
त्स्यपुराणे॥ प्रेतस्य पिंडदानं तु द्वादशाहं समापयेत्॥ पाथेयं तस्य तत्प्रोक्तं यतः प्रीतिकरं महत्॥ तस्मात्प्रेतपुरं प्रेतो
द्वादशाहेन नीयते॥ गृहं पुत्रकलत्रं च द्वादशाहं स पश्यति॥ तस्मान्निधेयमाकाशे दशरात्रं पयस्तथा। सर्वतापोपशान्त्यर्थं
मध्वश्रमविनाशनं॥ अतो दशरात्रं मृन्मयपात्रगतक्षीरोदकनिधानं प्रेतोद्देशेन कार्यं। याज्ञवल्क्यः। वचनं। त्वेकाहा
शौचविषयमिति मंतव्यं। द्वादशाहपिंडदानं त्वेकादशाहद्वादशाहश्राद्धांगभूपिंडाभ्यासहेत्येके॥ द्वादशाहाशौचपक्षस्याने
ब्रह्मपुराणे॥ एकाहं द्वारदेशे तु जलपात्रं निधाय च॥ क्षीरपात्रं च काष्ठपाश्वेतायेति विनिश्चयः। प्रेतास्मिन् शीतले
तोये स्नाहि दुग्धं ततः पिब॥ इति जल्पंस्त्रिरात्रं तु भक्तमुष्टिं क्षिपेत्तथा॥ पारस्करः। प्रेताय पिंडं दत्वावनेजनदानप्रत्यवनेजने
षु नामग्राहं। मृन्मये तांरात्रिं क्षीरोदके विहायसि निदध्युः प्रेतात्रस्नाहि पिबेदं क्षीरमिति। अंगिराः। श्मशानवासिनो दे
वा शवानाम प्रकीर्तिताः। तेषां यागनिनिमित्ताय प्रेतशुद्धिरुदाहृता॥ यदि तेषामसंशुद्धिः प्रेतशुद्धिश्च कार्हिचित्। कि

पतेयजनंबापितृतस्तेतुसपंतितान्॥ तस्मान्नवंधुभिः शोकः कार्यः कार्योदकक्रिया। ब्रह्मचर्यंक्षितौवासोवर्ज्यंसांसाशनं
चैतैः। भूमौपिंडप्रदानंचकर्षूंकृत्वाविधानतः। गंधमाल्यैः समभ्यर्च्यततोभोजनमिष्यते। कर्षूःशद्बेनचतुरंगुलविस्तारश्चतुरं
गुलनिम्नः प्रादेशदीर्घःस्यात्तउच्यते॥ विष्णुः॥ यावदाशौचंप्रेतस्योदकंपिंडमेकंदद्युः। क्रीतलब्धाः शनाश्चभवेयुर्मां
साशनंचनाश्नीयुरक्षारलवणान्नाश्चस्युः॥ प्रचेताः। गृहद्वारितस्मैप्रेतायपिंडंनिर्वपेयुः॥ भूमौमाल्पंमानीयंचोपलिप्ता
यांदद्युः। यमः। मांसाशनंचनाश्नीयाद्ब्रह्मचारीस्वपेदधः॥ ब्रह्मपुराणे॥ प्रथमेहनियोदद्यात्प्रेतायान्नंसमाहितः। यत्ने
नाहः सुचान्येष्वेव प्रदद्यात्तपि। मृन्मयंभाजमादायनवंम्लानः सुसंयुतः। लकुटंसर्वदोषघ्नंगृहीत्वातोयमानयेत्
।लकुटग्रहणंप्रोक्तंपातरस्यालाभे। तस्मान्नेतुतद्वारेवलकुटग्रहणं॥ तथावर्गोविंदराजलिखितहट्टप्रचेताः। तोयार्थंतु
ततोगच्छेद्गृहीत्वापुरुषंनरः। गृहीतलकुटंपत्रात्सर्वदुष्टनिवारणं॥ चतश्चोत्तरपूर्वस्यामग्निंप्रज्वालयेद्दिशि। तंजुलप्रसृ
तीतत्रप्रक्षाल्यहूपचेत्स्वयं। सपवित्रैस्तिलैर्मिश्रान्। केशकीटविवर्जितान्। द्वारोपांतेगतःक्षिप्त्वास्तुभुद्गांगोरसैस्तिकां
तस्त्यष्टेसंस्तरेदर्भान्याम्याग्रान्देशसंभवान्॥ ततोवनेजनंदद्यात्संस्मरेद्गोत्रनामनी। तिलसर्पिर्मधुक्षीरैः संसिक्तंतम

मेव हि। दद्यात्प्रेताय पिंडं तु दक्षिणाभिमुखः स्थितः। फलमूलगुडक्षीरतिलमिश्रं तु कल्पितं॥ अर्घैः पुष्पैस्तथा धूपैर्दीपैस्तो
येश्च शीतलैः। ऊर्णातंतुमयैः शुद्धैर्वासोभिः पिंडमर्चयेत्॥ प्रयाति यावदाकाशं पिंडाद्बाष्पमयी शिखा। तावत्तत्संमुखस्ति
ष्ठेत्सर्वं तोये क्षिपेत्ततः॥ दिवसे दिवसे पिंडो देय एवं क्रमेण तु। सद्यः शौचे प्रदातव्याः सर्वे पिंडाः सकृत्तथा। अहाशौचे प्रदात
व्यः प्रथमे त्वेक एव हि॥ एकस्तोयांजलिस्त्वेपात्रमेकं दापयेद्द्वितीये द्वौ तृतीये त्रीश्चतुर्थे च तुरस्तथा॥ पंचमे पंच मे षट् षष्ठे
सप्तमे सप्तमे वहि॥ अष्टमेष्टौ च नवमे नव मे दशमे दश॥ येनस्युः पंचपंचाशत्तोयस्यांजलयः क्रमात्॥ तोयपात्राणि ता
वंति संयुक्तानि तिलादिभिः। एकादशेंद्रियवधाः संति वृद्धिवधैः सह॥ सर्वेषामेव भूतानां परलोकसमाक्रमे। प्रेतभाव
गतानां तु रोरवादिषु वर्त्ततां॥ पंचभिः पंचभिः स्वेभिः पात्रैरंजलिभिस्तथा। एकादशैवेंद्रियाणि घ्नर्वंते शास्त्रदर्शनात्॥
ज्ञातुकाशौचतुल्यांस्तु वर्णानां कविदेव हि। देशधर्मानुरस्कृत्य प्रेतपिंडांस्तयंत्सपि। देयस्तु दशमः पिंडो ब्राह्मणानां वै द्वादशे हनि
।वैश्यानां वै पंचदशे देयस्तु दशमस्तथा। शूद्रस्य दशमः पिंडो मासे पूर्णे हि दीयते। तथा शिरस्त्वाद्येन पिंडेन प्रेतस्य क्रि
यते तथा। द्वितीयेन तु कर्णाक्षिनासिकास्तु समासतः। गलांसभुजवक्षांसि तृतीयेन तथा क्रमात्। चतुर्थेन तु पिंडेन। ना

मिलिंगगुह्यानि च॥ ऊरुजंघे तथा पादौ पंचमेन तु सर्वदा॥ सर्वकर्माणि षष्ठेन सप्तमेन तु नाड्यः। दंतलोमान्यष्टमेन वी
र्यं तु नवमेन तु॥ दशमेन तु पूर्णत्वं तृप्तता क्षुद्विपर्ययः। दंतलोमान्यष्टमेन पूर्णत्वं क्षुद्विपर्ययः। जायते नवमे नाथ
दशमेन तथा क्रमात्॥ इति ब्रह्मपुराणे कूर्मपुराणे॥ दशाहं बांधवाः सार्द्धं सर्वे चैवार्द्रवाससः। पिंडं प्रतिदिनं दद्युः
सायं प्रातर्यथाविधि॥ विष्णुः। निर्हृत्य बांधवं प्रेतं संस्कृत्याप्रादक्षिण्येन चितामभिगम्याप्सु सवाससो निमज्जनं कुर्युः
प्रेतस्योदकनिर्वपनं कृत्वा पिंडमेकं कुशेषु दद्युः। मरीचिना पिंडदानं कुशवर्जितमुक्तं। विष्ण्वादिभिश्च कुशेषु पिंडदान
मुक्तं। तत्र व्यवस्था हारीतेनोक्ता॥ अकृतचूडा ये बाला ये च गर्भाद्विनिःसृताः। ये मृताश्चाप्यसंस्कारास्तेभ्यो भूमौ प्रदीयते
भूमाविति कुशास्तरणवर्जनं॥ अत्रैव मरीचिः॥ प्रेतपिंडं बहिर्दद्यान्मंत्रदर्भविवर्जितं॥ प्रागुदीच्यां चरुं कृत्वा स्नातः
सुसमाहितः। अत्र चरुमिति वायसमिति वृत्ते। पुनः पुच्छः। फलमूलैश्च पयसा शाकेन च गुडेन च। तिलमिश्रं तु दर्भेषु
पिंडं दक्षिणतो हरेत्॥ द्वारदेशे प्रदातव्यो देवतायतनेषु वा। तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च। शालिना सक्तुभिर्वापि
शाकैर्वाप्यथ निर्वपेत्॥ तथा। शालिना सक्तुभिर्वापि गुडमूलफलादिभिः॥ अनयोरुत्तरार्द्धसमं। प्रथमेह्नि यद्द्रव्यं तद्दे

वस्याद्दशाहिकं। शालिनेत्यादिचतुर्ण्णामपणामावविषयं भाष्यकृतः।। नस्वधांचप्रयुंजीतप्रेतपिंडेदशाहिके। भावते
तद्यतेपिंडंयस्यदत्तस्यमृत्यके। यस्यनज्ञायतेगोत्रंनाम्नातत्पिंडमाहरेत्।। शातातपः।। आशौचस्यच ह्रासेपि पिंडान्द
द्याद्दशैवतु।। अहाशौचेपारस्करः।। प्रथमेदिवसेदेयास्त्रयः पिंडाः समाहितैः। द्वितीयेचतुरोदद्याद्स्थिसंचयनं
तथा। त्रीस्तुदद्यात्तृतीयेह्निवस्त्रादिक्षालनंतथा। एकोद्दिष्टंचकर्तव्यंश्राद्धकर्मततः परं।। ब्राह्मणेदशपिंडाःस्युः
क्षत्रियेद्वादशस्मृताः। वैश्येपंचदशप्रोक्ताः शूद्रेत्रिंशत्प्रकीर्तिताः। प्रेतेभ्यः सर्ववर्णेभ्यः पिंडान्दद्याद्दशैवहि।।
अपंचप्रेतात्यंतत्टप्तिकामस्य द्वादशाहिपिंडविधिर्देशविशेषेकुलविशेषेवा।। वृहत्प्रचेताः। पिंडः शूद्रायदात
व्योदिनान्यष्टौनवैववा। संपूर्णेचततोमासि पिंडशेषंसमापयेत्।। प्रेतपिंडंप्रकृत्याहशुनःशेषः। द्वारदेशेप्रदा
तव्योदेवतायतनेषुवा।। वृद्धप्रचेताः। द्वारदेशेप्रदातव्योनदेवायतनेक्वचित्।। आदित्यपुराणेचोक्तं।। द्वारदेशे
षुदातव्योनदेवायतनेक्वचित्। अतश्चविहितप्रतिषिद्धत्वाद्देवायतनस्यविकल्पः।। शुचौदेशेनद्यांवाजीर्ण
तोयेप्रवाहयेत्।। व्यासः। पिंडस्तुप्रत्यहंदेयस्तिलदर्भोदकान्वितः। अन्नंक्रीत्वाथलब्ध्वावास्वयमुत्पाद्यवाघृतः

प्रेताय पिंडं दत्वा ततः स्नायाद्दिनात्यये ॥ मृताद्धस्तु समारभ्य सक्तु पिंडस्तथोदकं ॥ दिनानि दश सूर्णानि भूमौ प्रे
ताय धर्मतः ॥ वाराहपुराणे ॥ स्थंडिले प्रेतभागं तु दद्यात्पूर्वाह्न एव हि ॥ कृत्वा तु पिंडसंकल्पं नामगोत्रे रागस्तु दरि
पश्चादग्निं तिगोत्राणि सकुल्यास्त्वेकभोजनाः ॥ न दद्याद्न्यगोत्राय भुंजते यत एकतः ॥ चतुर्णाम पि वर्णानां प्रेतका
र्येषु माधवि ॥ एवं दत्तेन प्रीयंते प्रेतलोकगता नराः ॥ ब्रह्मांडपुराणे ॥ प्रेतीभूतस्य सततं भुवि पिंडं जलं तथा ॥ स
तिलं सकुशं दद्याद्बहिर्जलसमीपतः ॥ ब्रह्मपुराणे ॥ ग्रामाद्बहिस्तु कर्तव्यं जलाशयसमीपतः ॥ पिंडदानं दशाहा
नि प्रेतायारण्यमाश्रिताः ॥ आरण्ये पिंडदानं तु माहान्न क्रियते यदि ॥ तदा रौरवमायाति प्रमीतः प्रथमेहनि ॥
धुंनाम संज्ञं त्वपरे हाहारावं तृतीयके ॥ तामिस्त्रं एवं चतुर्थे तु प्रयाति पिस्तदारुणं ॥ पंचमे वांधतामिस्त्रं षष्ठे घोरं
वसुप्रभं ॥ अमेध्यभूमिसंपूर्णं सप्तमे हनि घातकं ॥ असिपत्रवनं घोरमष्टमे हनि सर्वथा ॥ महारौरवसंज्ञं तु न
वमे याति मानवः ॥ अवीचिरिति विख्यातं दशमे हनि भीषणं ॥ तंडुलैः सक्तुभिः शाकैः फलैर्वाप्यद्भिरपां ततः ॥
देशकालानुसारेण कुर्यात्प्रेतस्य तर्पणं ॥ ॥ शंशपायनः ॥ हंत ते कथयिष्यामि प्रेतदत्तं यथाक्रमं ॥ अकृतो राम॰
२४

दकपिंडानां निष्कृतानरकेस्थितिः। प्रथमेरौरवेयाति द्वितीयेयातिमुद्गरे॥ महारौरवेतृतीयेतामिस्रेतुचतुर्थके। पंचमेह्यं
धतामिस्रेषष्ठेयातिचसंभ्रमे॥ अमेध्यकृमिसंपूर्णेसप्तमेपततिध्रुवं। पुरीषंभक्ष्यतेयत्रपततेतत्रवाष्टमे॥ स्वमांसंभक्ष्यते
यत्रगच्छतेनवमेदिने। कुंभीपाकेचनरकेपततेदशमेदिने॥ तस्मात्सर्वप्रयत्नेनपिंडदद्याद्दशाह्निकं॥ तिलाःक्षीरंतथा
तोयंदीपधूपंतथावलिः। मधुसर्पिःसमायुक्तंपिंडमाद्कर्मनीषिणः। पिंडेतुप्रथमेपादौगुल्फजंघेद्वितीयके। जानु
न्यूरूतृतीयेचगुदलिंगंचतुर्थके॥ उदरंचशिरोंगानिपंचमेसंभवंतिच॥ षष्ठेहृन्मर्मवक्षांसिपिंडेचैवभवंतिहि। स
प्तमेभुजहस्तौतुग्रीवाचैवप्रजापतिः। श्रोत्रंचक्षुर्मुखंनासाजायंतेवाष्टमेदिने॥ नवमेचैवरोमाणिभवेद्वीर्यंततः
क्रमात्। एवंदशाहान्नादानैरुत्तमोदेभवेद्ध्रुवः। श्लोकगौणेनलन्यथाक्रमउक्तः॥ तथाच। प्रथमेहनियःपिंडस्तेन
मूर्द्धाप्रजायते॥ चक्षुःश्रोत्रंनासिकाचद्वितीयेहनिजायते॥ भुजौवक्षस्तथाग्रीवातृतीयेहनिजायते। नाभिःकुक्षि
गुदौलिंगंचतुर्थेनात्रसंशयः। ऊरूतुपंचमेज्ञेयौषष्ठेरोमाणिनिर्द्दिशेत्॥ सप्तमेतुशिराःसर्वाजायंतेनात्रसंशयः
अष्टमेनतुपिंडेनजायतेचरणद्वयं॥ नवमेवीर्यसंपत्तिर्द्दशमेक्षुत्परिक्षयः॥ पैठीनसिः। शालिनासक्तुभिर्वापि

पिण्याकैर्वापि निर्वपेत्॥ प्रथमेहनि यद्द्रव्यं तद्देवस्याद्दशाहिकं॥ असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान्। प्रथमेहनि
यो दद्यात्स दशाहं समापयेत्॥ अन्यगोत्रो ह्यसंबंधः प्रेतस्याग्निं ददाति तु॥ पिंडं चोदकदानं च स दशाहं समापयेत्॥ भ
विष्योत्तरे॥ ओदनामिषसक्तूनां शाकमूलफलादिषु। प्रथमेहनि यद्दद्यात्तद्दद्यादुत्तरेहनि॥ ब्रह्मपुराणे॥ प्रथमेहनि
यो दद्यात्प्रेतायान्नं समाहितः॥ अन्नं न वस्तु चान्येषु स एव प्रदद्यात्पि॥ भविष्योत्तरे॥ गृहद्वारे श्मशाने वा तीर्थे दे
वगृहे तथा॥ यत्राद्यो दीयते पिंडस्तत्र सर्वं समापयेत्॥ ॥ आदित्यपुराणे॥ प्रथमेहनि यः पिंडस्तेन मूर्द्धा प्र
जायते॥ चक्षुषी श्रोत्रनासं च द्वितीयेहनि जायते॥ भुजौ वक्षस्तथा ग्रीवा तृतीयेहनि जायते॥ हृदयं कुक्षिरुदरं
प्राणस्थानं चतुर्थके। कटिस्थानं गुदं लिंगं पंचमेहनि जायते॥ ऊरू षष्ठे तु विज्ञेयौ सप्तमेंगुलयस्तथा॥ पादौ तु
नवमे ज्ञेयौ दशमे वीर्यचक्षुषी। आदौ विग्रहमुत्पन्नमथो चैव शुभाशुभं॥ दशाहप्रेतपिंडेन ज्ञानं प्रेतेषु जायते॥ दशा
हे क्रियते यस्मान्मामादिग्रहणक्रिया॥ संभवं नाममात्रेण नामतज्जीवसंज्ञकं॥ नाममात्रप्रतिष्ठा तु आविनष्टे विदुर्बुधाः।
। मृतपिंडं तु प्रेतानां न दास्यंतीह ये नराः। आत्मानं च तथा प्रेतं नयति नरकं ध्रुवं॥ स्त्रियो वा दग्धदेहो वाप्यपदेहेर्भ

क्षितोऽथवा॥ अंगमुत्पादयेत्तेषां पिंडदाने ह्यशाहिकैः॥ आह प्रचेताः। नवान्यादाय भांडानि आलुकं च वरूकं तथा। तोयार्थं तु ततो गच्छेद् गृहीत्वा पुरुषं पुरः। गृहीतलकुतं मार्गस्सर्वं दुष्टनिवारणं। ततो गृहं संप्रविश्य प्रेतस्याहृत्य तंडुलान्। तेषां प्रसृतिमादाय कर्तव्यं पिंडकर्मसु। त्रिः प्रक्षाल्य ततस्तान् सम्यक् चरुं संपादयेत्ततः। तं संपाद्य समादाय दर्भेषु विनिवेशयेत् दक्षिणाग्रेषु दर्भाग्रेषु सव्ये दक्षिणामुखः। पिंडं कृत्वा समुद्भूतं नामगोत्रेण चार्पयेत्॥ आदित्यपुराणे॥ तिलमिश्रेषु दर्भेषु कर्तव्ये दक्षिणामुखः। नामगोत्रप्रमाणेन दद्यात् पिंडं त्वमंत्रकं॥ आह मरीचिः॥ प्रेतपिंडं बहिर्दद्याद् दर्भमंत्रविवर्जितं॥ प्रागुदीच्यां चरुं कृत्वा स्नातः प्रयतमानसः॥ पितृशब्दं स्वधां चेह न प्रयुंजीत कर्हिचित्॥ अनुशब्दं तथा चेह प्रयत्नेन विवर्जयेत्। उपतिष्ठतामयं पिंडः प्रेतायेति समुच्चरेत्॥ तूष्णीं प्रसेकं पुष्पं च धूपं दीपं तथैव च आ शुद्धिं त्रिषु वर्णेषु दद्याद् दद्यान्न संशयः॥ शातातपः॥ वाग्यतः प्रयतश्चैव तिष्ठेत् पिंडस्य संनिधौ॥ ततो वाप्येनिहत्य तत्पिंडं सनघांस्तु प्रक्षिपेत्ततः॥ गृह्यकारिकायां॥ यत्र त्रिरात्रमाशौचं द्वितीयेऽह्न्यस्थिसंचयः। नवश्राद्धं वृषोत्सर्गं च तत्र दद्यान्न समाचरेत्॥ आशौचं तु यदा सद्यो भवेद्यत्र कथंचन॥ यथाकालं नवश्राद्धमिति सत्यव्रतोऽब्रवीत्॥ वृषोत्सर्गं

देव॰ द्वियत्तत्र कुर्यादेकादशेहनि॥ ऊर्ध्वाहवे विद्युता चराजगोविप्रघातने॥ सद्याशौचं मृतस्याहुस्त्र्यहं वान्ये महर्षयः। पिं
२६ पिंडि। वेना शास्त्रकलहे नाहवेरणसंग्रामे रणेच हतानां विद्युता वहतानां पार्थिवेन च हतानां सद्यःशौचं॥ दातव्यो नु
२६ दिनं पिंडः शरीरावयवार्थतः। आशौचसंख्यं पाके वि सर्वेषां वा दशैव तु। पुत्रो भ्राता पिता वापि मातुलो गुरुरेव च
एते पिंडप्रदाज्ञेयाः सगोत्राश्चैव बांधवाः। सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण वाविभक्तेन सर्वैरेव कृतं भ
वेत्। पुत्रेषु विद्यमानेषु नान्यैर्वै कारयेद्द्विह। अनुकल्पोद्य पुत्रस्य सगोत्रैश्चैव बांधवैः। प्रेतानां मृतपिंडं हि न दास्यंती
ह ये नराः। आत्मानं च तथा प्रेतं नयेयुर्नरकं ध्रुवं॥ गृहद्वारे श्मशाने च तीर्थे देवालयेपि वा॥ यत्रैको दीयते पिंड
स्तत्र सर्वं समापयेत्। प्रेतस्य वत्सगोत्रस्य मृद्धाद्यवयवार्थतः। पिंडदानं करिष्येहमिति संकल्पमुच्चरेत्। द
क्षिणाग्रेषु दर्भेषु तूष्णीं तत्रावनेजनं॥ अन्नं सक्त्वाद्यथादायतिलव्यंजनसंयुतं॥ वत्सगोत्रामुक प्रेत अयं ते पिंड
इत्युक्त्वा॥ दद्यात्समुच्चरेन्मंत्रं कुशेषु पितृयज्ञवत्॥ तूष्णीं प्रसेकं गंधांश्च पुष्पं धूपं सदीपकं॥ तिलैः सर्पिर्मधुक्षीरैः राम॰
फलमूलगुडैरपि॥ अर्घैर्नाममंत्रैः शुद्धैर्वासोभिः पिंडमर्चयेत्॥ प्रयाति यावदाकाशं पिंडद्वाष्पमयी शिखा २६

26

तावत्तत्संमुखस्तिष्ठेत्सर्वतोपेक्षिपेत्ततः॥ गृहेपिंडः प्रदातव्योनदीकूलेथवाक्कवं॥ वृक्षमूलेतडागेवा यत्रवारोचतेमनः।
दृष्ट्वा शातातपः। दिनेदिने जलांजलीन्पूर्णान्प्रक्षिपेत्प्रेतकारणात्॥ तावद्वृद्धिश्चकर्त्तव्यायावत्पिंडः समाप्यते॥ पिंडस्यो
दकदानस्यचफलमुक्तमादित्यपुराणे॥ स्वगोत्रावान्यगोत्रावास्त्रियश्चपुरुषास्तथा॥ प्रेतास्तुपिंडसंबंधान्मुच्यंतेते
नकर्मणा॥ वायुभूतास्तुतिष्ठंतः कालपेक्षेणनिःसहाः॥ ब्रह्मपुराणे॥ प्रेतायपिंडदानंतुकर्तुंगच्छंतियेनराः। निष्क्रामंतु
गृहात्तेषुतुज्येष्ठं कृत्वापुरःसरं॥ कृत्वानुपुरःसरंकृत्वाद्यविशंतिगृहंततः॥ उत्तमेपश्चाश्चपाषाणेप्रविशंतिगृहंक्रमा
त्॥ आशौचांतेद्विवर्णानांदशमंपिंडमुत्सृजेत्॥ आद्यांतेपिंडदानांतेशुध्यर्थंस्नानमाचरेत्॥ पाषाणमुत्तरतःपिंडं।
पूरकंतुदिनेदिने॥ दद्यादेकैकमध्यान्नंपिंडवत्सर्जयेन्नवा॥ तोयपूर्णांजलीन्दद्यात्पाषाणेपितथादश॥ यद्वाशौचदिने
ष्वत्रप्रत्यहंदिनसंख्यया॥ शतांजलयएवस्युरथवादिगुणाणतः। दद्यादशांजलीन्तद्वदंतीतदिनसंख्यया॥ एकस्तोयांजलि
स्त्वाद्येपात्रमेकंचदीयते॥ द्वितीयेद्वौतृतीयेत्रीन्चचतुर्थेचतुरस्तथा॥ पंचमेपंचषट्षष्ठेसप्तमेसप्तवैवहि॥ अष्टमेष्टौचन
वमेनवैवदशमेदश॥ येनस्युःपंचपंचाशत्तोयस्यांजलयःक्रमात्॥ तोयपात्राणितावंतिसंयुक्तानितिलादिभिः॥ एवंत्री

देव
२७ नं च समाप्ते नवैकादश वा क्रमात्॥ त्रयोदश तथा पंचदश वा सप्तदशांजलीन्॥ एकोनविंशतिस्त्वष्टाः क्रमाद्दद्याच्छतांजलीन्
अपुत्रस्य च या पुत्री सा च पिंडप्रदा भवेत्॥ सा च पिंडान्दशैतान्वा एकाहेनैव निर्वपेत्॥ पाकैक्यमेव तत्र स्याद्धितिसत्यव्रतो
27 ब्रवीत्॥ यत्र त्रिरात्रमाशौचं तत्राद्येत्रीन्प्रदापयेत्॥ चतुरस्तु द्वितीयेह्नि तृतीयेत्रीस्तथैव च॥ दशांजलय एव स्युः शतां
जलय एव वा॥ प्रथमे दिवसे त्रिंशत्तृतीये त्रिंशदेव तु॥ चत्वारिंश द्वितीयेह्नि शतांजलिविधिक्रमः॥ सद्यः शौचेपि सद्यः स्युः
पिंडदानोदकानि च॥ अकृतचूडाये वाला ये च गर्भाद्विनिःसृताः॥ मृता अनुपनीता ये अनूढा अपि कन्यकाः॥ तेषां पिंड
वहिर्दद्याद्दर्भमंत्रविवर्जितं॥ आतिवाहिकदेहस्तु प्रेतपिंडात्समन्वितः॥ नहि मोक्षमवाप्नोति पिंडांस्तत्रैव सोश्नुते॥ कृ
तेस पिंडीकरणे नरः संवत्सरात्परं॥ प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते॥ छिन्ने वा दग्धदेहे वाप्यापदैर्भक्षिते न वा॥ देहउत्प
द्यते तस्य पिंडैर्लब्धैर्दशाहिकैः॥ कृतचौडस्तु कुर्वीत सोदकं पिंडमेव च॥ स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेत्॥ यस्य
न ज्ञायते गोत्रं नाम्ना पिंडं च निर्वपेत्॥ भार्यापिंडं पतिर्दद्याद्भर्तुर्भार्या पिचिवुविर्णां॥ पिंडं सर्वमृतस्याहो द्वितीयस्य ततः स्मृतं राम०
तृतीयस्य ततः कार्यं संनिपाते त्वयं विधिः॥ इति पिंडोदकदानं॥ अथास्थिसंचयनं॥ ॥ प्रथमेह्नि तृतीये च २७

सप्तमे नवमे तथा। अस्थिसंचयनं कार्यं दिवा तद्गोत्रजैः सह। द्वितीये वा चतुर्थे वा॥ दाहाद्दिना॥ ० खलायनः॥ एकाहे संच
यो स्थ्नां त्र्यहं चेत्स्नतकं भवेत्॥ सद्यः शौचे तु येकाहे सद्या संचयनं भवेत्॥ अहाशौचे द्वितीये ह्नि चतुर्थे त्वग्निहोत्रिणां
विष्णुः॥ चतुर्थे हि वसे स्थिसंचयनं तं दांगंगां भसि प्रक्षेपः॥ कात्यायनः॥ संचयनं चतुर्थ्यामयुग्मान्ब्राह्मणान्भोज
यित्वा पलाशवृंतेनास्थीनि परिवर्त्य परिवर्त्याङ्गुष्ठकनिष्ठिकाभ्यामादाय पलाशपुटे न्यस्य तिरस्कृत्य वकाः कूर्दं वश्म
शाने काल्या निसर्वस्तुरभिमि त्रातोहक्षिणाहवयितां कर्दं लाल्याकुशानास्तीर्य वस्त्रावकात्ये हारिद्रं वा गितिनिवप त
स्मिन्नेतद्धूजसनेयकमनेन वा त्रामनसान्तेन वा चाव्रह्मणा त्र्या विद्यया पृथिव्यामक्षितायाम पार सेननिवपाम्य।
स्तावितिश्मशानं चिकीर्षितः। कुंभे संचयनं निधानं चतुर्थ्यामिति। अत्र चतुर्थ्यामिति। चतुर्थ्यां दिवस इत्यर्थः। अयुग्मा
न्भोजयित्वेति सान्ग्रेः॥ तथा च यमः॥ अस्थिसंचयनादर्वागाहिताग्नेर्द्विजन्मनः। अयुग्मान्भोजयेद्विप्रांस्तत्र वश्रा
द्धमुच्यते॥ अनेन श्राद्धं दर्शयति तथा च गरुडपुराणे॥ एकोद्दिष्टं तु वै श्राद्धं चतुर्थेह्नि तु कारयेत्॥ ततः संचयनस्या
नंतरीयं श्राद्धमिष्यत इति च॥ तत्र श्राद्धं प्रथममेव कार्यं। ततोस्थिसंचयनं॥ इति॥ कश्चित्॥ अस्थिसंचयनानंतरं

देव
२८

29

श्राद्धमित्यपरे। आश्वलायनदर्शनात्। श्राद्धव्यतिरिक्तमयुग्मब्राह्मणभोजनमितिकर्कोपाध्यायाः। प्रास्यति। प्र
क्षिपति। शम्यवकाः कर्द्दमं चेति समीपत्रं॰ अवकाः कंटकशैवाललताः। कर्द्दमं च। अस्योपरि प्राश्यंतीत्यन्वयः॥ द
क्षिणापूर्वायतामाग्नेय्यभिमुखीं कर्षूं अस्थिधारणयोग्यं स्थानविशेषं खात्वा खनित्वेत्यर्थः। वस्त्रावकृंतं वस्त्रखंडं।
हारिद्रं हरिद्रया रक्तं। अस्मिन्हारिद्रवस्त्रखंडे॥ वागितिवाक्केत्यादिनामंत्रेण। एतद्ब्रह्मसनेषकं। वक्ष्यमाणं तु श्म
शानं तरीयं। असावितिः। प्रेतनामग्रहणं॥ श्मशानं पितृमेधं चिकीर्षतः कुंऽभेस्थिसंचयनं करोतीतरथा कूर्चरूपे स्था
न एव। कुंभेपि कुशास्तरणं हारिद्रवस्त्रास्तरणं च। मंत्रेणास्थिप्रक्षेपश्च। तस्य कुंभस्य भूमिमध्ये निधानं तु हस्ती भव
ति॥ कात्यायनः॥ अपरेद्युस्तृतीये वाप्यस्थ्नां संचयनं भवेत्। यत्तत्र विधिसादिष्टा ऋषिभिः सोधुनोच्यते। स्नानानां
ते सर्वं च त्वलागव्येन पयसा ततः। सिंचेदस्थीनि सर्वाणि प्राचीनावीत्र भाषयन्। शमीपलाशशाखाभ्यामुद्धृ
त्योदुंबरभस्मतः। आज्येनाभ्युक्ष्य गव्येन सेचयेद्गंधवारिणा॥ मृत्पात्रसंपुटे कृत्वा सूत्रेण परिवेष्ट्य च॥ अथ श्वभ्रं शि राम०
मां शुचौ भूमौ निखनेद्दक्षिणामुखः। पूरयित्वावटं पंकपिंडशैवालसंयुतं। दत्वोपरि समं शीर्षं कुर्यात्तत्पूर्वाह्णकर्म २८

णा। एषएवा गृहीताग्नेः प्रेतस्यविधिर्भविष्यते॥ स्त्रीणामिवाग्निहानंस्याद्धातोऽनुक्तमुच्यते॥ एतदुक्तंपरि। अवटंदूरयि
त्वापांसुभिरितिविशेषः। शेषं स्नानादिसर्वंहिंसकर्मत्तेनसमंतुल्यं॥ एषएवेत्यनग्नेरप्ययमेवविधिः। स्त्रीणामिवेति वैदि
कमंत्रंवर्जयित्वा॥ आश्वलायनगृह्यं। संचयनमूर्ध्वंदशम्याः कृष्णपक्षस्यायुजास्वेकनक्षत्रे अलक्षणे कुंभे पुमांस
मलक्षणायांस्त्रियं॥ अयुजोमिथुनाः प्रवयसः क्षीरोदकेनशमीशाखयात्रिः प्रसव्यंपरिव्रजन्प्रोक्षतिशीतिकेशीति
काचतीत्यंगुष्ठोपकनिष्ठिकाभ्यामेकैकमस्थ्यासंह्रार्यंतीवदधतः। पादौपूर्वंशिरउत्तरंसुसंचितंसंचित्यपवनेन
संपूययत्रनमापोनाभिस्यंदेरन्नन्यावर्षाभ्यस्तत्रगर्तेऽवदध्युः। उपसर्पमातरंभूमिमेतामितिचोत्तरयापांसूनवि
किरेत्। अवकीर्यउत्तरांसुत्तरांस्तुत्वायीतिकपालेनापिधायथानवेक्ष्यप्रत्यावृज्यापउपस्पृश्यश्राद्धमस्मैदद्युः। गुरुणा
भिमताअन्यतोवापक्षीयमाणात्॥ अयमर्थः॥ दशम्यारात्रेरूर्ध्वंदशाहोत्तरकालंयः कृष्णः पक्षः प्राप्यते॥ तस्यायुजा
सुअयुग्मास्तुतिथिषुप्रतिपत्पंचमीतृतीयाप्रभृतिषुएकनक्षत्रेएकतारकेनक्षत्रेअश्विन्यादिषुवह्नितारकानि
ग्राद्राविशाखाद्यादिषुएकतारकं। अलक्षणेकुंभेभग्नकर्णोवोऽइतिप्रसिद्धेरेखापरिशून्यवोऽइतिकश्चित्। पुमांसं

दे॰व॰ षुरुषास्थिअलक्षणायांअल्पकुंभ्यांस्त्रियंअस्थिअयुज। अयुग्माः परस्परससंबद्धाः इत्यर्थः। अमिथुनाः पत्न्यसहि
२९ ताः प्रवयसः। प्रकृष्टवयसोअबालाः अवदध्युरिति संबंधः। शमीशाखा शमीवृक्षविशेषः। तस्य शाखया। स्रवता।
क्षीरमिश्रोदकेन परिव्रजन्। प्रोक्षंतीति। परिव्रजंतः प्रोक्षंतीत्यर्थः। तिङ्सुप्व्यत्ययात्। प्रगतेसव्यं अपसव्यमित्यर्थः। ए
कैकमस्थिखंडं अंगुष्ठोपकनिष्ठिकाभ्यां गृहीत्वा शीतिके शीतिकावतीत्यनेन मंत्रेण पुंसो अस्थि अलक्षणे कुंभे अव
दध्युः। स्त्रियास्त्वस्थ्यल्यामलक्षणायां अवदध्युरित्यनुषंगः। असंक्राद्यंत इतितया। स्थितिक्षेप्तव्यं यथास्थिखंडांतरे
णाभिघातात् शब्दं न जयति।। पादौ सर्वमिति प्रथमं पादास्थि संचितव्यं। अंते शिरोस्थीति। पवनेन संस्पृश्य सूर्पेणाभस्मनः
प्रस्फोटयेदित्यर्थः। अथवा स्पृश्यते अनेनेति पवनं स्फूतक्षीणादित्रेन संस्पृश्य सिंचेदित्यर्थः। यत्र देशे एनमस्थि। एनमिति
लिंगमविवक्षितं। एनं कुंभमिति। गर्तमिति वा।। वर्षाकालीनजलप्रवाहव्यतिरिक्ता आपो न यत्र हि संबंधिन्यो नाभि
स्यंदेरन् नाभिस्रवंति। तत्र गर्तं कृत्वा अवदध्युः स्थापयेयुः। उपसर्प मातरं भूमिमेतामित्याद्याश्चतस्र ऋचः उच्चार्य ग राम॰
र्ते अवदध्युरिति संबंधः तस्मात्।। स्वं कुचत्कृष्टयात उत्तरया ऋचा गर्तेपांसून्विकिरेत्। उत्तरयामिति तत्वतीपार्थे सप्तमी २९

तदनंतरमेवउन्नरामुत्तरांस्तुस्लायीतिमंत्रेणकपालेनभस्मघृटैकदेशेनपिधाय अथानंतरमनवेक्ष्य अस्थिनिधान
स्थानदर्शनंयथानभवंतितथा आगत्य अवउपस्पर्श्यस्त्नात्वा आह्नमस्थिसंचयननिमित्तकमस्मैदद्यः। यदिलदशा
हानंतरंशुक्लपक्षोभवतिकृष्णपक्षोवा॥ अयुग्मतिथिरेकनक्षत्रयोगोनास्तितदागुरुणा अभिमताः॥ अनुमंताः संतः॥
अवक्षीयमाणानूकृष्णपक्षानु अन्यतः शुक्लपक्षेपिकुर्युः॥ इदंचास्थिसंचयनमृग्वेदिनां॥ छंदोगपरिशिष्टोक्तं
सामवेदिनां॥ कात्यायनोक्तंयजुर्वेदिनां॥ संवर्त्तः॥ प्रथमेह्नितृतीयेवासप्तमेनवमेतथा॥ अस्थिसंचयनंकार्यं
निजैस्तद्गोत्रजैर्दिने॥ अत्रचितास्थ्यास्थिरक्षणसामर्थ्ये प्रथमतृतीयादिविधानं। चतुर्थदिनेयद्यसामर्थ्यादिना
अस्थिसंचयनंनकृतंतदासप्तमनवमदिनविधानमिति॥ अंगिराः॥ श्मशानवासिनोदेवाः शवानांपरिकीर्त्तिताः
तेषांयागनिमित्तार्थंप्रेतशुद्धिरुदाहृता॥ यागप्रयोजनंतस्मिन्नहन्याशौचाभावः॥ अस्थिसंचयनेयागोदेवानांपरि
कीर्त्तिताः॥ गात्रंप्रेतंतथोद्दिश्यसंशुद्धिःक्रियतेनचेत्॥ देवतानांचयनंप्रशपंत्यथदेवताः॥ ब्रह्मपुराणे॥ ॥स्ना
त्वात्रिरात्रंकुर्वंतिप्रेतायोदकतर्पणं॥ श्मशानदेवतायागंचतुर्थेदिवसेततः॥ भवंतिपूजितायस्मात्तत्रस्थाःशकपाद

देव ३० यः। स्नातैः सुधौतवस्त्रैश्च श्मशानस्य समीपगैः। स्वजातिविहितैर्द्रव्यैः यथाशक्त्या समाहितैः। मृन्मयेषु च भांडेषु कुंभेषु
चैव केषु च। सूपद्यैर्भक्ष्यभोज्यैश्च पायसैः पानकैस्तथा॥ फलैर्मूलैर्वनोत्थैश्च तुष्यन्ति क्रव्याददेवताः। कैश्चिद्दध्यं
प्रदातव्यं कैश्चित्त्वर्घ्यं च शोभनं॥ धूपो दीपस्तथा माल्यं कैश्चिद्देयं त्वरान्वितैः। तत्र पाणिपूर्णं। निश्मशानाग्नेः समंततः
। कैश्चिद्देयानि सर्वाणि पाणीयान्यक्षतानि च। निवेदयद्भिर्वक्तव्यं तो सर्वैरनहंकृतैः। नमः क्रव्यादमुख्येभ्यो देवेभ्य इति
सर्वदा। येत्र श्मशानदेवाः स्युः भगवंतः सनातनाः। तेस्मत्सकाशाद्गृह्णन्तु बलिमष्टांगमक्षयं। प्रेतस्यास्य शुभान्लो
कान्प्रयच्छत्वपि शाश्वतान्॥ अस्माकमायुरारोग्यं सुखं च ददतां चिरं॥ एवं कृत्वा बलीन्सर्वान्क्षीरेणाभ्युक्ष्य वाग्यतैः
विसर्जनं तु देवानां कर्तव्यं च समाहितैः। एवमुक्त्वा बलिं दत्वा दद्यात्तिलत्रयं ततः। एकं श्मशानवासिभ्यः प्रेतायैव तु मध्य
मं। तृतीयं तत्सखिभ्यश्च दक्षिणास्य स्मादरात्॥ अभ्युक्ष्यापसव्यो भ्यात तत्सर्वं विततं ततः। विसर्जनात्तु देवानां
कर्तव्यं वाग्यतैः सकृत्। निरीक्ष्यास्थिविविक्तेत दद्भिरंगारसंचयं॥ ततो यज्ञियवृक्षोत्थामित्यादि गृह्यकारिकायां
पाठः। ततो यज्ञियवृक्षोत्थां शाखामादाय वाग्यतः। अपसव्यं क्रमाद्वृक्षं कृत्वा कश्चित्स्वगोत्रजः। प्रेतस्यास्थीनि श राम० ३०

ङ्गानिप्रधानांगोद्भवानिच। शिरसोवक्षसः पाणीपार्श्वाभ्यांचपादतः। अप्रदक्षिणमस्थीनिगृह्णातीसाहगोमि
लः। स्नापयेत्पंचगव्येन तानिगोः पयसाथवा॥ अक्नास्थीनिघृतेनाथकर्पूराद्यैर्विलेपयेत्॥ पंचगव्येन सुस्ना
थ क्षौमवस्त्रेणवेष्टसच॥ प्रक्षिप्य मृन्मयेभांडेनवेसाछादनेशुभे॥ अरण्येवृक्षमूलेवासुदृढेसंस्थापयत्तापि
अरत्निमात्रमवटंखात्वावागोमिलवाकयतः। पूरयित्वावटंपंकपिंडैःसेवालसंयुतं॥ तलोपरिसमंशेषंकुर्याद्दि
वाहकर्मणा॥ नतास्कशानकैर्नीत्वाकदाचिज्जाह्नवीजले। कश्चित्क्षिपतिसत्पुत्रोदौहित्रोवासहोदरः। गृही
त्वास्थीनितद्भस्मनीत्वातोयेविनिक्षिपेत्॥ तदन्नंमंत्रजादीनांदद्याद्भस्मसिवाक्षिपेत्॥ गृहीत्वास्थीनितद्भस्म
नीत्वात्तोयेविनिक्षिपेत्॥ ततः संमार्जनंभूमेः कर्त्तव्यंगोमयांबुभिः। पूजाचपुष्पधूपाद्यैर्बलिभिः पूर्ववत्क्रमा
त्॥ भूमेराछादनार्थंतुवृक्षः पुष्कलकोथवा। पट्टकोवाप कर्त्तव्यास्तत्रसर्वैः स्वपंबुभिः॥ ततः सचैलंस्नानंतुकर्त्त
व्यतैर्विधानतः। कश्चित्तृतीयेविप्रस्यचतुर्थेक्षत्रियस्यच। पंचमेवैश्यजातेस्तुशूद्रस्यदशमेहनि। अस्थ्नांवैसंचयः
प्रेतेक्रियतेदेशगौरवात्। जीवतामपिवर्णानांसंस्पर्शेवाप्ययंक्रमः। चतुर्थेब्राह्मणानांचपंचमेहनिभूभृतां। न

देव. वमेवैश्यजातीनांशूद्राणांदशमात्परे॥ कर्तव्यंतुनरैः श्राद्धंदेशकालाविरोधतः। सपिंडाश्चसजातीयास्तथान्येपि
३१ बुभुक्षिताः। दीनानाथांधकृपणास्तथान्यानपिभोजयेत्॥ क्वचिद्दितिवचनात्प्रथमतृतीयाद्दिवसेष्वस्थि
संचयनांगस्पर्शयोर्हस्तकुलाचारात्रनुरोद्धव्याः तथा॥ अहाशौचे द्वितीयेह्नि कर्तव्यमस्थिसंचयः। सद्यःशौ
चेपितत्क्षणंकर्तव्यइतिनिश्चयः। तथा। अस्थीनिमातापितृपूर्वजानांनयंतिगंगामपियेकदाचित्। सद्भावकस्मा
पितृयाभिभूतास्तेषांतुतीर्थानिफलप्रदानि॥ कुलद्वयंवाप्यथवर्जयित्वामातापित्रोर्जन्मभूम्याश्रितंवा। अ
स्थीनिचान्यस्यवहन्नयंश्चभागपक्षयंलभतेदुःकृतंच॥ लभेतेदुःकृतमितिचेतनामुद्दहन्नितिकश्चित्॥ भागी
रथीयत्रतथान्यतीर्थेकुलेनरःकोपियदाविपन्नः। तदातदातत्रतथाप्यभक्त्याभावेनचास्थीनिविनिक्षिपेच्च
स्नात्वाततः पंचगव्येनसिक्त्वाहिरण्यमध्वाज्यतिलैश्चयोज्य॥ ततस्तन्मृत्पिंडपुटेनिधायपश्यन्दिशंप्रेतगणोपगू
ढां॥ नमोस्तुधर्मायवदन्प्रविश्यजलेसमेप्रीतइतिक्षिपेच्च। उत्थायभास्वंतमवेक्ष्यसूर्यंसद्दक्षिणांविप्रमुखा राम०
यदद्यात्॥ एवंकृतेप्रेतपुरःस्थितेस्वर्गेगतिःस्याच्चमहेंद्रतुल्या॥ तथा॥ मातुः कुलंपितृकुलंवर्जयित्वानराधमः। ३१

अस्थीन्यन्यकुलोत्थस्य नीत्वा चांद्रायणं चरेत्॥ काशीखंडे॥ यावदस्थि मनुष्याणां गंगा तोयेषु तिष्ठति। तावद्वर्षसह
स्राणि स्वर्गलोके महीयते। श्मशानदेवतायागोयं प्रेतोपकारातिशयार्थः। कर्तुश्चायुरादिफलसिद्धिहेतुः। अतो नाय
मावश्यकः। शक्तस्तु भक्ष्यादियुतं कुर्यात्। अष्टांगं॥ भक्ष्यभोज्यपायसपानकमेकमंगं। फलमूले द्वितीयमंगं।
अर्घस्तृतीयं। अनुक्तोपि गंधः साहचर्यात् चतुर्थमंगं। पुष्पमाल्यं पंचमंगं। धूपः षष्ठं। दीपः सप्तमं॥ यवधान्यादिम
र्णानि पात्राणि अष्टमं। अत्र वचनपाठक्रमेणानुष्ठानं। किंतु प्रसिद्धेनार्घ्यादिदानक्रमेणैव। एतद्दर्घ्यं नमः। क
व्यादमुखेभ्यो देवेभ्य इति प्रयोगः। एवं सप्तस्वंगेषु परेष्वपि। एवमष्टांगं कृत्वा ये स्मिन् श्मशाने देवा इत्यादिद्वृतां चि
दमित्यंतं पठनीयं। ततो बलिं दत्वा क्षीरेणाभ्युक्षणपूर्वकं क्रव्यादमुख्या देवाः स्वस्थानं गच्छंतु तेभ्यो नम इति विसर्जनं
। वस्त्रमुत्तरासंगं॥ साहचर्यात् यज्ञोपवीतं चापसव्यं कृत्वा। क्रमादिति प्रथमं शिरोस्थीनि। ततो हृदयादीनामस्थीनि
गृह्णीयादित्यर्थः। स्त्रुमाज्यतसीतद्भवं क्षौमं। संस्थापयत्यपीत्यपि शब्दो गृह्णीतीत्यपेक्षया समुच्चयार्थः। पुष्कर
पत्राकारो देवकुल्यादिः। पत्राकोपिटाहर इति पश्चिमदेशे प्रसिद्धः। सभोपवेशनाय काष्ठादि विन्यासविशेषः। गंगा

देव. यामावश्यकं फलार्थं चास्थिनिधानं सद्भावकस्य भावश्युद्ध्यान्यकुलस्यापि क्रियातिशयार्द्धर्मवृद्ध्यानयने गुणमिद
३२ मुक्तं। दृष्टसमीहया च प्रायश्चित्तबोधनात्॥ मातापित्रोर्जन्मभूम्याश्रितं चेति मातृमर्त्यकपेत्कदेः॥ तथापितृमातृ
कादिसंबंधे ॰पीत्यर्थः॥ भागीरथीप्रयागतायतीर्थ इति। गंगासंबंधिथेव प्रयागकनखलादिष्वस्थ्नां प्रक्षेपे गुणप्रा
दित्यपइत्यर्थः॥ स्नात्वा उत्तदित्वा दिना अस्थिप्रक्षेपविधेर्निर्द्दिष्टः॥ पंचगव्येन पंचगव्येन। प्रेतगणोपगूढां दक्षिणा
दिक्॥ नमोस्तु धर्माये तिगंगाजलप्रवेशमंत्रः॥ त्वमे प्रेतार्त्यस्थिप्रक्षेपमंत्रः॥ दक्षिणा दानं शक्त्यानुरूपं पणप्रणा
दि॥ श्मशानकारिकायां॥ भूमेराच्छादनार्थाय वृक्षं प्रच्छरिणीं वथा॥ पदकं वा प्रकर्तव्यं तत्र सर्वैः स्कवं धुभिः॥ पंचपिंडो
परिघटं कृत्वा रितिलैर्युतं॥ शमीशाखां वा द्रुमात्री निखनेत्तस्य दक्षिणे। सर्वेषामपि वर्णानामेष साधारणो विधिः
॥ आहिताग्नेर्निवापः स्याच्छुचौ देशे जलांतिके। अंजनादिविलेपांतमस्थ्नां पर्णपुटे भवेत्॥ अरत्निमात्रां फलं खात्वा
वाद्यग्निदिङ्मुखां। तीक्ष्णांतां यवमध्यां च मध्यं नावस्वोल्किरेत्॥ दर्भानास्तीर्य हारिद्रं वस्त्रखंडं च तत्र वै। तस्यां वा गितिमं
त्रेण निवपत्यास्थिसंग्रहं। वागितेकाक्षरं मंत्रं व्याहृत्य निवपाम्यतः॥ यद्वा त्वा मनसा तेन तेत्फस्का अस्थिनिवापनं। स राम. ३२

बोधनांते प्रेतस्य नामाद्दिश्य तस्मा विति॥ अथमांतंपदकेचित्कुर्वंतिपित्रह्यियाज्ञिकाः॥ पितृमेधं विकीर्षुश्चेत्कुंभेदर्भादिसर्ववत्
कृत्वास्थीन्यपिमंत्रेणनिवपेत्तंपिधायतत्॥ शुचौदेशेचनिखनेन्मूलीकुंभं प्रयत्नतः॥ शमीपत्राणिशैवालं कर्दमं वांज
नात्सुरा॥ कुर्युरस्थिषुनेत्यन्येविरोधाद्दंजनादिभिः॥ अवकादिचितिस्थानेत्यादेतत्तैर्व्यवस्थितं॥ अग्निहोत्रवतामे
ष शेषः साधारणोविधिः॥ अत्रगावः सुवर्णंचवस्त्राण्याभरणानिच॥ एतद्धिप्रायदातव्यमस्थिसंचयनेकृते॥ त
थाचबृहस्पतिः॥ चतुर्थेहनिविप्रेभ्योदेयमन्नंहिबांधवैः॥ गावः सुवर्णं वित्तंचप्रेतमुद्दिश्य शक्तितः॥ यद्दिष्टंजीवता
श्चासीद्दद्यात्तस्य प्रयत्नतइति॥ चतुर्थेहनी संचयवासरे। तस्यप्रेतस्यैत्पर्थः॥ तथाचदीपिकायां॥ गोवित्तादितथेष्ट
मस्ययदभून्नाम्नाहितंजीवतोदेयंसंचयवासरेद्विजवरैरिति॥ अस्थिसंचयनेवारनक्षत्रनिषेधोयमेनोक्तः॥ भौमार्क
मंदवारेषुतिथियुग्मेषुवर्जयेत्॥ वर्जयेदेकपादृक्षेद्विपादृक्षेस्थिसंचयं॥ प्रदातजन्मनक्षत्रेत्रिपादृक्षेविशेषतइ
ति। संचयनेकृतेमनुष्यलोकात्प्रेतलोकंगच्छतः॥ प्रेतस्यआमान्नेनपाथेयश्राद्धंएकोद्दिष्टविधिनाकार्यमितिस्म
त्यर्थसारेकारिकायांच॥ ॥ इत्यस्थिसंचयनं॥ ॥ अथनवश्राद्धान्युच्यंते॥ तत्रचांतर्दशाहेक्रियमाणानांनवश्रा

देव कि
३३

द्धसंज्ञां निवेशयन्नाश्वलायनो दशाहपर्यंतं नवश्राद्धकालं मन्यते ॥ नवश्राद्धं दशाहानि नवश्राद्धं तु षड्ढतून् ॥ अतःपरं
पुराणं स्यात्त्रिविधं श्राद्धमुच्यते । त्रिविधं श्राद्धं । नवं । नवमिश्रं । पुराणं च । तत्रैकादशाहश्राद्धांतं नवं ० तदूर्ध्वं मासं वत्सरान्मिश्रं
तदुत्तरं पुराणमिति । एषां तु सहसंख्यया देशकालविभागमेकादशाहिकस्य च नवश्राद्धसंज्ञकत्वमाह नागरखंडे भर्तृय
ज्ञः । त्रीणि संचयनस्यार्थे तानि वैश्वपुराणसंप्रातं ॥ यत्रस्थाने भवेन्मृत्युस्तत्र श्राद्धं प्रकल्पयेत् ॥ एकोद्दिष्टं ततो मार्गे विश्रामो
यत्र कारितः । ततः संचयनस्थाने तृतीयं श्राद्धमिष्यते ॥ पंचमे सप्तमे तद्वद्दष्टमे नवमे तथा ॥ दशमेकादशे चैव नवश्राद्धा
नि तानि च ॥ वैतरण्यामसंप्राप्तः प्रेतस्तत्त्रिमवाप्नुयात् ॥ ब्रह्मपुराणे० तृतीये हनि कर्तव्यं प्रेतदाहाद्वनौ द्विजाः । सूत
कांते गृहे श्राद्धमेकोद्दिष्टं प्रचक्षते ॥ यमः । अस्थिसंचयनादर्वाग्गाहिताग्ने द्विजन्मनः । अयुग्मान्भोजयेद्विप्रांस्तन्नवश्रा
द्धमुच्यते ॥ आह कात्यायनः । चतुर्थे पंचमे चैव नवमैकादशे तथा ॥ यद्दीयते जंतोस्तन्नवश्राद्धमुच्यते । व्यासः । प्रथ
मे सप्तमे चैव नवमैकादशे तथा ॥ यत्तु वै दीयते जंतोस्तन्नवश्राद्धमुच्यते ॥ आहशंखः । आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि
कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः । आद्यं नवं । पैठीनसिः । सद्यः शौचे प्रदातव्यं प्रेतस्यैकादशेहनि । सएव दिवसस्तस्य

राम०
३३

33

श्राद्धशय्याशनादिषु कूर्मपुराणे० प्रेताय च गृहद्वारि प्रथमे भोजयेद्द्विजान्। द्वितीयेहनि कर्तव्यं क्षुरकर्म सबांधवैः। च
तुर्थे बांधवैः सर्वैरस्थ्नां संचयनं भवेत्॥ पूर्वान्विप्रान्प्रभुंजीत युग्मांस्तु श्रद्धयान्वितान्। पंचमे नवमे चैव तथैवैकादशेहनि।
युग्मांश्च भोजयेद्विप्रान्नवश्राद्धं तु तद्विदुः। ब्रह्मपुराणे॥ चतुर्थे ब्राह्मणानां च पंचमेहनि भूभुजां० नवमे वैश्यजातीनां शूद्राणां
दशमात्परे। अत्रिः। प्रेतार्थं सूतकांते तु ब्राह्मणान्भोजयेत्ततः। नवश्राद्धनिमित्तं तु एकमेकादशेहनि। एवं वसत्यैकादशाहि
कान्नवश्राद्धान्दशाशौचांते विधीयमानं ब्राह्मणभोजनं॥ कर्मांतरमिति गम्यते। बृहस्पतिः। चतुर्थेहनि विप्रेभ्यो देयमन्नं हि बांध
वैः। गावः सुवर्णं वित्तं च प्रेतमुद्दिश्य शक्तितः। चतुर्थेहनि संचयाहनीत्यर्थः। यदिष्टं जीवतश्चासीत्तद्दद्यादन्नस्य यत्नतः। तस
प्रेतस्य जीवतो यत्किंचिदभीष्टमासीत्तद्दद्यादित्यर्थः। तथा प्रथमेह्नि तृतीयेह्नि पंचसप्तनवस्वपि। द्वौ द्वौ पिंडौ प्रदातव्यौ
शेषेष्वेकं तु विन्यसेत्॥ दीपिकायां। अथ तत्तुयात्राद्येव चतुर्थेह्नि श्राद्धं पंचमसप्ताष्टनवादिषु द्वेषु युग्मद्विजैरिति। एषु दिवसे
षु श्राद्धं युग्मद्विजैः कुर्यात्॥ उशना। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश॥ एकेनैव तु कार्याणि संविभक्तधनैरपि।
तथा सर्वैरनुमतिं कृत्वा ज्येष्ठेनैव तु यत्कृतं॥ द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत्॥ तत्राधिकारिणां सर्वानुमतेन क्रियमा
णेषु श्राद्धेषु उपकरणस्वीकरणसामीप्यवर्तमानाभ्यां सहत्वेनाधिकारः। सर्वेषां तत्कृतं भवति। यथाभर्तृक्रियमाणश्रा

देव॰
३४

34

द्वाग्निहोत्रदर्शपूर्णमासाह्निककर्मण्युपकरणसज्जीकरणस्वामीप्रवर्तमानाभ्यां सहत्वेनाधिकारः पत्न्याः। नच ज्ञेयमेवं सपिंडम
ध्यात्कस्यचित्सर्वासरोगा हि नासंनिधानाभावे नश्राद्धानिष्पत्तिरिति॥ यस्य त्वत्येहतिपत्न्यना लंध्रुकी स्यान्नामपरुध्यपजेतेति।
पत्न्या असंनिधानेपि यथा कर्मनिष्पत्तिस्तथा तदसंनिधानेपि नवश्राद्धनिष्पत्तिः सर्वेषां सपिंडानां॥ संनिधानस्थितौ लिं
गानिवदृश्यंते॥ तथाच हारीतः॥ अनुकनीयां संज्येष्ठप्रथमाः प्रत्यायांतीत्याहीनि॥ स्मृत्यंतरं वा प्रेतकर्म प्रकुर्वाणा बांधवाः
स्वर्गमापुयुः। नान्यास्पुषः कुलेतेषां भवेयुश्च कथंचन॥ वह्वृचगृह्यपरिशिष्टे। नवश्राद्धं सहदद्यन्नपुनः प्रत्येकमित्यर्थः
नवश्राद्धग्रहणं प्रदर्शनार्थं। अतएव प्रचेताः। एकादशाद्याः क्रमशो ज्येष्ठस्य विधिवत्क्रियाः। कुर्युर्नैकैकशः श्राद्धमा
ह्निकं तु पृथक्पृथक्॥ अर्वाक्संवत्सरात्सर्वे कुर्युः श्राद्धं समेत्य वै। संवत्सरे व्यतीते तु कुर्युः श्राद्धं पृथक्पृथक्। उ
शनाः। एकादशे क्रियच्छ्राद्धं मातापित्रोस्तु दीयते। तत्समेतैस्तु कर्तव्यं पूर्वं चैव पृथक्पृथक्॥ सर्वं पुराणमाह्निकाह्निकं
पैठीनसिः। नवश्राद्धं सपिंडत्वं श्राद्धान्यपि च षोडश। एकेनैव तु कार्याणि संविभक्तधनेष्वपि॥ विभक्तैस्तु पृथक्कार्यं प्रतिसंव
त्सराह्निकं। एकेनैवाविभक्तैस्तु कृते सर्वैः कृतं तु तत्। स्यात्पर्थमारे। एकादशाहादौ पुत्रो ज्येष्ठाद्यहिर्योग्यः। कुर्यात्। नवश्राद्धा राम॰
निषोडशश्राद्धानि च विभक्तो विभक्तो वा। एक एवैक एव कुर्यात्। सापिंडीकरणं तु विभक्ताः पृथक् सधना अप्येकस्मिन्दिने वृद्धिकामाश्चे ३४

हेव०
३५

राम०
३५

नवश्राद्धंत्रिपक्षंचषण्मासेमासिकानिच। नकरोतिसुतोयस्तुतस्याधःपितरोगताः। तथोत्तरश्राद्धाधिकारोप्येषांप्रयोजन
मित्यपितत्रैवोक्तं॥ नवश्राद्धादिश्राद्धानिनकृतानिसुयस्यवै॥ नाधिकारीभवेत्तत्रमासषाण्मासिकादिके॥ ब्रह्मांड
पुराणे॥ नवश्राद्धानिकुर्वीतप्रेतोद्देशेनयत्नतः॥ एकोद्दिष्टविधानेननान्यथातुककदाचन॥ श्राद्धगालवः॥
शावेतुसूतकंचेत्स्यात्त्रिशाशौचेतथैवच। नवश्राद्धानिदेयानियथाकालंयथाक्रमं॥ व्याघ्रः। प्रेतस्यप्रेतकार्याण्य
कृत्वाधनहारकः। वर्णानांयद्वधेप्रोक्तंतद्व्रतंप्रयतश्चरेत्॥ नवश्राद्धेषुकेषांचित्पदार्थानामननुष्ठानमुक्तंवक्ष्यचपरि
शिष्टे॥ अनुदकमधूपंचगंधमाल्यविवर्जितं॥ नवश्राद्धममंत्रंचपिंडोदकविवर्जितं। अनुदकमनर्घ्यं। पिंडोदकमव
नेजनप्रत्यवनेजनपरिषेचनरूपं॥ एतद्धेमाद्रिअपरार्ककृतंव्याख्यानं॥ स्मृतिमंजर्यांतु॥ अनुदकमितिसंधंतां
पितरइत्येतदवनेजनोदकमत्रनकुर्यादितिपिंडेचधूपादिनदद्यात्॥ अमंत्रमितिनयथाकृतोमंत्रः अपितूहितैकवचनः
पिंडोदकवर्जितमितिपिंडस्योपरियउदकपात्रप्रक्षेपोमिहितस्तद्वर्जितं॥ आदशाहंगंधादिप्रतिषेधोविप्राणांनतु

पिंडानां। पिंडानां पुनरन्त्रोक्तं॥ इति वीरभद्र श्राद्धकल्पे० गरुडपुराणे० अन्नाद्येन च तेनैव सर्वश्राद्धानि कारयेत्। अ
मंत्रं कारयेच्छ्राद्धं दशाहं नामगोत्रतः। गालवः॥ नवश्राद्धान्यशुद्धोपि कुर्याद्देकादशे तथा॥ कर्तुस्तात्कालिकी शुद्धिर
शुद्धः पुनरेव सः॥ आपस्तंबः। नैमित्तिकं श्राद्धं बहिर्ग्रामात् शुचयः शुचौ देशे संस्कुर्वंति तत्र नवानि पात्राणि ये र
त्नेस्क्रियंते येषु च भुंजते तानि भुक्तवद्भ्यो दद्यात्। न वा तद्गुणायोच्छिष्टं प्रयच्छेद्देवं संवत्सरमिति। नैमित्तिक श्राद्धे
न श्रेत श्राद्धान्युच्यंते॥ अत एवाह गालवः॥ दाहादारभ्य दातव्यं श्राद्धं नैमित्तिकं बुधैः। नियमाद्वत्सरं यावदिति गाल
व भाषितं। नवश्राद्धशेषमन्नं यजमानेनाश्ने न वा तन्भोक्तव्यमित्याह। गिराः। नवश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च यत्। दंपतो
र्भुक्तशेषं च तन्न भुंजीत कर्हिचित्। का तर्हि नवश्राद्धशेषस्य प्रतिपत्तिः। कर्तव्या इत्यपेक्षायामाह देवलः। एकोद्दिष्टत
शेषं तु ब्राह्मणेभ्यः समुत्सृजेत्। ततः कामं तु भुंजीत स्वयं मंगलभोजने॥ नवश्राद्धसंज्ञके चैकोद्दिष्टे तु शेषं श्राद्धभोक्तृभ्यो गम०
ब्राह्मणेभ्यः समर्पयेत्॥ तदनुज्ञया जलादौ वा प्रक्षिपेत्। न तु स्वयं भुंजीत न चान्यं कमपि भोजयेत्। ततस्तदनंतरं क्रिय ३६

मांसेमंगलभोजनेसांवत्सरिकाद्दौ श्राद्धशेषंज्ञात्यादीन्भोजयेत्स्वयंचयजमानोभुंजीत॥ श्राद्धशेषादन्येनान्नेनतुदीना
नाथादयोभोजनीयाः। तथाचनवश्राद्धान्नमभिधायोक्तंब्रह्मपुराणे॥ कर्तव्यंतुनरैःश्राद्धंदेशकालानुरोधतः। सपिंडा
श्चसजातीयास्तथान्येपिबुभुक्षिताः। दीनानाथाश्चकृपणास्तथान्नमुपभुंजते॥ अज्ञानिनानुभुक्तेस्मिन्नन्ने प्रायश्चित्तम
प्यत्रैवोक्तं। द्वाभ्यांतुतप्तकृच्छ्राभ्यांशुचिःस्यात्तुविवेकिनां। तृतीयेपंचमेस्नानंकर्तव्यंनवमेतथा॥ वृहत्प्रचेताः। नपैतृ
कोजपःकार्यःस्वस्तिंचनोदाहरेत्॥ वह्वृचगृह्यपरिशिष्टे॥ एकोद्दिष्टस्यापिंडेतुअनुशब्दोनविद्यते॥ पितृशब्दंनकुर्वी
तपितृहाचोपजायते। भृगुः। एकोद्दिष्टेसमूलाःकुशाइतिस्तकद्दाछिन्ननिषेधः। अवनेजनप्रत्यवनेजनेनतुर्भातृ।
धूपचंदनमाल्यादिवनकुर्यादिति। शेषमन्नमितिचनवक्तव्यंशेषमपितस्मैदद्यादप्सुवाप्रक्षिपेत्। नान्येनभोक्तव्यमि
ति॥ तथान्येपिविशेषाः॥ आशिषोद्विगुणादर्भाजपाशीःस्वस्तिवाचनं। पितृशब्दश्चसंबंधशर्मशब्दस्तथैवच। पा
त्रालंभोवगाहश्चउल्मुकोल्लेखनादिकं॥ तृप्तश्चप्रश्नविकरःशेषप्रश्नस्तथैवच॥ प्रदक्षिणाविसर्गश्चसीमांतगमनं

तथा॥ अष्टादशपदार्थास्तु प्रेतश्राद्धे विवर्जयेत्॥ तथा॥ न स्वधा श्रावणार्घ्य धूप दीपौ न मन्त्रस्तुतिरिति। प्रेतश्राद्धेषु यत्पात्र
मर्घार्थं परिकल्पितं॥ तस्मै वोत्तानता प्रोक्ता शेषेषु न्युब्जता मता॥ उत्तानं स्थापयेत्पात्रमेकोद्दिष्टे सदा बुधः। न्युब्जं तु पार्वणे
कुर्यात्तस्योपरि कुशान्न्यसेत्। विकरं चाग्नौकरणमेकोद्दिष्टे करोति यः। स पापिष्ठो भवेन्नित्यं पितृहा चोपजायते। एतत्प्रे
तश्राद्धविषयं। अहन्येव तु भोक्तव्यं कृते श्राद्धे द्विजन्मभिः। अन्यथा ह्यासुरं श्राद्धं परपाके च सेविते॥ आह मार्कण्डेयः॥ ॥
मरणानन्तरं प्रोक्तस्तिरश्चां गर्भसंभवः। वायुभूता ह्यतो गर्भं प्रपद्यन्ते न संशयः। प्रेतलोके तु वसतिर्नृणां लोके प्रकीर्तिता।
क्षुत्तृष्णे प्रत्यहं तत्र भवतो भृगुनन्दन॥ अहोरात्रं तु तत्रापि मानुष्यं परिकीर्तितं॥ आमश्राद्धानि दत्तानि भुञ्जन्ते तेत्र मान
वैः। आतिवाहिकदेहाद्धि प्रेतपिण्डाद्विना नरः। न हि मोक्षमवाप्नोति पीडां तत्रैव सोश्नुते। कृते सपिण्डीकरणे नरः
संवत्सरात्परं॥ प्रेतदेहं समुत्सृज्य भोगदेहं प्रपद्यते॥ कार्ष्णाजिनिः॥ मृताहनि तु दातव्यं प्रेताय स्वकमिच्छता॥ म
हानि तु दानेन क्रमशो मुच्यते शुभात्। अलब्ध्वा तु नवश्राद्धं प्रेतत्वान्न विमुच्यते॥ तस्माद्यत्नेन दातव्यं नवश्राद्धं तु तत्सवे स्म० ३७

व्यासः। द्वारेषु भस्मनिचये आकाशे च यथाक्रमं॥ अहानि त्रीणि वैकं वा प्रेतो भूतः स तिष्ठति॥ द्वादशाहे ततो जंतुर्यमलोकं
च गच्छति। अहं चैव तु यत्नेन दद्यात्प्रेताय शक्तितः। गरुडपुराणे। दिनत्रयं वसेत्तोये अग्नौ चापि दिनत्रयं॰ आकाशे व
सते त्रीणि दिनमेकं च वासके॥ दुग्धश्राद्धं च वक्षौ च जलेनैव तु तर्पितः॥ स्नेहस्नानजलेनैव धूपकैः क शरे गृहे।
गृह्यकारिकायां॥ प्रथमेह्नि तृतीये च पंचमे नवसप्तमे॥ आमश्राद्धानि तत्रस्तु मार्कंडेयोब्रवीदिति। तृतीयपंचमे
सप्तनवमैकादशेषु च। तृतीयपंचसप्तानामेकस्मिन् प्रथमेहनि। नवमे वभवेद्यद्वात्तृतीये नवमे तथा। पंचसप्तमयोरे
कं तु अहर्गणसंज्ञितं॥ नवश्राद्धानि सर्वाणि कुर्यात् प्रेतस्तु मुक्तये॥ इति वृद्धवसिष्ठोक्तेरेकोद्दिष्टविधानतः। पिंडं निर्वप
णार्थं वै चरुश्रपणमत्र तु। अनुद्दकमधूपं च गंधमाल्यादिवर्जितं॰ नवश्राद्धममंत्रं च पिंडोदकविवर्जितं। अन्नेन विधुरे
द्भूमौ गृहीयान्माशिषोत्र तु। पात्रालंभोन चाक्षय्यमासनादि प्रयोगतः। नामगोत्रेण संबंधरहितं प्रेतशब्दवत्। नवश्रा
द्धं गृहे कार्यं भार्या यत्रास्तपोपि वा। प्रथमाहादिषु प्रोक्तमिति पैठीनसेर्वचः। देवालयेन दीतीरे वृक्षमूले जलाशये। उ

या
रप स्थाने प्यवैतस्मादिति मन्वादिशासनात्॥ सपिंडीकरणां तानि प्रेत श्राद्धानि तथैव वै। तानि स्कुलौ कि केवलं भावितापाहात्राश्व
लायनः॥ भुंजति चेन्नव श्राद्धे दीना नार्द्ध विरोक्षवः। तेभ्यो भोजान पात्राणि पाकभांजानि तत्र वै। दद्यात्तच्छेषमन्नं च हिरण्य
द्युपि दक्षिणां। प्रति श्राद्धं नि भुंजीत विप्रं सर्वमभोजितो। अभावे भोक्तुरेतस्मिन् पिंडमेवाहि निर्वपेत्। सर्वाणि सह चैकस्मि
न्दिने स्फ रितिव हृचाः। पिंड निर्वपणं कुर्यास्मि मूलेषु कुशोष्विहा श्राद्धभोक्तुरिमं शीक्रा स्वस्यास्त्विति विवर्जनं॥ श्राद्धमग्नि
मतः कार्यं दाहाद्दुक्तं घ्रहः स्वपि। अनग्निमत उत्क्रांतेरिति गालव भाषितं। ऊर्ध्वं त्रिपक्षाद्यः श्राद्धं मृताहन्येव तद्भवेत्॥ अ
धश्च कारयेद्दाहाद्दाहिताग्नेर्द्विजन्मनः॥ सानेर्दाहदिनं श्राद्धं याद्यं मासस्य प्राक्सपिंडनात्। उत्क्रांतिदिनमूर्ध्वं स्या
दिति शंखोत्र वीह्वचः। तत्र सन्निहितैः सर्वैर्भवितव्यं हि बंधुभिः। विष्णुना दद्ध्यरित्युक्तं यतः कर्तैक एव च। प्रेतक्रियाया
श्रावृतेरनिष्टत्वादिति श्रुतेः॥ ब्राह्मणासंपत्तौ लघुप्रभासखंडे उक्तं॥ अलाभे ब्राह्मणस्यैव कौशः कार्यो वटुः प्रिये स
वमाप्यावरेच्छ्राद्धं षड्दैवतं समाहितः। विभक्तिं कारयेद्यस्तु पितृहा स प्रजायते॥ कौशः कुशमयः॥ ॥ बटुः

लघुमनुष्यप्रतिकृतिः। तं वटुं ब्राह्मणत्वेन परिकल्प्य सर्वं श्राद्धमाचरेत्॥ विभक्तिः। कर्मण्यस्छेदो लोपइति यावत्।
तं न कुर्यात्॥ बहुषु श्राद्धप्रकारमाह देवलः। निधाय वा दर्भवटूनासनेषु समाहितः। प्रैषानुप्रैषसंयुक्तं वि
धानं प्रतिपादयेत्। आसनेषु ब्राह्मणोपवेशनोपयुक्तेषु त्वागतेभवत। आद्धं करिष्ये। आद्धेक्षणः क्रियतां
। देवान् पितॄन्नावाहयिष्ये अग्नौकरणं करिष्ये इत्यादयः प्रश्नाः प्रैषाः। एषामुत्तराण्यनुप्रैषाः। तदुभयसंयुक्तं वि
धानं श्राद्धेतिकर्तव्यताकाण्डं स्वयमेव कुर्यात्। तत्र संकल्पितस्यान्नस्य यत्कर्तव्यं तदपि स एवाह। पात्राभावे परं
कृत्वा पितृयज्ञविधिं नरः। निर्दिश्याप्यन्नमुद्दिश्य यत्र पात्रं ततो गतिः। पात्राभावे क्षिपेदग्नौ गवे दद्यादथाप्सु
वा। ननु प्राप्तस्य लोपोग्निपैतृके कस्य विशेषतइति। मुख्यद्रव्यासंभवे चान्येप्यनुकल्पाः। तत्रामश्राद्धमाह व्यः। इह प
राशरस्मृतिविष्णुपुराणेषूक्तं। असमर्थोन्नदानस्य धान्यमामं स्वशक्तितः। प्रदद्यान्तु द्विजाग्र्येभ्यः स्वल्पा
ल्पामपि दक्षिणां॥ अस्यार्थः। पक्वान्नाभावे श्राद्धयोग्यान्नप्रकृतिभूतं यवगोधूमतण्डुलादिरूपे धान्यममेव विद्या

श्रि॰ देवान् पितॄंश्चोद्दिश्य पक्वान्नं वा स्वपक्वान्निमंत्रितद्विजेभ्यः समर्पयेत्। तत्र धान्यस्य साक्षाद्दनदनीयत्वाद्भोजना
३९ भावे तत्संबंधिनो धर्मजातस्य लोपः। तदुक्तं। स्मरप्रश्नोवगाहश्च ऊषप्रैषो यथासुखं। आमश्राद्धे भवेन्नैतद्दपोशानं चपं
चमं। अवगाहोंगुष्ठावगाहः। तथात्र श्यपतइत्याशः। धान्यविशेषणे नवाशशब्देनैतत्सूच्यते। यतस्वस्यानंगत्वात्
ब्राह्मणैस्तद्धान्यमशनयोग्यं कृत्वा भोक्तव्यं॥ ननु कार्यांतरे। विनियोक्तव्यमिति। अन्यथा आशमित्यनर्थकं स्यात्।
अत्र कर्तृविशेषेऽपवादमाह व्यासः हिरण्यमामं श्राद्धीयं लब्धं यत्क्षत्रियादितः। यथेष्टं विनियोज्यं स्याद्भुंजीयाद्ब्राह्म
णात्स्वयं। क्षत्रियादितः। क्षत्रियमूर्द्धावसिक्तादिभ्यः। अत्र यद्यपि यथेष्टं विनियोज्यमिति सामान्येनोक्तं तथापि श्राद्ध
दैनविनियोज्यं। देवतोद्देशेन त्यक्तस्य पुनर्दैवतांतरोद्देशेन त्यागस्यायुक्तत्वात्। ततो लौकिके भोजने क्रयादौ वा लौकिकेपि
श्रुतिस्मृतिविहिते दक्षिणादौ नित्यनैमित्तिके विनियोज्यमित्यवगंतव्यं। ब्राह्मणात्तु लब्धं स्वयमेव भोज्यमेवेति नियम्यते। अ
त्र यावत्प्रतिगृहीतं तावत्स्वयमेव भोक्तव्यमिति नियमो नगंतव्यः। किंतु तत्प्रतिपर्यंतं स्वयं भुक्त्वा अन्यस्य श्राद्धशेषो वित्ताप्रतिपत्तिः राम॰
कर्त्तव्येतनि श्चेतव्यं ३९

देव०
४०

50

राम०
४०

१पत्रगर्दछे

नं देवाः परोक्षदेवताः प्रत्यक्षदेवा ब्राह्मणा ब्राह्मणैर्लोका धार्यंते॥ ब्राह्मणानां प्रसादेन दिवि तिष्ठंति देवताः॥ ब्रा
ह्मणाभिहितं वाक्यं न मिथ्या जायते क्वचित्॥ यद्ब्राह्मणास्तुष्टतमा वदंति तद्देवताः प्रत्यभिनंदयंति। तुष्टेषु
तुष्टाः सततं भवंति प्रत्यक्षदेवेषु परोक्षदेवाः॥ ब्रह्मपुराणे॥ यस्य यस्य तु देवर्षे स्यात्पघस्यात्याश्चिमं लहः
स तत्रैव स्वशुद्धिं च गृहशुद्धिं करोति। तथा। समाप्य दशमं पिंडं यथाशास्त्रमुदाहृतं। ग्रामाद्बहिस्ततो गत्वा प्रेतस्पृष्टे
तु वाससी। अंत्यानामाश्रितानां च त्यक्त्वा स्नानं करोति च। श्मश्रुलोमनखानां च यान्यन्यानि तान्यपि। गौरसर्षप
कल्केन तिलतैलेन संयुतं। शिरःस्नानं ततः कृत्वा तोयेनाचम्य वाग्यतः। वासोयुग्मं नवं शुक्लं अव्रणं शुद्धमेव च।
गृहीत्वा गां सुवर्णं च मंगलानि शुभानि च। स्पृष्ट्वा संकीर्तयित्वा च पश्चाच्छुद्धो भवेन्नरः। पश्चिममाशौचांत्यदिनं।
गृहशुद्धिः प्राकृतभांडादिपरित्यागमार्जनलेपनादिका। ततो दशमे पिंडं दत्वा ग्रामाद्बहिर्गत्वा नखलोमादित्यागपू
र्वकं यथोक्तस्नानं कृत्वा प्रेतकर्मकाल धृते वस्त्रे अंत्यजानामाश्रितानां वा दत्वा स्नायादित्यर्थः। शिरःस्नानं ततः कृत्वे

देव० ४२ त्याशौचांतद्दिने। मनुः। विप्रः शुध्यत्यपः स्पृष्ट्वा क्षत्रियो वाहनायुधं। वैश्यः प्रतोदं रश्मीन्वा यष्टिं शूद्रः कृतक्रियः।
देवलः। दशमेहनि संप्राप्ते स्नानं ग्रामाद्बहिर्भवेत्। तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च। पैठीनसिः। श्वोभूते
ग्निमुपसमाधाय शांत्युदकं कुर्यात्। शंन्नो देवीरिति सूक्तेन प्रथमं द्वाभ्यां द्वितीयं शंनो देवीरभिष्टये। शंन इंद्राग्नी
तदस्तु मित्रावरुणेति तृतीयं। शंनो धातेंद्र जीवयास्मान्क्रोशान्पृथिवी शांतिरिति च तृभिश्चतुर्थं। उभयतः सर्व
त्र सावित्री शांतिं कुर्यात्। तृतीये शर्करां कुलत्थं च सर्षपेनाचम्य निष्ठीवेत्। चिवत्वानिंद्र मित्युक्तं दशरात्रे केश
श्मश्रुलोमनखानि वापयित्वा आत्मनः शांतिनिमित्तं शांत्युदकं कुर्यादयुग्मान्ब्राह्मणान्भोजयेत्॥ गृह्य
कारिकायां॥ गत्वा ग्रामाद्बहिः सर्वे पिंडशेषं समाप्य तु। अत्र नैमित्तिकं क्षौरं निषेधेपि हि दर्शवत्। गुरौ प्रेते ज
नन्यां च नखलोमनिकृंतनं। वपनं च सदा धाःकुर्युः श्राद्धाद्वाग्विषमेह्नि वा। यतो प्रेते न वपनं न पिंडो नोदकक्रियां
। नाशौचं नैव शोकश्च पुत्राणां गोत्रिणामपि। तस्मै व वाससी प्रेतस्पृष्टे त्वायुर्निमित्तकः॥ अत्र पिंडत्रयं दद्यात्स्तः रामः ४२

मुदाहृतं। चतुर्णामपिवर्णानांसूतकंतुपृथक्पृथक्। नववाच्यंनवश्राद्धंरूपस्यैकादशाहश्राद्धस्याप्यनुज्ञा
नात्। यदा एकादशेद्वादशाहे स्याच्छक्तेरेकादशाहश्राद्धस्य षोडशश्राद्धमध्यवर्त्तिरूपतातदानाप्यनुज्ञातमि
ति। एकादशाहेयत् श्राद्धंतत्सामान्यमुदाहृतमित्यादिपैठीनसिवचनेनद्विविधस्याप्येकादशाहश्राद्धस्याशौचे
प्यनुज्ञातत्वात्। तथाचैकादशेह्नियत् श्राद्धमविशेषेणोवयन्नवश्राद्धरूपत्वेनषोडशश्राद्धमध्यस्थत्वेनवा
विहितमितियच्छद्धस्यार्थः। श्राद्धग्रहणंवृषोत्सर्गशय्यादानादीनामेकादशाहविहितानांसर्वेषामुपल
क्षणं॥ वृषोत्सर्गानंतरभावित्वादेकादशाहश्राद्धादीनांतद्देवमेकादशाहेप्रेतत्वमोक्षार्थंवृषोत्सर्गस्तुक:
त्तावत्॥ तथाशय्यादिविषयेपिसद्यव्रतेनोक्तं॥ सद्यः शौचेपिदातव्यंप्रेतस्यैकादशेहनि॥ स एवदिवसस्त
स्यश्राद्धशय्यासनादिषु। सद्यः शौचेपिएकादशेह्निदातव्यं। दशाहाद्याशौचेदातव्यमित्येतत्तुस्थितमेवेति
व्याख्यातव्यं। ननुक्षत्रियादीनामाशौचयुक्तैकादशाहिनश्राद्धस्यैवदशाहांतः श्राद्धवदाशौचेपिकर्त्तव्यतोक्तेः

देव· करणमहीं नत्तु पदशय्यादिनानामपि॥ आशौचे दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्तत इति सामान्येन निषेधा
४५ तस्मादेकादशाहे पदशय्यादिदानविधायकं वाक्यं ब्राह्मणविषयमेव। मेवं ० केनोक्तं भवत आशौचे श्राद्धमेव भवति
नान्यद्दानमिति। चतुर्थेहनि विप्रेभ्यो देयमन्नं हि बांधवैः। गावः सुवर्णं वित्तं च प्रेतमुद्दिश्य भक्तितः। यद्दिष्टं जीव
त आसीत्तद्दद्यात्तस्य यत्नतः। स प्रत्तो दुस्तरं मार्गं ततो याति न संशय इति भविष्यत्पुराणे॥ आशौचेपि गवादिदा
नानां प्रेतोद्देशेनोक्तत्वात्॥ रामायणे च क्षत्रियाणामाशौचयुक्ते द्वादशाहे एकादशदिनानुकल्पिकसुवर्ण
गोग्रामवेश्मादि दाददानानामभिहितत्वाच्च। यत्तु दानं प्रतिग्रहो होम इत्यादिना प्रतिषेधः स प्रेतोद्देशदातव्यातिरि
क्तविषयः। अतः आशौचसंभवेप्येकादशाहविहितं सर्वं कर्म कर्तव्यमिति सिद्धं। अत्र वृषोत्सर्गादपि पूर्वतरं
विष्णुतर्पणं शिष्टा अवश्यं कुर्वन्ति। तत्तु कुमरणमृतानां पापक्षयार्थं दाहाद्यधिकारप्राप्त्यर्थं च गरुडपुराणे राम०
नारायणबलिरुक्तोस्ति तत्रापि पूर्वं विष्णुतर्पणमुक्तमस्ति॥ तथा सारग्राहे। कृत्वा नीलवृषोत्सर्गं तिलपानं वा ४५

शुभावहं। पिशाचत्वगतान्सर्वान्मोचयत्येवनान्यथा। कृत्वानारायणवलिंकृत्वावाविष्णुतर्पणं॥ रक्षःपिशाचभा
वाद्विमुच्यंतेनैवसंशयइति॥ अतोविष्णुतर्पणस्यप्रेतोत्वनिवृत्यर्थत्वात्समाचाराद्देहानुष्ठानंयुक्तं। तदिहलिख्यते।
गंगायांयमुनायांवानैमिषेपुष्करेपिवा॥ तडागेजलपूर्णेवाह्रदेवाविमलेजले॥ वापीकूपेगवांगोष्ठेगृहेवाप्रति
मालये। कृष्णाग्रेकारयेद्विप्रोविधिनारायणाक्षयं॥ पूर्वंतुतर्पणंकार्यंमंत्रैःपौराणवैदिकैः। सर्वौषध्यक्षतैर्मिश्रै
र्विष्णुमुद्दिश्यतर्पयेत्॥ कार्यंपुरुषसूक्तेनमंत्रैर्ववैष्णवैरपि॥ दक्षिणाभिमुखोभूत्वाप्रेतंविष्णुमितिस्मरन्। अना
दिनिधनोदेवशंखचक्रगदाधर॥ अव्ययःपुंडरीकाक्षप्रेतमोक्षप्रदोभव॥ अथवृषोत्सर्गः। तत्रतावदस्यविधिकाल
देशाः। इहचैकादशेहनिप्रमीतमनुष्योद्देशेनवृषोत्सर्गःकार्यइत्युक्तंषड्विंशन्मते। एकादशाहेप्रेतस्ययस्यनो
त्सृज्यतेवृषः। पिशाचत्वंस्थिरंतस्यदत्तैःश्राद्धशतैरपि॥ भविष्योत्तरेतुद्वादशेहनिवृषोत्सर्गोभिहितः। कार्त्तिक्यामय
वामाघ्यामयनेवायुधिष्ठिर। चैत्र्यांवापितृतीयायांवैशाख्यांद्वादशेह्निवा॥ विष्णुधर्मोत्तरेतु॥ यस्मिन्कस्मिंश्चिन्मृता

हेपिवृषोत्सर्गोभिहितः। अश्वयुक्शुक्लपक्षस्यपंचदश्यांनराधिप। कार्त्तिकेप्यथवामासिवृषोत्सर्गंतुकारयेत्
ग्रहणेद्वेमहापुण्येतथाचैवायनद्वये। विषुवद्वितयेचैवमृताहेवांधवस्यच। उत्सृजेन्नीलकंठंवैकौमुद्याःसमुपागमे
नीलकंठोनीलवृषः। कौमुदीआश्विनकार्त्तिकयोःपौर्णमासी॥ पित्राद्युद्देशेनवृषोत्सर्गमकुर्वाणस्यनिंदामत्स्य
पुराणे॥ नकरोतिवृषोत्सर्गंसुतीर्थेवाजलांजलिं॥ नददातिसुतोयस्तुपितुरुच्चारएवसः। अत्रनीलसंज्ञकःसर्वो
त्तमोवृषः। वृषोत्सर्गप्रदेशोदेवीपुराणे। लक्षारण्येभवेत्तीर्थेउत्सर्गोगोकुलेपिवा॥ ब्रह्मपुराणे॥ प्राग्उदक्प्रवणेदे
शेमनोज्ञेनिर्जनेवने॥ वृषोत्सर्गःकार्यइतिशेषः॥ कालिकापुराणे॥ अरण्येचत्वरेवापिगोष्ठेवामोचयेवृषं। न
गृहेमोचयेद्विद्वान्काययुष्कलंफलं॥ अथवृषलक्षणं॥ मत्स्यपुराणे॥ मनुरुवाच॥ भगवन्श्रोतुमिच्छामि
वृषभस्यतुलक्षणं॥ वृषोत्सर्गविधिंचैवतथापुण्यफलंमहत्॥ मत्स्यउवाच॥ धेनुमादौपरीक्षेतसुशीलांलक्ष
णान्वितां॥ अव्यंगामपरिक्लिष्टांजीववत्सामरोगिणीं स्निग्धवर्णांस्निग्धखुरांस्निग्धशृंगांतथैवच॥ मनोहरातिसौ

ष्मां च सप्रमाणामनुद्रुतां॥ आवर्त्तैर्दक्षिणावर्त्तैर्युक्तां दक्षिणतस्तथा॥ वामावर्त्तैर्वामतस्तु विस्तीर्णजघनस्तना।
मृदुसंहतताम्रोष्ठी रक्तजिह्वा सुसूक्ष्मिता। अशपा वद्दीर्घा स्फुटित रक्तजिह्वा तथा च या॥ ताम्रानाविलनेत्रा च शफैरविरलै
र्द्दृढैः। वैडूर्यमधुवर्णैश्च जलबुद्बुदसंनिभैः॥ रक्तैः स्निग्धैश्च नयनैस्तथा रक्तकनीनकैः। सप्तचत्वारिंशद्दंता भवेद्यस्याव
तालुका। षडुन्नता सुपार्श्वोरुपृष्ठपंचसमायता। अष्टायता शिरोग्रीवायुता या शुभलक्षणा॥ षडुन्नता भवेत्केषु।
केषु पंचसु वायता॥ आयताश्च तथैवाष्टौ धेनूनां के शुभावहाः॥ मत्स्य उवाच उरः पृष्ठं शिरः कुक्षी श्रोणी च वसु
धाधिप। षडुन्नतानि धेनूनां पूजयंति विचक्षणाः॥ कर्णौ नेत्रे ललाटं च पंचैव परितिनद्दन॥ समायतानि शस्यंते पुच्छं
सास्नाश्च सक्थिनी॥ चत्वारश्च स्तना राजन् एवमष्टौ मनिषिभिः॥ शिरोग्रीवायुताश्चैव भूमिपालाय नाभ्यश॥ तस्याः
सुतं परीक्षेत वृषभं लक्षणान्वितं॥ उन्नतस्कंधककुदं मृदुलांगूलकंबलं। महाकटितटस्कंधं वैडूर्यमणिलोचनं॥
प्रवालवर्णशृंगाग्रं सुदीर्घमृदुवालधिं॥ नवाष्टदशसंख्यैर्वा तीक्ष्णाग्रैर्दशनैः शुभैः॥ मल्लिकाक्षश्च भोरुव्यो टहे

पिधनधान्यदः। वर्णतस्ताम्रकपिलो ब्राह्मणस्य प्रशस्यते॥ श्वेतारक्तश्च कृष्णश्च गौरः पाटल एव च॥ इंद्रनीलाभपृष्ठश्च
शवलः पंचकालकः। पृथुकर्णो महास्कंधः श्लक्ष्णरोमा च यो भवेत्॥ रक्ताक्षः कपिलो यश्च रक्तशृंगश्च यो भवेत्।
श्वेतोदरः कृष्णपृष्ठो ब्राह्मणस्य प्रशस्यते॥ स्निग्धो रक्तेन वर्णेन च क्षत्रियस्य प्रशस्यते॥ कांचनाभेन वैश्यस्य कृ
ष्णेनाप्यंत्यजन्मनः। यस्य प्रागायते शृंगे स्वमुखाभिमुखे सदा। सर्वेषामेव वर्णानां स च सर्वार्थसाधकः। मार्जारपा
दः कपिलो धन्यः कपिलपिंगलः॥ श्वेतो मार्जारपादस्तु धन्यो मणिनिभेक्षणः॥ करटः पिंगलश्चैव श्वेतपा
दस्तथैव च॥ स्वच्छपादशिराश्चैव द्विपादः श्वेत एव च॥ कपिंजलनिभो धन्यस्तथा तित्तिरिसंनिभः॥ आकर्ण
मूलाच्छ्वेतं तु मुखं यस्य प्रकाशते॥ नांदीमुखः स विज्ञेयो रक्तवर्णो विशेषतः॥ श्वेतं च जठरं यस्य भवेत्पृष्ठं च गोप
तेः। स ऋषभः समुद्राख्यः सततं कुलवर्द्धनः। मल्लिकाचित्रपुष्पश्च धन्यो भवति पुंगवः। कमलैर्मण्डलैश्चापि चित्रो भ
वति गोप्रदः। अतसीपुष्पवर्णाश्च तथा धन्यतराः स्मृताः। एते धन्यास्तथा धन्यान्कीर्तयिष्यामि ते नृप। कृष्णताल्वोष्ठदशनो

देव०
४८

राम०
४८

देव०
४९

49

रामः०
४९

शे० गंधमाल्याक्षतादिभिः। संपूज्य संस्थाप्य कुंभं रुद्राध्यायं जपेत्ततः। जपेच्च पौरुषं सूक्तं गायत्रीं द्रौ ड्री च संहितां। आवो
राजेति सेकं॥ तद्व्यंति चत्वारि॥ आज्यदोहानि त्रीणि। देवव्रतानि त्रीणि त्रैकादश सामानि रुद्रसंहितां॥ ॥ तद्व्रतं सा
म विधानाख्ये ब्राह्मणे॥ ॥ आवोराजानं द्व्यवर्ग आज्यदोहानि देवव्रतानि चैषा रौद्री नाम सं० हितां तां प्रयुंज्य
रुद्रं प्रीणातीति॥ जपानंतरं होमः कार्यः॥ ॥ विष्णुधर्मोत्तरे॥ ॥ स्थंडिलमिष्टं गवां मध्ये तु विस्तीर्य हस्तमात्रं शतं
पयसा श्रपयेद्धि द्विजश्चरुं पौष्णं समाहितः॥ अत्र गवां मध्ये रुद्रकलशस्य पश्चाद्भागे परिसमूहनादि पंचभूसंस्कारा
न्विधायाग्निस्थापनादि ब्रह्मणो दक्षिणादानांते कृते वृषभस्यांकनादि कुर्यात्॥ ४॥ तत्राह विष्णुः॥ ४॥ ४
गवां मध्ये तु समिद्धमग्निं परिस्तीर्य पौष्णं चरुं श्रपयित्वा पूषा गा अन्वेतु न इहरतिरिति वड्ढाला वृषभमानीयाय
स्कारमाकृयेत्॥ अयस्कारो लोहकारः॥ सोरप्रमाणे॥ ४॥ ततो वृषभमानीयाग्नेरुत्तरतः स्थितं॥ सव्यस्फिग्जि
लिखेच्चक्रं शूलं वा होत्र दक्षिणे॥ सव्यस्फिग्जि वामकटीभागे॥ कुंकुमेनांकयित्वा द्वौ ब्राह्मणाः सुसमाहिताः तते

नधातुनापश्चाद्द्यस्कारोंकयेद्वृषं॥ देवीपुराणे॥ तप्तेन वामतश्चक्रं पार्श्वे शूलं समालिखेत्॥ धातुना हेमता
रेण पृष्ठेनाथवाङ्कयेत्॥ हेमन्तु वर्णं॥ तारं रूप्यं॰ आयसं लोहं। विष्णुः॥ एकस्मिन् पार्श्वे च चक्रेणापरस्मि
न् शूलेनाङ्कितं च हिरण्यवर्णेतिचतसृभिः शंनो देवी रितिच स्नापयेत्॥ विष्णुधर्मोत्तरे॥ ॥ अङ्कितं स्नपये
त्पश्चात्स्नाने तस्य यथा पठेत्॥ हिरण्यवर्णेति सच्चश्चतस्रो मनुजेश्वर॥ आपोहिष्ठेति तिस्रश्च शंनो देवीति चाप्य
थ हिरण्यवर्णाः शुचयः पावका इत्याद्याश्चतस्रोऽभिषेचनीयास्ऋचोऽथर्ववेदे प्रसिद्धाः॥ पारस्करः॥ अका
लमूलाकलशानष्टौ स्रग्दामभूषितान्॥ सवस्त्रांश्च सरलांश्च चूतपल्लवशोभितान्॥ स्थापयित्वा चतुर्भिस्तु सं
स्नाप्यो वृषभः पुरः॥ चतुर्भिर्वत्सिकाः स्नाप्यास्ततः सर्वान् विभूषयेत्॥ ऋचः समुद्रज्येष्ठाद्याः कीर्तयेदभि
षेचने॥ समुद्रज्येष्ठाः सलिलस्य मध्यादित्याद्याऋचो बह्वृचानां प्रसिद्धाः॥ एतच्च वृषस्य वत्सिकानां च स्नपनादि
कं तस्य ताभिः सह विवाहकर्तुं। एतच्च वत्सिकासंख्यादि विधिपूर्वकं देवीपुराणे स्पष्टीकृतं॥ चतस्रो वत्सिका भद्रा

द्वेवासंभवतोपिवा॥ वत्सः सर्वांगसंपूर्णः कन्यकावत्सिकाभवेत्॥ अलंकृत्ययथाशोभमुत्सर्गंकारयेन्मुने
। विवाहस्त्वेकवत्सर्यानीलेनभवतिसदा॥ कन्यका अननुभूतमैथुना॥ एकवत्सरीएकवर्षवयस्कातथा
अष्टाभिर्धेनुभिर्युक्तश्चतुर्भिरथवाक्रमात्॥ त्रिहायनीभिर्दून्याभिः सुरूपाभिश्चशोभितः। त्रिहायन्यास्त्रिव
र्षवयस्काः॥ सर्वोपकरणोपेतः सर्वसस्यचरोमहान्॥ उत्स्रष्टव्योविधानेन अपिस्मृतिनिदर्शनात्॥
आदित्यपुराणे॥ विसर्जस्याश्चतुर्विंशो देयागावोवृषस्यच॥ अष्टौवाप्यचतस्रोवायथालाभमथापि
वा॥ विष्णुधर्मोत्तरे॥ ४ वत्सतर्यश्चतस्रश्चतंवृषंचनराधिप॥ अलंकुर्यात्ततः पश्चाद्गंधमाल्यैश्चशक्ति
तः। किंकिणीभिश्चरम्याभिस्तथाचीनांशुकैः शुभैः॥ किंकिण्योघर्घरिकाः॥ आदित्यपुराणे॥ ४॥ घंटां
लोहकृतांदद्यात्शृंगेचपटलंशुभं॥ पटलेस्वर्णादिनिर्मितः कोशः॥ देवीपुराणे ०॥ अंकितोत्सृज्यते
पूर्वंगावोलंकृत्यसर्वतः॥ शिवधर्मोत्तरे॥ ४॥ रक्तपीतैश्चकुसुमैः कुंकुमाद्यैश्चवर्णकैः॥ यथाशोभं

दे॰
५१
51

समालभ्याविभवैः पूजयेद्वृषं॥ किंकिणीरवकोपेतां घंटिकां चरकान्वितां॥ स्वस्तिकैरर्धचंद्रैश्च नानारत्नोप
शोभितां॥ स्वस्तिको विद्धंदृक प्रभेदः॥ अष्टांगुलप्रविस्तीर्णं हेमपट्टविनिर्मितां॥ राजतीं चर्मणो वापि मा
लां शिरसि विन्यसेत्॥ तद्विधा पृष्ठमालां च बद्धच्छातककुद्दंबिकां॥ नानाभरणसंयुक्तां मुद्गराद्यप्रलंबिनी
हेमराजतकौषीवा नानारत्नोपशोभितां॥ कौबीता ग्रमयी पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलंकृतां॥ कार्यं
शृंगद्वयं तस्य सत्हस्त्रचमरान्वितं॥ पट्टं शिरसि सौवर्णं चंद्रचंद्रकभूषितं॥ हेममयं मयूरच्छत्रं भ्रमराश्चात्य
पत्रैश्च वक्षीयाद्रत्नसंयुतं॥ ग्रैवेयकेण दिव्येन नानारत्नोपशोभिना॥ ग्रैवेयकं कंठभूषा॥ घंटां कांस्यमयीं
शुद्धांगले वध्नीत सुस्वनां॥ खुरैः सौवर्णरौप्यैश्च केयूरांगदभूषितां॥ पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलंकृते
॥ पद्मपुराणे॥ रक्तपीतैश्च कुसुमैश्चंदनैश्च विचर्चितं॥ यथास्तुमंत्रं समालभ्य विभवैः पूजयेद्वृषं॥ अष्टांगुल
प्रविस्तीर्णं हेमपट्टविनिर्मितां॥ सौवर्णां राजतीं वापि मालां शिरसि विन्यसेत्॥ हेमराजतसंगं च नानारत्नोपशो राम॰ ५१

मित्तं॥ कार्यं शृंगद्वयं तस्य सौवर्णं द्विजसत्तम॥ हेमपट्टं च शिरसि अर्द्धचंद्रविभूषितं॥ घंटां कांस्यमयीं यस्तु ह्रीं
गले वध्नीत सत्वरं॥ खुरैः सौवर्णरौप्यैर्वा किंकिणीरंगदभूषितं॥ पट्टवस्त्रै राच्छिन्नैश्च यथाशोभमलंकृतं॥ व
स्त्रिकाभिश्च संयुक्तं वृषं तं च प्रपूजयेत्॥ नानावर्णाः सुशीलास्ताश्चालंकार्याः पृथक्पृथक्॥ कर्पूरं चंदनं चा
न्यच्चंदनेन विलेपयेत्॥ सौवर्णशृंगपौरौप्यखुरास्ताम्रपृष्ठास्तथैव च॥ कांस्यदोहनसंयुक्ता वस्त्रालंकारभूषि
ताः॥ कौशुंभेन च वस्त्रेण परिधाप्याः पृथक्पृथक्॥ ललाटे मुकुटास्ता सां हेमरौप्याथ कौसुमाः॥ ब्राह्मणै
र्वैदिकैर्मंत्रैस्तथा पौराणिकैरपि॥ आगमोक्तैश्च तत्वज्ञैः पूजनीयो यथाविधिः॥ पारस्करः॥ अथालंकृतस्ता
न्सर्वान्रुद्राध्यायं समाहितः। आवयेत्पौरुषं सूक्तं तथाप्रतिरथानि च॥ आश्वः। शिशान इत्याद्या द्वादश ऋचो
प्रतिरथसंज्ञाः। विष्णुः॥ स्नाता लंकृतं स्नाताभिश्च तत्सभिर्वत्सरीभिः॥ सार्द्धमानीय रुद्रानुरुषसूक्तं कूष्मां
डीश्च जपेत्पिता वत्सेति च मंत्रं वृषभस्य दक्षिणे कर्णे॥ विष्णुधर्मोत्तरे॥ मंत्रं पिता वत्स इति प्रतीतं जपेद् सव्ये

देव
५२

52

वृषभस्य कर्णे ॥ असव्ये दक्षिणे ॥ पितावत्सेतिमंत्रोथर्ववेदे प्रसिद्धः। पितावत्सानां पतिरघ्न्यानामथोपिता
महतां गर्गराणां ॥ वत्सो जरायुः प्रतिधुक्पीयूष आमिक्षा घृतं तद्ध्यस्य रेतः। इति ॥ आदित्यपुराणे ॥ ४
सावित्रीं च जपेन्मंत्रं तथा चैवाघमर्षणं ॥ कर्णजापं च दद्यात्तु वृषभस्यनघंशायः ॥ अघमर्षणमृतं च स
त्यं चेत्याहि प्रसिद्धं ॥ विष्णुधर्मोत्तरे ॥ ततः कर्णे जपेन्मंत्रमिमं प्रयतमानसः। वृषो हि भगवान्धर्मश्च
तुष्पादः प्रकीर्तितः। वृणोमि तमहं भक्त्या स मां रक्षतु सर्वतः। पारस्करस्त्वेतमेव मंत्रमभिधायाह ॥ इति प्रा
र्थ्य वृषेन्द्रं तं गृहीतकुसुमाञ्जलिः। त्रिः प्रदक्षिणमावृत्य नमस्कुर्याद्यथाविधिः ॥ प्रत्सुवोनां तु गवामेतावा
न्विधिरिष्यते ॥ अथैशान्यामभिमुखतः कुर्याद्गावो वृषं तथा ॥ गावो वृषस्यो भयतो वृषं मध्ये निवेशयेच। सर्वे
षां कण्ठवस्त्राणि श्लेषयेत्तु परस्परं ॥ अयं हि वो मया दत्तः सर्वासां पतिरुत्तमः। तुभ्यं चैता मया दत्ताः पत्न्यः स
र्वा मनोरमाः। संयोज्येति वृषं गोभिः पितृभ्यस्तं निवेदयेत् ॥ सव्येन पाणिना पुच्छं समालंभ्य वृषस्य तु। दक्षिणे

राम
५२

नापश्चादाय सतिलाः सकुशास्ततः॥ ततोगोत्रंसमुच्चार्यंअमुकस्मैइतिब्रुवन्॥ एषएषमयादत्तस्तांतारयतु
सर्वदा। सहेमसतिलंभूमाविसृज्यार्यविनिक्षिपेत्॥ इदंतुपारस्करेनैकप्रमितोद्देशेन वृषोत्सर्गवाकामुक्तं॥
अनेकप्रमितोद्देशेनतुनीलोत्सर्गेमंत्रउक्तोवाराहपुराणे॥ नरायेचात्रतिष्ठंतिपतिताः पितृबांधवाः॥ तेषां
भवत्वयंत्राता नीलोमुक्तोयथाविधि॥ गृहीत्वौदुंबरंपात्रंकृत्वाक्षतसतिलोदकं॥ करेणपुच्छमादायपितृहणामु
त्सृजेद्वृषं॥ ब्रह्मपुराणे॥ स्वधापितृभ्योमातृभ्योबंधुभ्यश्चापितृप्तये॥ मातृपक्षास्तुयेकेचिद्येचान्येपितृप
क्षजाः॥ गुरुश्वशुरबंधुनां ये कुलेषुसमुद्भवाः॥ येप्रेतभावमापन्ना येचान्येश्राद्धवर्जिताः। वृषोत्सर्गेणतेसर्वे
लभंतांतृप्तिमुत्तमां॥ दद्यादनेनमंत्रेणतिलाक्षतयुतंजलं॥ पितृभ्यश्चसमासेन ब्राह्मणेभ्यश्चदक्षिणां॥ अनेन
मंत्रेणावद्धपितृद्देशेन वृषमुत्सृजेत् विष्णुः। एतं युवानंपतिंवोददामितेन क्रीडंतीश्चरथप्रियेण। माहास्म
हिप्रजयामातनूभिर्माऽरधाम द्विषतेसोमराजन्॥ वृषंवत्सतरीयुक्तमैशान्यांकालयेद्दिशि॥ कालयेत्सरणोद

देव०
५३
53

येदनेनमंत्रेणेति शेषः ॥ विष्णुधर्मोत्तरे ॥ एतं युवानं वृषभं ददामि गवां पतिं यूथपतिं सदर्पं ॥ अनेन सार्द्धं व
र तत्र कामं कामं तथा प्राप्नुत वत्सतर्यः ॥ प्रक्षालयेत्तं वृषभं ततस्तु पूर्वोदितं वत्सतर्यश्च सर्वाः ॥ कात्यायनः
जीववत्सायाः पयस्विन्याः पुत्रो यूथे च रूपस्वितमः स्यात्तमलंकृत्य यूथे मुख्याश्चतस्रो वत्सतर्यस्ताश्चालं
कृत्यैतं युवानं पतिं वो ददामि तेन क्रीडन्तीश्चरत प्रियेण मानः साप्त जनुषा सुभगा रायस्पोषेण समिषा मदे
मेत्यन्तयैवोत्सृजेरन् मध्यमस्य ममिमं त्रयत्ते मयोभूरित्यनुवाकशेषेणेति ॥ गृह्यकारिकायां ॥ षौ ल्पपायसयोः
शेषाद्भवेत्स्विष्टकृद्वाहुतिः। आज्येनैव मनुताद्याः प्राशनाद्याविशमोकतः ॥ घटेन स्नापयेत्तेन वृषं वत्सतरीयुतं
जलैर्वा घटैः रुद्रजाप्यैर्नमोऽन्ते ततः स्थितः। रुद्राध्यायं जपेत्कर्णे दक्षिणे वृषभस्य तु ॥ अलंकृत्य वृषं पुष्पमा
लाभैर्वाससापि च। घंटिकां तु गुडाद्यैश्च स्तवर्णा तिलकेन च ॥ वध्नीयात्कंकणं पादे ग्रीवां वस्त्रेण वेष्टयेत्त
यूथे मुख्याश्चतस्रो या अलंकृत्यैवमेव ताः ॥ मत्स्यपुराणे ॥ वत्सिकाभिश्च संयुक्तं वृषं तं च प्रसृजयेत् ॥ ना

राम
५३

नावर्णाः सुशीलास्ताश्चालंकार्याः पृथक्पृथक्॥ कर्पूरकुंकुमाद्येनचंदनेनविलेपयेत्। वृषंवत्सतरीयुक्तं
मधुपर्केणपूजयेत्॥ ततोवेद्यांसमानीयेवृषंवत्सतरीयुतं। स्वगृह्योक्तेनविधिनाआचार्यस्तदनंतरं॥ आज्य
होमंचरुहोमंरौद्रंपौष्णंतथैवच॥ यथास्वगृह्यंजुहुयात्सुसमिद्धेहुताशने॥ लाजाहोमादिकंसर्वंवैवाहंक
र्मकारयेत्॥ त्रिःप्रदक्षिणमग्निंचवत्सिकाभिःसमन्वितं॥ पर्याणीयततःपश्चादभिषिंचेद्वृषमूर्द्धनि पुच्छा
न्याद्यापसर्वेषांयजमानस्तिलैःसह॥ देवर्षिपितृभूतानांकरोतिजलतर्पणं॥ पुराणांतरात्॥ लाजाहोमा
दिभिर्मंत्रैर्होमंकुर्याद्विचक्षणः॥ ततश्चतुरग्निंप्रादक्षिणेनपरिवर्त्तयेत्॥ गरुडपुराणे॥ वाप्यांकूपेगवांगोष्ठे
स्थाप्याग्निंविधिवत्ततः। विवाहविधिनापूर्वंकुर्याद्ब्राह्मणवाचनं॰ आघारावाज्यभागौचचक्षुषीचनदापये
त्। सर्वमिहरतिमंत्रैः षड्भिराज्याहुतीर्हुनेत्॥ आघारावाज्यभागौचपायसेनशूलगवदेवताः। पौष्णेनच
सकृद्धोमः पूषागाइतिमंत्रवित्। उभयोःस्विष्टकृद्धोमश्चरुणापायसेनच। प्रथमंव्याहृतीहोमः प्रायश्चित्तंप

न्मापतिः। संस्रवप्राशनं कुर्यात्त्रिणीतापरिमोक्षणं॥ पवित्रप्रतिपत्तिश्च ब्रह्मणो दक्षिणे ततः॥ षडंगरुद्रजाप्येन
प्रेतो मोक्षमवाप्नुयात्॥ एकवर्णं वृषं चैव सदृग्वत्सतरीस्तथा॥ स्नापयित्वा ततः कुर्यात्सिवलिंकारभूषितां प्र
तिष्ठाप्य चतष्कुम्भं प्रेतो मोक्षमवाप्नुयात्॥ पुच्छे चतर्पणं कार्यमुत्सृजेन्मंत्रपूर्वकं॥ ब्राह्मणान्भोजयेत्पश्चा
द्दक्षिणाभिश्च तोषयेत्॥ ततः श्राद्धं समारभ्य मेकोद्दिष्टं यथाविधि॥ जलमन्नं तथा देयं प्रेतोद्धरणहेतवे। द्वाद
शाहं ततः कुर्यान्मासे मासे तथा पृथक्॥ कारिकायां॰ प्रदक्षिणं परिभ्राम्य प्रागुदीच्यां समुत्सृजेत्॥
वृषं वत्सतरीयुक्तं ततस्तमनुमंत्रयेत्। धर्मोऽसि त्वं चतुष्पादश्चतस्रस्ते प्रियाः शुभाः। एता हि पोषणार्थाय
पयो स्रष्टास्त्वया सह॥ धर्मस्त्वं वृषरूपेण जगदानंदकारक॥ अष्टमूर्तेरधिष्ठानमतः शांतिं प्रयच्छ मे। त्व
यि मुक्ते क्षयाल्लोका मम संतु निरामयाः॥ वृषोत्सर्गनिमित्तं त्रिप्रभृति द्विजभोजनं॰। अनेन विधिना यस्तु वृष
स्योत्सर्गमाचरेत्॥ समोदनेनाकपृष्ठे भुवि तस्य विचेष्टितैः॥ ब्रह्मपुराणे॥ अथ वृत्ते वृषोत्सर्गे दाताच

१पत्रगमकंछे

शिवप्रियाः। तान्वाहयंति ये मूढाः पापाचारा नराधमाः। ते महाप्रलयं यावद्दृशेषनरकादिषु॰ पच्यंते विविधैर्घोरैः
पत्नीपुत्रादिसंयुताः॥ राजश्च विषये यस्य जनाय त्र नराधमाः। वाहयंति वृषं पापाः पापं तस्यापि तत्समं॥ तस्मान्निवा
रयेद्राजा वाह्यमानांश्च तान्वृषान्॥ देवीपुराणे॰ एवं कृत्वाश्ववाप्नोति फलं वाजिमखोदितं॥ यमुद्दिश्योत्सृजेद्वृषं स
लभेत्ताविवारणाल॥ एवं वृषोत्सर्गविधिं नरो यः करोति भक्त्या निजपूर्वजानां॥ उद्धृत्य तान्दुर्गतिपंकमग्नान्स्वयं स लोकं
समुपैति शंभोः॥ भविष्योत्तरे॥ ॥ स्वेच्छाविहारिणां वृषभं गर्जितं सुखदं गवां॰ वक्रं ज्ञिनं यूथपतिं ध्यनामुंचंति गोवृषं॥ वृ
षोत्सृष्टः पुनात्येव दशातीतान्दशापरान्॥ यत्किंचित्स्पृशते तोयं समुत्तीर्य जलान्महीं॥ वृषोत्सृष्टे पितॄणां च तदक्ष
य्यमुदाहृतं॰ यैश्च यैश्च स्पृशेत्तोयं लांगूलादिभिरंततः॥ सर्वं तदक्षयं प्रोक्तं भवत्येव न संशयः। शृंगैः खुरैर्वा यद्भूमि
मुल्लिखत्यनिशं वृषः॥ मधुकुल्याः पितॄंस्तस्य अक्षय्यास्ते भवंति वै॰ सहस्रनयनमात्रेण तडागे न यथा क्रतिः॥ पि
तॄणां या भवेत्तृप्तिस्तां वृषस्त्वतिरिच्यते॥ यो ददाति तिलैर्मिश्रांस्तिलान्वा श्राद्धकर्मणि॥ मधु वा नीलखंडं वा अक्षय्यं स
र्वमेव तत्॥ नीलखंडो नीलवृषः॥ यद्भूमिमालिखति शृंगखुरैः सदर्पो यद्वा करोति॥ प्रतिमल्लवृषान्निरीक्ष्य॥ क्रान्तं समम

१

देव॰ ५६ 56

स्तामपितत्स विवाहकर्तुः संतोषमावहति शाक्रसभागतस्य॰ उत्सृष्टो वृषभो यस्मिन्पिबत्यथ जलाशये॰ शृंगेणोल्लिख
तो भूमिं यत्र क्वचन दर्पितः। पितॄणामन्नपानादि प्रभूतमुपतिष्ठते॥ मात्स्यपु॰॥ एवं वृषं लक्षणसंप्रयुक्तं गृहोद्भवं क्रीत
मथापि राजन्॥ मुञ्चान् धीमान् मरणं महात्मा मोक्षे विधिं वा महतीं व्यवस्येत्॥ आदित्य॰पुरा॰ यावन्ति रोमकूपानि वृ
षभस्य भवन्ति वै॰ गवां चैव यथालोम यावच्छूपति वै मुने॰ तावत्कोटिसहस्राणि रुद्रलोके महीयते॥ यत्किंचित्कुरुते पापं
पुरुषो वृत्तिकर्शितः॥ तत्सर्वं विलयं याति गोपतेः परिमोचनात्॥ वृषभस्यैव शाह्नेन पितरः सपितामहः॥ आलंबमाला
दृश्यन्ते स्वर्गलोके न संशयः। जले प्रक्षिप्य लांगूलं तोयं चोद्धरते वृषः॥ दशवर्षसहस्राणि पितरस्तेन तर्पिताः॥ कूले समु
त्क्षिप्ता यावच्छृंगे तिष्ठति मृत्तिका॥ भक्ष्यभोज्यमयैः शृंगैः पितरस्तेन तर्पिताः॥ गवां मध्ये यदा चैव वृषभः क्रीडते वृषः। अप्सर
सां सहस्रेण क्रीडंते पितरः सदा॥ लांगूलमुत्सृजन् यावत्तोये संक्रीडते वृषः। अप्सरोगणसंघैश्च सेव्यंते पितरः सदा॥
देवीपुराणे॰ नीलकंठस्य लांगूले तोयमभ्युद्धरेद्यदि॥ षष्टिर्वर्षसहस्राणि पितरस्तेन तर्पिताः। मुक्तमात्रेण शृंगेण नी
लकंठेन मेदिनी॰ उद्धृतं यदि सुश्रोणि पंकं शृंगगतं भवेत्॥ बांधवाः पितरस्तस्य नाके ये च वसंति हि॥ उद्धृता नरकात्सर्वे पा॰ ५६

सोमंल्लोकं व्रजंति ते॥ नीलकंठस्य मुक्तस्य तस्य पुण्येन सुंदरि। षष्टिर्वर्षसहस्राणि षष्टिर्वर्षशतानि च॥ सोमल्लोके
भुभुंजंति सर्वे मृत्तरस्तं सदा॥ विष्णुधर्मोत्तरे॥ उत्सृष्टमात्रे वृषभे व्रजंति तृप्तिं परां तस्य पितामहा ये। यस्मिंस्तटा
के सलिलं तथा तैः पातुं समागच्छति तान् पितॄणां। दिव्यांबुपूर्णां सकलं महीपते लोके परे तृप्तिरिमं प्रयाति॥ सरिद्वरा
का विद्ययोपयाति तृष्णान्वितस्तस्य पितामहानां॥ तृप्तिं विधत्ते सरितां वरिष्ठा सुदीर्घकालं विमलांबुवाहा॥ दृष्टे
ण पूर्णां सविषाणघातैर्दूरां पदाहारयतेन रेकुः॥ पदंस्तदात स्यात् दन्त्रकूटं ध्रुवं लभंती ति न संशयोत्र। रोम्णां च तुल्या
नि शतानि राजन्नूमो क्षात यात स दिव प्रयाति॥ संवत्सराणां परिपूर्णकामः संसेव्यमानस्त्रिह शांगनाभिः॥ इति
वृषोत्सर्गविधिः॥ अथ षोडशश्राद्धानि तेषु प्रसिद्धानां प्रेतश्राद्धानां कालः। सं तत्र ब्रह्मपुराणे॰ त्वणां तु सक
दिहानां श्राद्धाः षोडश सर्वदा॥ चतुर्थे पंचमे चैव नवमैकादशे तथा॥ ततो द्वादशभिर्मासैः श्राद्धा द्वादश संख्यया
कर्तव्याः क्षितितस्मां तत्र विप्रांश्च तर्पयेत्॰ जातूकर्ण्यः। द्वादश प्रतिमास्यानि आद्यं षाण्मासिके तथा॥ सपिं
डीकरणं चैव इत्येतत् श्राद्धषोडशं॰ षाण्मासिके इत्यनेन विहितयोः श्राद्धयोर्निरूपणार्थमाह॥ एकाहेन तु षण्मा

सायदास्फरतिवात्रिभिः। न्यूनाः संवत्सरश्चैवसाताषाण्मासिकेतदा॥ एकेनाह्नात्रिर्वायदाषाण्मासाः न्यूनाःस्युः
देव. संवत्सरश्च॥ तदाषाण्मासिकाह्रिके श्राद्धं कार्येइत्यर्थः। भविष्यत्पुराणे० अस्थिसंचयनेश्राद्धेत्रिपक्षेमासिकानिव
५७ रिक्तयोश्चतथातिथ्योः प्रेतश्राद्धानिषोडश॥ रिक्तयोस्तिथ्योरित्येकेनाह्ना न्यूने षष्ठेद्वादशेचमासेइत्यर्थः॥ तथाचपै
57 ठीनसि॥ षाण्मासिकाह्रिकेश्राद्धेसांवत्सरिकं वैधरेवतं॥ मासिकानित्स्वकीयेतुदिवसे द्वादशापिच॥ तथाच॥ सपिंडीकर
णादर्वाक्कुर्याच्छ्राद्धानिषोडश॥ एकोद्दिष्टविधानेनकुर्यात्सर्वाणितानिच॥ ब्रह्मपुराणे० द्वादशेहनिमासेचत्रि
पक्षेवततःपरं॥ मासिमासिचकर्तव्यंयावदासंवत्सरं द्विजाः॥ ततः परतरंकार्यंसपिंडीकरणंक्रमात्० कृतेसपिं
डीकरणेपार्वणंप्रोच्यतेपुनः॥ ततः प्रभृतिनिर्मुक्तः प्रेतत्वात्पितृतांगताः॥ षोडशश्राद्धानांनानाविधाविकल्पाः।
शाखाभेदेनयथादेशंयथाकुलाचारंवाव्यवस्थिता॥ विज्ञेयाइतिमदनपारजातकारः॥ व्याघ्रपादः। एकादशे
चतुर्थेचमासिमासिवत्सरं॥ प्रतिसंवत्सरंचैवमेकोद्दिष्टंमृताहनि॥ क्षयाणितुप्रकुर्वीतविशेषमाह॥ कात्यायनः
श्राद्धमथिमतःकार्यंद्वादशाहेकादशेहनि॥ क्षयाणितुप्रकुर्वीतप्रमीताहनिसर्वदा॥ त्रैपक्षिकाहद्वंनिक्षयाणि राम०
५७

अत एव ज्ञातृकर्णः॥ ऊर्ध्वं त्रिपक्षाद्यच्छ्राद्धं मृताहन्येव तद्भवेत्॥ अधस्तु कारयेद्दाहादाहिताग्नेर्द्विजन्मनः॥ याज्ञ
वल्क्यः॥ अनग्निमतउत्क्रान्तेः साग्नेः संस्कारकर्मणः॥ हारीतस्त्वेवमर्थविषये मासिकानां कालविकल्पानाह॥ षु
ष्ट्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति। द्वादशाहेन वा भोज्यमेकाहे द्वादशापि वेति॥ अत्रोपरितने प्रकरणे दृष्टा
त्रुपंक्तितायां सपिण्डीकरणापकर्षणं वक्ष्यते॥ तन्निबंधनं तु मासिकानामपकर्षं तत्रैव वक्ष्यामः। द्वादशापि वेति द्वा
दशाग्रहणं षोडशानामुपलक्षणं॥ न्यायस्य तुल्यत्वात्॥ आद्यं रुद्रमिते अर्कसंमित दिने वास्यात् द्वितीयादिकं मा
सादौ प्रतिमासमत्ययतिथिष्वेकेन वाह्ना त्रिभिः। हीने षष्ठादिमषष्टमानुषु तथा मासेषु पक्षत्रये चैवं षण्णवमिअका
णि दश चैकोद्दिष्टानि चरेत्॥ श्राद्धानीति। आद्यं मासिकं रुद्रसंमित दिने एकादशाहिने अर्कसंमिते द्वादश दिने वास्या
त् भवेत्॥ द्वितीयादिकं प्रतिमासं मासादौ अत्ययतिथिषु मृतदिनेषु स्यात्॥ तथा एकेन वाह्ना त्रिभिर्वा न्यूने षष्ठादि
मषष्टमानुषु मासेषु॥ ऊनमासिकं ऊनषाण्मासिकं ऊनाब्दिकं च॥ एकेनाह्ना दिवसेन त्रिभिर्वा दिवसैर्न्यूनेषु आ
द्यषष्ठद्वादशमासेषु स्यात्॥ पक्षत्रये च त्रैपक्षिकं सार्द्धमासे स्यात्॥ एवं षड्दश च श्राद्धानि षोडश श्राद्धानि। नवमि

प्रकाणि॥ पूर्वोक्तनवश्राद्धसहितानि॥ षोडशश्राद्धानि नवश्राद्धानि चैकोद्दिष्टरीत्या चरेदित्यर्थः॥ ॥कालादर्शे॥ ॥
देव० मासिकनिर्णयमाह॥ एकादशे ह्निमास्यूने आद्ये षष्ठे तथान्तिमे॥ प्रतिमासं मृते ह्न्यब्दं स्यात्त्रिपक्षे च षोडश॥ एकादशे
५८ ह्नि मरणादेकादशेहनि अब्दशब्दसमभिव्याहारादन्तिमशब्देन संवत्सरान्तिमो मास उच्यते॥ आद्ये मास्यूने षष्ठे मास्यूने
संवत्सरान्तिमे मासि द्वादशे मास्यूने अब्दमिति कालाध्वनोरिति द्वितीया। संवत्सरसमाप्तिपर्यन्तं प्रतिमासं मासं मासं प्रति
58 मृतेहनि मरणाहिने त्रिपक्षे च मरणाहिनात्तृतीये पक्षे च षोडशमासिकाख्यानि श्राद्धानि स्युः। एतेषु षोडशसु कालेषु
षोडशमासिकानि कार्याणीत्यर्थः॥ तदाह याज्ञवल्क्यः॥ मृतेहनि तु कर्तव्यं प्रतिमासं तु वत्सरं॥ प्रतिसंवत्सरं चैवं
माद्यमेकादशेहनीति॥ गालवस्मृ० ऊनषाण्मासिकं षष्ठे सार्द्धे न्यूनमासिकं॥ त्रैपक्षिकं त्रिपक्षे सार्द्धे न्यूनाब्दं द्वादशे
तथेति॥ एतान्येव षोडशमासिकाख्यानि श्राद्धानि॥ तदाह जातूकर्ण्यः॥ द्वादशप्रतिमास्यानि आद्यषाण्मासिके
तथा॥ त्रैपक्षिकाब्दिके चेति श्राद्धान्येतानि षोडशेति॥ आद्यषाण्मासिकशब्दात् ऊनषाण्मासिको नाब्दिकपरः॥
एकादशाहिके नाद्येन सह द्वादशप्रतिमास्यानि॥ व्यासस्मृ॥ द्वादशाहे त्रिपक्षे च षाण्मासे मासिकाब्दिके॥ श्राद्धानि राम०

षोडशैतानि संस्कृतानि मनीषिभिरिति॥ द्वादशाहे विहितमूनमासिकं। षाण्मासे ऊनषाण्मासे विहितमूनषाण्मासिकं
मासिकं प्रतिमासं मृताहे विहितमेकादशाहिकमाद्यं च। आह्निकशब्दऊनाह्निकपरः। नन्वूनमासिकस्य कथं द्वाद
शाहिकत्वं। मासि किंचिदूने विहितत्वात्॥ उत्तरं। द्वादशाहे मासि किंचिदूने विहितत्वात्॥ तदाह गोभिलः॥ मरणा
द्द्वादशेऽह्नि स्यान्मासेऽन्यूने वोनमासिकमिति॥ विश्वादर्शेऽपि॥ मासेषु यदेकादशस्तु मृतदिने ब्वाद्यमेकादशाहेऽन्यूनाद्वे
य तदर्द्धं यदपि तदपरं द्वादशाहे त्रिपक्षे॥ इति॥ एकादशास्तु विप्रेषु प्रेतमावाह्य भोजयेत्॥ तत्राघाय च शय्यादि
दद्यादाद्यमिति स्मृतं॥ पूर्वोक्तमेकादशपदमत्रानुवर्त्तते॥ एकादशेऽह्नि एकादशास्तु विप्रेषु प्रेतमावाह्य तानेकादशवि
प्रान्भोजयेत्॥ तेषां मध्ये त्राघाय प्रथमं प्रक्षालितपादाय शय्यादि प्रेतशय्यादि दद्यात्॥ आदिशब्दाद्वाहो हिरण्यप
दास्फपानक्षत्रदक्षिणोदकुंभानामुपसंग्रहः॥ इत्येवमाद्यं स्मृतं॥ स्मृतिकारैरिति शेषः॥ तदाह सत्यव्रतः॥ एकादशे
ऽह्नि प्रातरुत्थाय प्रेतार्थमेकादश ब्राह्मणानामन्त्र्य मध्याह्ने तान्भोक्त्वान्तरसविन्यासेराशयित्वा विधिवत् पिंडदानं वाहो
हिरण्यपदास्फपानक्षत्रोदकुंभदक्षिणायुतं वृत्तिविप्रे पात्रे दद्यात्॥ शय्यां च॥ ततः स्वस्त्ययनादि धर्माः प्रवर्त्तंते इति।

देव अत्रिरपि ॥ प्रेतार्थं तत्कांतेषु ब्राह्मणान् भोजयेद्दश ॥ आद्यश्राद्धनिमित्तेन वैकमेकादशेऽहनि ॥ एकादशेऽह्न्याद्य
५९ श्राद्धनिमित्तेन प्रेतमुद्दिश्य दश ब्राह्मणानेकं च ब्राह्मणं भोजयेत् ॥ एकादश ब्राह्मणान् भोजयेदित्यर्थः ॥ आद्यमासि
कमेकादशाहवृत्तमिति तात्पर्यं । अयं पक्षः सर्वसंमतः ॥ परमतमनूद्य दूषयति । द्वितीयादिषु मासेषु मृतेऽहन्यादिमा
59 सिकं ॥ एकादशाह्निकं श्राद्धमन्यदेवेति केचन ॥ तन्न संख्याविरोधात्तद्वमासकालत्वबाधनात् ॥ सामान्यतद्धितांतोतः
शब्दो मासिक इत्यलं ॥ केचन व्याख्यातारो मासेऽतीते इत्येवं तद्धितोत्पत्तौ मासिकशब्दनिष्पत्तिरिति द्वितीयादिषु मासेषु
मृताहे आद्यादिमासिकं प्रथमे मासि अतीते द्वितीये मासि मृताहे आद्यमासिकं । द्वितीयमासे व्यतीते तृतीयमासे मृता
हे द्वितीयमासिकं ॥ एवं तृतीयादिमासिकानीति ॥ मासिकमिति जातावेकवचनं ॥ आद्यमेकादशेऽहनीत्येकादशाह्निय
श्राद्धं तदन्यदेव प्रेतत्वविमुक्त्यर्थं श्राद्धांतरं ॥ न तु मासिकरूपं ॥ आद्यशब्दोऽपि तत्कालान्तरकालविधानात् कर्तव्यश्राद्धा
नामादित्वादुपपद्यत एवेत्याहुः ॥ तन्न युक्तं । संख्याविरोधात् । द्वादश प्रतिमास्यानि श्राद्धानि षोडशैतानि इति संख्यावि
रोधात् ॥ मासानां कालत्वबाधनाच्च । मृतेऽहनि तु कर्तव्यं प्रतिमासं त्वत्र मासानां कालत्वं विहितं ॥ ततश्च प्रथममासि राम० ५९

कस्य प्रथमो मासः कालो द्वितीयमासिकस्य द्वितीयमासः कालः॥ एवं मासिकादीनां तृतीयादिमासाः कालाः। आद्यादिमा
सिकादीनां द्वितीयादिमासेष्वनुष्ठाने स्वकालविधिर्बाध्यते॥ ननु त्रैपक्षिकमपि वृत्ते त्रिपक्षे तदनंतरमिति वचनात्कथं।
उत्तरं तस्यायमर्थः। वृत्ते प्रवृत्ते इत्यर्थः। निर्णयामृते॥ वृत्ते इति न निवृत्ते इत्यर्थः। किं तर्हि प्रवृत्ते इति॥ तदाह कार्ष्णाजि
निः। त्रैपक्षिकं त्रिपक्षे स्यान्मृताहे वितरणादिति। किंच॥ आद्यश्राद्धस्य श्राद्धांतरत्वे मासिकव्यपदेशो न स्यात्॥ अस्ति
च सः। अतो मासिक इत्ययं शब्दः सामान्यतद्धितांतः। तत्र भव इत्यर्थे सामान्येनाण्प्रत्ययः प्रत्याविहितास्तेन वक्ष्यत्ययः
।ठस्यैकादेशे मासिकशब्दनिष्पत्तिः। ननु प्रथमे द्वितीये द्वितीयादौ मृताहे कथमाद्यानुष्ठानं० उत्तरं। तत्राह्निकानुष्ठा
नं। प्रथमोद्दिष्टे आह्निकविधानाभावात् अतो द्वितीयाद्युद्दिष्टेषु द्वितीयाद्याह्निकान्येवानुष्ठीयंते। तेषामुत्तरोत्तराह्निका
नि प्रथमद्वितीयादिभावइत्यलमतिप्रसंगेन॥ नन्वाद्यमेकादशेहनीति वक्तुमयुक्तं॥ किंचाशौचानंतरदिन इति व
क्तव्यं। क्षत्रियवैश्यशूद्राणामेकादशेहन्याद्यकरणासंभवात्॥ अथ कथं संभव इति चेत्॥ शुचिना कर्म कर्तव्य
मिति शुचिनाधर्म्यकर्मकरणविधानात्॥ ननु एकादशे क्रियते। आद्धं कर्तव्यमिति प्रतीयते॥ मैवं। तस्य वचनस्य

५

देव० यमर्थः। एकादशे क्रियतश्राद्धं विहितं तदेकादशाह्नः शुद्धत्वेन ब्राह्मणस्यैव न भवति किंच तु र्णामपि वर्णानां साधार
६० णं॥ एकादशाहशब्दस्सूतकानंतरदिनोपलक्षकत्वादिति॥ ननु॥ आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि।
60 ।कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव सः। नवं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि॥ कर्तुस्तात्कालिकी शुद्धिरशु
द्धः पुनरेव स इति शंखलौगाक्षिवचनाभ्यां क्षत्रियादेरप्याद्यमेकादशेहनि प्रतीयत इति नोपलक्षकत्वं। मैवं। मातर्य
ग्रे मृता यामाशौचे पितृमरणे पितरि पूर्वं मृते आशौचे मातृमरणे वा वचनद्वयस्योपपन्नत्वात्॥ अथ क्षत्रियादि
विषये उपपद्यत इति चेत्। न। वचनद्वयस्य संकोचापत्तेः। किंच। अथाशौचापगम इति सामान्येनोपक्रमस्य विष्णु
नाएकोद्दिष्टविधानादुपलक्षकत्वं प्रतीयते॥ अथ दशाहाशौचविषये थेतदुपपद्यत इति चेत्। न। वचनसंकोचाप
त्तेरेव॥ तस्मादेकाहशब्दः सूतकानंतरदिनोपलक्षकः। मैवं॥ आद्यमेकादशेहनीति अनेनाद्योद्देशेनैकादशाहः
कालत्वेन विधीयते। न तु न विक्षेपपरः शब्दार्थ इति न्याये परिपंथिन्येकादशाहशब्दस्योपलक्षकत्वं न शक्यते वक्तुं॥ अ
थ क्षत्रियादिविषये श्रुचिलांगवाध इति चेत्॥ नैष दोषः॥ मातरि पूर्वं मृता यो माशौचे पितरि पूर्वं मृते आशौचे मातरि राम०

६०

मृतायामशुचित्वबाधस्य तुल्यत्वात्॥ अथ कर्तुस्तात्कालिकी शुद्धिरिति न्यायेन शुद्धिरस्तीति चेत्॥ तुल्यं क्षत्रियादिविष
यत्वेपि। एवं चैकादशेह्नि यच्छ्राद्धं तत्सामान्यशुद्ध्याहृतमित्यत्रापि एकादशाहकालिकत्वेनाद्यं चातुर्वर्ण्यसाधारणत्वेन
विहितं। आद्यं श्राद्धमशुद्धोपि दद्यादिति वचनद्वयस्यापि विशेषविषयत्वस्वीकारेण संकोचो न कृतो भवति॥ अथाशौचाप
गम इति विष्णुवचनमपि न्यायतो दशाहाशौचविषय एवावतिष्ठते। किंच। अथाशौचापगम इति वचनेनाशौचापगमे
एवोद्दिष्टमिति विधातुं न शक्यते॥ आशौचमध्येपि नवश्राद्धानामेकोद्दिष्टानां विद्यमानत्वात्॥ अत्र आशौचमध्ये नव
श्राद्धाद्यात्मकमेकोद्दिष्टमाशौचापगमे त्वाद्यश्राद्धाद्यात्मकमेकोद्दिष्टं कर्तव्यमिति तस्य वचनस्यार्थ इति न विरोधः॥
तस्मादाद्यमेकादशेहनीति युक्तं॥ ननु यदा संवत्सरादर्वागेव सपिंडीकरणं क्रियते॥ तदा षोडशश्राद्धानि अकृत्वैव
कार्यं। त्रैपक्षिकादिकालनियमादित्यत्राह। अथवात्तानि कुर्वीत सपिंडीकरणादधः। अथवेति पक्षांतरे॥ अथवाता
नि षोडश श्राद्धानि सपिंडीकरणादधः पूर्वं कुर्वीत॥ तदाह लौगाक्षिः। श्राद्धानि षोडशापाद्य विदधीत सपिंडनमिति
। पैठीनसिश्चापि॥ अर्वाक्सपिंडीकरणाच्छ्राद्धान्येतानि षोडशेति॥ गोभिलः। श्राद्धानि षोडशादत्वा नैव कुर्यात्स

६

देव॰ न्त्रपिंडतामिति॥ अतः सपिंडीकरणात्पूर्वकालिकान्यपि यद्वा संवत्सरात्स्वर्वाग्विषोडशश्राद्धानि कृत्वा सपिंडीकरणं कृतं
६१ तदा तानि पुनः कार्याणि न वेति जिज्ञासायामाह॥ सापिंड्ये त्वादधस्तानि कुर्यात्काले स्वके पुनः। अर्वाक्संवत्सरात्पूर्वं
सापिंड्ये तानि षोडशश्राद्धानि स्वके स्वसंबंधिनि काले पुनः कुर्यात्॥ तदाहांगिराः। यस्य संवत्सरादर्वाग्विहिता तु
सपिंडता। विधिवत्तानि कुर्वीत पुनः श्राद्धानि षोडशेति विधिवत्पार्वणविधिवत्॥ तान्याद्यादीनि॥ कार्ष्णाजिनिः
61 । अर्वागब्दाद्यत्र यत्र सपिंडीकरणं कृतं। तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिः। यत्र यत्र त्रिपक्षत्रिमासषण्मासा
ब्दिके काले। तत्कालादूर्ध्वं नामेवाकाले कृतानां पुनः क्रिया न स्वकाले कृतानां॥ गरुडपुराणे॰ कृतस्य करणं नास्ति
प्रेतकार्यादृते पुनः। चेत्करोति नरः सम्यक्कृतं पूर्वं विनश्यति॥ मृतस्यैव पुनः कुर्यान्नेतत्पितृव्रजेत्स्थिरं॥ अर्वाग्द्व
कारणात् तपक्षिराजसपिंडत्वं चेत्करोति पुत्रः। तथापि मासं प्रति पिंडमेकमन्नं सकुंभं सतिलं च दद्यात्॥ आद्यषष्ठ
द्वादशमासेषूनमासिकानि कुर्यादित्युक्तं कियंतो नेश्चितत्वाशंक्याह॥ त्रिभिर्हीनाद्यमासस्तु तैकेन मासस्य ज्ञोनेन मासिकं॥ राम॰
ऊनषाण्मासमूनाब्दमन्येनैव समाचरेत्। त्रिभिरहोभिरूनतद्वा स्यान्मासस्तैकेनाह्ना ऊनमासिकं ऊनषाण्मासिकमन्ना ६१

द्वेसमाचरेत्॥ कुर्यात्॥ तदाह गोभिलः। त्रिभिर्वा दिवसैरूनमेकेनाह्नितयेन वा॥ अद्यादिषु च मासेषु कुर्यादूनाब्दिकं द्विज
इति। आद्यादिषु आद्यषष्ठद्वादशेषु ऊनाब्दिकोनषण्मासिकोनमासिकं॥ आपद्यनग्नौ तीर्थे च प्रवास इति वचनेनाप
दा हा वा मश्राद्धप्रसक्तावाह। अन्नेनैवेति॥ अन्नेनैव मासिकानि कुर्यान्नामेन॥ तदाह हारीतः॥ श्राद्धविघ्ने द्विजातीनामा
मश्राद्धं प्रकीर्तितं। अमावास्यादिनियतं मासमांवत्सरादृत इति॥ मासं मासिकं॥ सांवत्सरं मृताहे प्रत्याब्दिकं॥ पक्षांतरमा
ह त्रिभागशेषे मासेषु कुर्यादिति हि केचन॥ तृतीयो भागस्त्रिभागः सशेषो यस्येति विग्रहः। विंशतिदिनेष्वगतेषु कु
र्यादित्यर्थः॥ तदाह श्लोकगौतमः। एकद्वित्रिदिनैरूने त्रिभागेनोन एव वा॥ आद्यान्यूनाब्दिकादीनि कुर्यादित्याह गौतम
इति॥ त्रैपक्षिकं प्रत्याह। त्रैपक्षिकं त्रिपक्षे तु प्रवृत्ते विषमे दिने॥ मासिकान्यपि चान्यानि अष्टाविंशतिमे दिने त्रि
पक्षे प्रवृत्ते त्रैपक्षिकं भवेत्॥ चकाराद् ऊनत्रैपक्षिके उक्तनियमं मासिकेष्वतिदिशति॥ ऊनमासिकान्यपि विषमे दिने भवे
युः। यदा नक्षत्राद्यानुकूल्याद् दिनद्वयोनः पक्षः तदा अष्टाविंशतितमे दिने वा ऊनमासिकानि भवेयुः। ऊनमासिकानि
ऊनमासिकोनषाण्मासिकोनाब्दिकानि॥ तदाह कार्ष्णाजिनिः। ऊनान्यूनेषु मासेषु विषमाहे समेऽपि वा। त्रैपक्षिकं त्रि

द्वै० पक्षे स्यान्मृताहे त्वितराणि त्विति॥ भविष्यत्पुराणेपि॥ षष्ठे वा एकमासिकं कुर्याद्द्वादशे मासि चाब्दिकं॥ त्रैपक्षिकं भवे
६२ द्वृत्ते त्रिपक्षात्तदनंतरमिति॥ वृत्ते पवित्र इत्यर्थः। सपिंडीकरणादूर्द्धं माग्वा केन विधानेन कार्याणीत्यत्राह॥ एकोद्दिष्ट
विधानेन सपिंडीकरणादधः। कुर्यादूर्द्धं पार्वणेन विधिना मासिकानि तु। सपिंडीकरणादधः पूर्वमेकोद्दिष्टविधा
नेन मासिकानि कुर्यात्॥ सपिंडीकरणादूर्द्धं पार्वणेन विधिना कुर्यात्॥ तदाह पैठीनसिः॥ सपिंडीकरणादर्वाक् कु
र्याच्छ्राद्धानि षोडश॥ एकोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि तु। सपिंडीकरणादूर्द्धं यदा कुर्यात्तदा पुनः। प्रत्यब्दं
यो यथा कुर्यात्तथा कुर्यात्सुतान्यपीति॥ मासिकेष्वेव विशेषमाह॥ त्रिपक्षात्पूर्वतः साग्नेर्भवेत्संस्कारवासरे ऊर्द्धं
मृतदिने नग्नेः सर्वाण्येव मृताहतः॥ साग्नेराहिताग्नेस्त्रिपक्षात्पूर्वतः सर्वत्र कर्तव्यं मासिकं द्वितीयमासिकं संस्कारवा
सरे दाहवासरे भवेत्॥ अधस्त्कारयेद्दाहादाहिताग्नेर्द्विजन्मनः॥ इति मासिकानि मृतदिने भवेयुः। अनग्नेरनाहिता
ग्नेः सर्वाण्येव मासिकानि मृतदिने भवेयुः। मृताहत इति समस्यार्थे तसिल्॥ तदाह जातूकर्ण्यः। ऊर्द्धं त्रिपक्षाद्यच्छ्राद्धं राम०
मृताहन्येव तद्भवेत्॥ अधस्त्कारयेद्दाहादाहिताग्नेर्द्विजन्मन इति॥ मासिकेष्वेव विशेषमाह॥ आपद्याद्यकृतं तत्तु कुर्या ६२

62

वृद्धिर्मृताहतः। आदिशब्दाद्दाहाशौचोपसंग्रहः। आपदादिना अकृतं अन्तरितं यन्मासिकं तद्वृद्धिर्मृताहतः उत्तरमासमृ
ताहे कुर्यात्॥ तथाह ऋष्यशृंगः। एकोद्दिष्टे तु संप्राप्ते यदि विघ्नः प्रजायते॥ मासेऽन्यस्मिंस्तिथौ तस्यां कुर्यादन्तरितं भवे
दिति। एकोद्दिष्टमुभयमासिकोपलक्षणं। अन्तरितं मासिकं तदुत्तरमासमृताहे कुर्यादित्यर्थः॥ अत्रैव विशेषमाह
आद्यं कुर्याद्द्विजेग्नौ वा कुर्यात्पुनरपि द्विजे। आद्यं श्राद्धं द्विजे कुर्यात्। द्विजमाहवनीयकं कृत्वा कुर्यादित्यर्थः। अग्नौ
वा आद्यं कुर्यात्। अग्नौ प्रेतमुद्दिश्य पञ्च जुहुयादित्यर्थः। ब्राह्मणभोजयित्वाग्नौ कृत्वा पुनरपि द्विजे आद्यं कुर्यात्। एत
त्संवत्सरादर्वाक् सपिण्डीकरणविषयं॥ तथाह गालवः॥ अर्वाक्संवत्सराद्यस्य सपिण्डीकरणं कृतं॥ षोडशानां द्वि
रावृत्तिं कुर्यादित्याह गौतमः इति॥ गोभिलोपि॥ ब्राह्मणान्भोजयेदाद्ये होतव्यमनलेथवा॥ पुनश्च भोजयेद्विप्रं द्विरावृत्तिर्भवे
दिति। अत्रैव विशेषमाह॥ वृद्धौ तान्यपकृष्यापि कुर्यात्तन्मृतवासरे। वृद्धिः शुभं। वृद्धावुपस्थितायां तानि मासिका
न्यपकृष्यापि कुर्यात्। तत्तद्विहितकालादाकृष्य वृद्धेः पूर्वं कुर्यादित्यर्थः। कुत्र तन्मृतवासरे॥ तस्य मृतस्य मृतवा
सरे। मरणदिने॥ ननु मासिकानामपकर्षविधिर्व्यर्थः॥ अत्र प्रेतसंस्कारकार्याणि यानि श्राद्धानि षोडश। मध्ये

देव॰ ६३ 63

कालं तु कार्याणि नान्यथा स्युच्यते ततः। इति हारीतवचनाद्यथाकालमेवानुष्ठानप्रसक्तौ अयं वृद्धिनिमित्तोपकर्षवि
धिः सार्थ इति चेत्॥ न। वृद्धौ सपिंडीकरणापकर्षविधानाद्देवविहिततत्पूर्वकानां मासिकानामप्यपकर्षसिद्धेः।
अतो निरर्थक एव। मैवं यदा संवत्सरादर्वाक्सपिंडीकरणं कृतं तदा मासिकानां पुनरावृत्तिविधानात्। अतो य
थाकालमनुष्ठानप्राप्तौ अयमपकर्षविधिः। समर्थ एव॥ तदाह शाट्यायनिः॥ सपिंडीकरणादर्वागपकृष्य कृ
तान्यपि। पुनरप्यपकृष्यंते वृद्ध्युत्तरनिषेधनात्॥ इति निषेधश्च कात्यायनेनोक्तः। निर्वर्त्य वृद्धितंत्रं तु मासिका
नि न तंत्रयेत्॥ अयातयामं मरणं न भवेत्पुनरस्य तु इति॥ अयातयामं नवं। वृद्धिनिमित्तं कर्म कृत्वा यदि मासिका
नि कुर्यात्॥ तथा चास्य यातयामं नवं मरणं पुनर्भवेदित्यर्थः। यदि कुर्यात्तदा नूतनं मरणं भवेदिति तात्पर्यं॥
शाट्यायनोपि॥ प्रेतश्राद्धानि शिष्टानि सपिंडीकरणं तथा॥ अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः। इति। त
था। अंतरे त्वेव यो वृद्धिं अप्रेतश्राद्धानि कर्षति। स श्राद्धी निकरे घोरे पितृभिः सह मज्जतीति॥ अतः सपिंडीकर
णादर्वागूर्ध्वं च मासिकानामप्यपकर्ष इति सिद्धं। अत्रैव विशेषमाह॥ त्रिपुष्करे च नंदासु दर्शे भार्गववासरे। राम॰ ६३

चतुर्दश्यांनकुर्वीतजन्मनित्रीणिवह्निभे॥ त्रिपुष्करशब्दांतर्गतिद्विपुष्करमप्युपलक्षयति। द्वितीयासप्तमीद्वादशीनां
भद्रातिथीनांपुनर्वसूत्तरफाल्गुनीविशाखोत्तराषाढपूर्वाभाद्रपदनक्षत्राणांभानुभौमशनैश्चरवाराणांचमेलनेत्रिपु
ष्करं। द्विमेलनेद्विपुष्करं। नंदाः प्रतिपत्षष्ठ्येकादश्यः भार्गववासरः। वह्निभंकृत्तिकानक्षत्रं। त्रीण्येतानिजन्मा
सिकोनषाण्मासिकोनाब्दिकानि। त्रिपुष्करनंदादश्शुक्रवारचतुर्दशीकृत्तिकास्तुत्रीण्येतानिनकुर्वीत॥ तदाहगार्ग्यः
नंदायांभार्गवदिनेचतुर्दश्यांत्रिपुष्करे। ऊनश्राद्धंनकुर्वीतगृहीपुत्रधनक्षयात्॥ मरीचिः। त्रिपुष्करेचनंदासुसि
नीवाल्यांभृगोर्दिने॥ चतुर्दश्यांचनोनानिकृत्तिकासुत्रिपुष्करइति॥ मदनपारिजातनिर्णयामृतमाधवीयनिबंधे
ष्वप्येवमासिकानांनिर्णयउक्तोस्ति॥ स्मृतिरत्नावल्यां॥ मासिकानिदशैकंवाद्येह्नुत्र्यर्द्धमासिकं॥ ऊनाब्द
मूनषाण्मासमेतच्छ्राद्धानिषोडश॥ आद्येह्नीतिएकादशाहद्वादशाहश्राद्धाख्येइत्यर्थः। अर्द्धमासिकंत्रैपाक्षि
कं। ऊनार्द्धाब्दोनषण्मासदक्षिणउच्यते। तत्रकाठः। सार्द्धएकादशेमासिसार्द्धेचपंचमेतथा॥ ऊनाब्दिकोनषण्मा
सेभवेताश्राद्धकर्मणि॥ एकादशाहाद्यःषोडशांतःपातित्वंसंवत्सरसपिंडीकरणपक्षएव। अन्यथातुकेवल

८

द्वै०
नवश्राद्धता॥ उभयथाकरणं तु पृथगेवेति॥ अथैकादशाहिकादीनां श्राद्धानां प्रयोगः। तत्र कूर्मपुराणे॥ ॥

६४
एकादशेऽह्नि कुर्वीत प्रेतमुद्दिश्य भावतः॥ द्वादशेऽह्नि कर्त्तव्यं मनिर्घेयथवाहनि एकं पवित्रमेकोऽर्घः पिंडपात्रं तथै

व च एवं मृताह्नि कर्त्तव्यं प्रतिमासं च वत्सरं॥ एकादशाहे यच्छ्राद्धं नवकं तत्र कीर्त्तितं॰ सपिंडने च यच्छ्राद्धं तत्स

पिंडनकं विदुः। एकादशाहो द्वारभ्य प्रेतोद्देशेन याचितं॥ चतुष्पथे त्यजेदन्नं पुनः स्नानं समाचरेत्॥ एकादशाहे

64 दाहस्य दद्यात्पिंडं समंत्रकं॥ सिद्धान्नं तत्प्रदातव्यं कुशतापप्रकादश्यः(?)॥ प्रक्षाल्य विप्रचरणं वर्धक्षुपं च दीपकं।

गृहद्वारसमीपे तु दक्षिणामुखमासनं॥ द्वादश प्रतिमास्यानि श्राद्धान्येकादशे तथा॥ त्रिपक्षसंभवं चैव द्वे रिक्ते षण्मासोड

शेति गरुडपुराणे॥ पद्मपुराणे॥ ततस्त्वेकादशाहे तु द्विजानेकादशैव तु॰ गोत्रादिमृतकांते च भोजयेद्दयुतो द्विजा

न्। द्वितीये तु पुनस्तद्वदेकोद्दिष्टं समाचरेत्॥ आवाहनाग्नौकरणं दैवहीनं विधानतः। एकं पवित्रमेकोऽर्घ एकः पिंडो

विधीयते॥ उपतिष्ठतां तेइति देयं पश्चात्तिलोदकं॥ स्वदितं विकिरे ब्रूयाद्विसर्गे चाभिरम्यतां॥ शेषं पूर्ववदत्रापि कार्यं राम०

वेदविदो विदुः॥ अनेन विधिना सर्वमनुमासं समाचरेत्॥ ब्रह्मपुराणे॰ तृतीयेहनि कर्त्तव्यं प्रेतदाहो वनो(?) द्विजः। स ६४

तकांते द्वादशाहे स्यादाद्यमेकोद्दिष्टं समाचरेत्॥ द्वादशेऽहनि मासे च त्रिपक्षे च ततः परं० मासि मासि च कर्तव्यं यावत्संवत्सरं द्विजः
मार्कंडेयपुराणे। मृताहनि तु कर्तव्यमेकोद्दिष्टं शृणुष्व तत्॥ दैवहीनं तथैकार्घं तथैवैकपवित्रकं॥ आवाहनं न कर्तव्यम
मग्नौकरणवर्जितं० प्रेतस्य पिंडमेकं च दद्यादुच्छिष्टसंनिधौ॥ तिलोदकं चापसव्यं तन्नामस्मरणान्वितम्॥ अक्षय्यम
मुकस्येति स्थाने चैवोपतिष्ठतां॥ इति ब्रूयात्प्रयत्नेन कर्ता विप्रविसर्जने। अभिरम्यतामिति ब्रूयाद्ब्रूयुस्तेऽभिरताः स्म हो
प्रतिमासं भवेदेतत्कार्यमावत्सरान्नरैः॥ बौधायनसूत्रे॥ अथैकोद्दिष्टेषु नाग्नौकरणं नाभिश्रावणं न पूर्वं न दैवं न धू
पं न दीपं न स्वधा न नमस्कारो नात्र रूपं। सर्वसिद्धं समानीयायुग्मान् ब्राह्मणान्स प्रक्षालितपादानप आचमय्य दर्भोप
स्तृतेष्वासने उपवेश्य सर्वस्मात्कृतस्य कृत्स्नमवदायाभिघार्य दक्षिणतो भस्मनि आनंगारान्निरूह्य तेषु जुहुयात्
प्रेतायामुष्मै यमाय स्वाहेति हुतमक्षतं च भवत्यमुष्मै त्वा अभिरस्त्विति तयां प्रतिग्रहणं विसर्जनं चामुष्मा उपतिष्ठ
त्विति स तु द्विरूपयेद्धे व पिंडान्नुत्पवेति संक्षालनं तृप्तिरस्त्विति विसर्जनमोक्षं तृप्तिरितीतरेषां प्रतिवचनं प्रेतस्य
द्वितीयाप्रभृति ब्राह्मणैरेकान्तरद्वद्धिर्दशाहादर्वाग् न वै विच्छिद्येतैकादश्यां श्राद्धं तृतीये पक्षे द्वितीयं संततमेके केनैका

दशमासान्नयेति तद्द्वादशमासमभ्यारोहंति॥ बौधायनः। एकोद्दिष्टंश्च एवस्याद्द्वादशेहनि वाधनः॥ अथवोर्द्ध्वमयुग्मेतु
कुर्वीताहः सुशक्तितः। अर्द्धमासेष्वमासेवाश्रातौ संवत्सरेपिवा॥ निमंत्रणं तु पूर्वेद्युर्द्दैवमश्नोकृतिस्तथा। नस्वधाश्रा
वणा धूपधूपदीपौ नमस्कृतिः। अग्निं समिध्य पर्युक्ष्य परिस्तीर्य च सादयेत्॥ दर्वीमौदुंबरीमाज्यस्थालीं च श्रवमेव च
पात्रीं च प्रोक्षणीं चैव तिलोदकधरं तथा॥ प्रोक्ष्यैतत्सद्विशेषान्नमानीयान्नं निरूप्य च॥ अधिश्रित्य च पर्यग्निकृत्वा
त्तहुभयं ततः। स्रुवं दर्वीं च संमृज्य पत्रं नमुद्वास्य धारितं॥ कृत्वा तिलोदकं पुंसां स्त्रीणां चोहितमंत्रवत्॥ पितृशद्दे क्षिपे
त्रेतं स्वधावर्जं तु सर्वतः। प्रेतमावाह्य विप्रांश्च समुपवेश्य निमंत्र्य च॥ असुष्मै तत्पितरस्त्वेवं तिलोदकमिहार्पयेत्॥ तृप्ति
रस्त्विति चान्योपि ब्रूयाद्दत्वाप्यलं कृते॥ करिष्यामीत्यनुज्ञाय कुरुष्वेति च चोदितः। उपस्तीर्याभिघार्यांश्च सर्वान्नेभ्यः
सकृत्सकृत्॥ अभिघार्याप्य जुहुयादंगारान् भस्ममिश्रितान्। पृथग्दक्षिणतः कृत्वा प्रेतायेत्यादिना ततः। अभि
मृश्यान्नमुद्धृत्य निक्षिप्यानु दिशेत्ततः। असुष्मा उपतिष्ठेत्वित्यथ मंत्रैः समीक्षतात्॥ भुक्तवत्सु तेषु कृत्वा च स्वदि
तं च तिलोदकं॥ विकीर्योत्सिच्य दत्वा च दक्षिणा अनुदिते क्षयी॥ अभिवाद्याथ तान् ब्रूयात्तृप्तिरस्त्विति ते पि च॥ अस्तु तृप्ति

रिति ब्रूयादनुज्ञानांतमाचरेत्॥ अनुज्ञातोन्नशेषेणपिंडं दत्वाप्रसिच्यच॥ तप्यस्वेत्येतमाहायपिंडमुच्छिष्टमेवच। अ
यामेतेतदुत्सृज्य स्नात्वायच्छेद्गृहान्प्रति। उपाहमुक्तहीपंचपूर्णकुंभादिमंगलं॥ गृहद्वारेसदद्भान्नशेषंभुंजी
तकामतः। क्षत्रियःस्नातमात्रस्तुस्पृशेद्वाहनमाहितं० वैश्यःप्रतोदंरश्मींवायष्टिंशूद्रः कृतक्रियः। एकोद्दिष्टांतए
वायंसंस्कृतेंप्रिचुच्यतेत्वघात्॥ तृतीयेपक्षयायातेकुर्याद्देवद्वितीयकं० मासिमासिकामंतुनष्टेपूर्वोकथंचन।
वत्सरेवत्सरेकेचित्कुर्वतेस्यमृताहनि॥ द्वहत्पचेताः। नपेत्त्कोजपःकार्यःस्वदितंचनोदाहरेत्। वह्वृचगृह्यपरिशि
ष्टे॥ एकोद्दिष्टस्यपिंडेतुअनुशाद्धोनविद्यते॥पितृशब्दंनकुर्वीतपितृहाचोपजायते। एकोद्दिष्टेसमूलाःकुशाइति
सकृदाछिन्ननिषेधः। अवनेजनप्रत्यवनेजनंनकुर्यात्।धूपचंदनमाल्यादिचनकुर्यात्। अनुदकमधूपंचगंध
माल्यविवर्जितं॥ नवश्राद्धममंत्रंचापिंडोदकविवर्जितमितिवचनात्॥ शेषमन्नमितिवचनवक्तव्यंशेषमपितस्मैदद्या
त्। अप्सवाप्राश्यपेत्नान्येनभोक्तव्यं॥एकादशाहेसाग्निकेनापिवैश्वदेवःपश्चात्कर्तव्यः॥ तथाचपरिशिष्टं० संप्राप्ते
पार्वणश्राद्धेएकोद्दिष्टेतथैवच॥ अग्रतोवैश्वदेवःस्यात्पश्चादेकादशेहनि॥ अत्रपार्वणग्रहणमनेकदेवत्यश्राद्धोप

११

देव॰ ६६

लक्षणार्थं तत्तस्यैकादशाहिकव्यतिरिक्तेषु श्राद्धेषु साग्निकस्य पूर्वमेव वैश्वदेवः। ऐकादशाहिक एव तु पश्चादिति निर्ण
यः। तथा च शालंकायनः। श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः। ऐकादशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते इति
अतो द्वादशाहे पूर्वमेव वैश्वदेवः। तथा शय्यादिदाने विशेषः॥ यथाहसत्यव्रतः। सद्यः शौचे पि दातव्यं प्रेतस्यैका
दशेहनि। स एव दिवसस्तस्य श्राद्धशय्यासनादिषु। विहितप्रकारेण मुक्त्वा नशनादिहतानां सद्यः शौचे प्याद्यं श्रा
द्धमेकादशे ह्न्येव भवतीत्यर्थः। एतच्च श्राद्धं न केवलं ब्राह्मणस्यैकादशेह्नि अपि क्षत्रियादेरपि तस्य श्राद्धस्याप्ययमेव का
लः। तथा च पैठीनसिः। एकादशेह्नि यच्छ्राद्धं तत्सामान्यमुदाहृतं। चतुर्णामपि वर्णानां सूतकं तु पृथक् पृथक् इति।
न च क्षत्रियादेरशुचित्वे न तत्र श्राद्धानधिकार इत्याशंकनीयं। अशुद्धस्याप्ययं वाचनिकोधिकार इति तथा च शंखः
आद्यं श्राद्धमशुद्धोपि कुर्यादेकादशेहनि॥ कर्तुस्तात्कालिकी शुद्धिरशुद्धः पुनरेव स इति॥ आद्यमिति सर्वेको द्दिष्ट
प्रकृतिभूतमेकादशाहाख्यमित्यर्थः। एतच्छ्राद्धानंतरं स्नात्वा भुंजीतेति॥ तथान्येपि विशेषाः। आशिषो द्विगुणा दर्भा
जपाशीः स्वस्तिवाचनं॥ पितृशब्दस्य संबंधिशर्मशब्दौ तथैव च। पात्रालंभोवगाहश्च उल्मुकोल्लेखनादिकं। तृप्तप्रश्न वाम॰ ६६

स्मृतिरत्नावल्यां२

अविकरः शेषप्रश्नस्तथैव च। प्रदक्षिणा विसर्गश्च सीमांतगमनं तथा॥ अष्टादशपदार्थांस्तु प्रेतश्राद्धे विवर्जयेत्
गरुडपुराणे॰ अष्टादशैव वस्तूनि प्रेतश्राद्धे विवर्जयेत्। आशिषं द्विगुणान्दर्भान् स्वस्त्यस्तु प्रणवं तथा॥ अग्नौक-
रणमुद्दिष्टं श्राद्धं वैश्वदेविकं विकरं न स्वधारम्भं पितृशब्दो न विद्यते॥ अनुशब्दं न कुर्वीत नावाहनमथोल्मुकं
आसीमांतं न कुर्वीत प्रदक्षिणा विसर्जनं॥ याज्ञवल्क्यः॥ एकोद्दिष्टं दैवहीनमेकार्घैकपवित्रकं॥ आवाहनाग्नौकर-
णवर्जितं ह्यपसव्यवत्॥ उपतिष्ठतामक्षय्यस्थाने विप्रविसर्जने। अभिरम्यतामिति वदेद्ब्रूयुस्तेऽभिरताः स्म हे कात्या-
यनः। अथैकोद्दिष्टमेकोऽर्घ एकं पवित्रं एकः पिंडो नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तप्रश्नः स्वद-
दितमित्युत्तरं उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरताः स्म इत्यपरे॥ शांखायनः। अथात एकोद्दि-
ष्टमेकपवित्रमेकार्घमेकपिंडं नावाहनं नाग्नौकरणं नात्र विश्वेदेवाः स्वदितमिति तृप्तप्रश्न उपतिष्ठतामित्यक्षय्यस्थाने
अभिरम्यतामिति विसर्गः संवत्सरमेवं प्रेते॥ एकं पवित्रमेकशिखं पवित्रं॥ नागरखंडे द्विशिखमप्युक्तं एकोद्दिष्टं दैव-
हीनमेकार्घैकपवित्रकं॰ आवाहनं परित्यज्य कार्यं पार्थिवसत्तम॥ तृप्तिप्रश्नस्तथा कार्यः स्वदितेति सकृत्ततः।

१२

देव. अभिरम्येति मंत्रेण ब्राह्मणस्य विसर्जनं॥ अस्थिन्नायमभिन्नायं कुर्याद्दिभर्तृणद्वयं। पवित्रं तद्विजानीयादेकोद्दिष्टे
६७ भिधीयते। भविष्योत्तरे॥ एकादशाहे यच्छ्राद्धं तत्सामान्यमुदाहृतं॥ एकादशभ्यो विप्रेभ्यो दद्यादेकादशेहनि। भोजनं
तत्रचैकस्मै ब्राह्मणाय महात्मने॥ वस्त्रालंकारशय्याद्यं पितुर्यद्वाहनादिकं। गोगृहासनदासीश्च दद्यात्संप्रत्ययभक्तितः
67 ॥ वाराहपुराणे श्वः करिष्य इति ज्ञात्वा ब्राह्मणामंत्रणक्रिया॥ स्नात्वा चैव शुचिर्भूत्वा प्रेतं विप्रेषु योजयेत्॥ गतोसि
दिव्यलोकं त्वं कृतांतविहितात्पथा। मनसा वायुभूतेन विप्रे त्वाहं नियोजये॥ पूजयिष्यामि भोगेन एवं विप्रं निमंत्रयेत्
अस्तंगते तथादित्ये गत्वा विप्रनिवेशनं॥ दत्वा तु पाद्यं विधिवन्नमस्कृत्य द्विजोत्तमान्॥ पादौ संप्रक्षयेत्तेन प्रेतसाहित
काम्यया॥ प्रभातायां तु शर्वर्यामुदिते च दिवाकरे॥ श्मश्रुकर्म तु कर्तव्यं नखच्छेदस्तथैव च॥ स्नापनाभ्यंजनं दद्या
द्विप्राय विधिपूर्वकं॰ गृहीत्वा भूमिभागं च स्थंडिलं तदनंतरं॥ निवापदेशं संमृज्य कर्तव्यं स्थंडिलं महत्॥ नदीकू
लेनिवासे वा प्रेतभूमिं विनिर्दिशेत्॥ अकृत्वा पृथिवीभागं निवापं ये तु कुर्वते॥ तदधीनं जगृह्णंते ह्युच्छिष्टं च तद्भवेत्. राम०
न देवाः पितरस्तस्य गृह्णंतीह कदाचन॥ पतंति निरये घोरे तेनोच्छिष्टेन सुंदरि॥ सचैलस्नपनं कृत्वा गत्वा चैव महानदी ६७

तीर्थानिमनसाध्यात्वातैः स्वमभ्युक्षयेद्बुधः। एवंशुद्धिंततः कृत्वाब्राह्मणांशीघ्रमानयेत्॥ आगतंवह्निजंदृष्ट्वाकर्तव्या
स्वागतक्रिया॥ अर्घ्यपाद्यंततः कृत्वाहृष्टतुष्टेनमाधवि॥ आसनंचोपकल्पेतमंत्रेणविधिपूर्वकं तथा उपवेश्यासने
मद्देष्ठंतत्रप्रकल्पयेत्। आपरणार्थंछत्रंतद्ब्राह्मणाय प्रदीयते॥ पश्चादुपानहौदद्यात्पादस्पर्शकरेशुभे।
संतप्तवालुकांभूमिमहिकंटकितांतथा। संतारयतिदुर्गाणिप्रेतंदद्दुपानहौ॥ तिलोपचारंकृत्वातुविप्रस्यनिय
तात्मवान्। नामगोत्रमुद्दाहृत्यप्रेतायान्नंततरां शीघ्रमाक्षानयेद्भूमिंदर्भहस्तोथभूतले॥ मंत्रः इहलोकंपरित्यज्य
गतोसिपरमांगतिं॥ एवमाक्षानितेगंधैःपुष्पधूपैःसमर्चयेत्॥ ततोवस्त्राणिविप्रायसर्वाण्याभरणानिच। ततः
पक्वान्नकंचैवकल्पयेत्तवसुंहरि। एवमादीनिद्रव्याणिप्रेतभागानिसर्वशः। पादशौचादिकंकृत्वाचातुर्वर्ण्यस्य
माधवि॥ बृहस्पतिः। एकोद्दिष्टविधानेनयद्दीकस्यप्रदीयते॥ आवाहनाग्नौकरणरहितंदैववर्जितं॥ वस्त्रालंका
रशय्याद्यंपितुर्यद्वाहनायुधं॥ गंधमाल्यैःसमभ्यर्च्यश्राद्धभोक्तॄन्समर्पयेत्॥ भोजनंचानेकविधंकारयेद्व्यंजनानिच
यथाशक्त्याप्रदद्याच्चगोभूहेमादिकंतथा॥ श्रोत्रियाभोजनीयास्तुनचसमत्रयोदश॥ ज्ञातयोबांधवानिदृष्ट्वातथा

६८

68

वान्ति यथोपरे॥ प्रदद्याद्दक्षिणां तेषां सर्वेषामनुरूपतः॥ हतमश्रोत्रियं श्राद्धं हतो यज्ञस्त्वदक्षिणः। तस्मात्पणं काकणीं
वा फलं पुष्पमथापि वा। प्रदद्याद्दक्षिणां यज्ञे तथा स सगुणो भवेत्॥ सत्यव्रतः॥ प्राप्ततुत्याय प्रेत ब्राह्मणानेकादशा
मंत्रापरान्केनानाभक्ष्यान्नरसैर्विन्यासैरेकैकमुद्दिश्य विधिवत्पिंडदानं वा सोहिरण्यदास्यपानछत्रोदकुंभदक्षिणा
गुणवति पात्रे शय्याप्रदानं ततः स्वस्त्ययनादिधर्माः प्रवर्तंते दशम्यामतीतायामेकैकमुद्दिश्य भोजयेत्तेषामेवै
कस्मै गुणवते शय्या देया विष्णुः। अथाशौचव्यपगमे सुस्नातः सुप्रक्षालितपाणिपादः स्वाचांतस्त्वेवं विधाने
व ब्राह्मणान्यथाशक्त्युदङ्मुखान्युग्मान्गंधमाल्यवस्त्रालंकारादिभिः पूजितान्भोजयेद्देववन्मंत्राञ्जुहोतौ। कौ दृष्टउच्छिष्ट
संनिधावेकमेव तन्नामगोत्राभ्यां पिंडं निर्वपेत्॥ भुक्तवत्सु ब्राह्मणेषु दक्षिणयाभिपूजितेषु प्रेतनामगोत्राभ्यां दत्ता
क्षय्योदकेषु चतुरंगुलपृथ्वीस्तावदंतरास्तावदधः खाता वितस्त्यायतास्तिस्रः कर्षूः कुर्यात्॥ कर्षूणां समीपेग्नि
मुपसमाधाय परिस्तीर्य तत्रैकैकस्मिन्नाहुतित्रितयं जुहुयात्। सोमाय पितृमते स्वधा नमः। अग्नये कव्यवाह
नाय स्वधा नमः। यमायांगिरस्वते स्वधा नमः। स्थानत्रये च प्राग्वत्पिंडनिर्वपणं कुर्यात् ततो दधिमधुघृतमांसैः ६८

कर्पूत्रयं संस्थापयित्वैतन्न इति जपेत्॥ एवं मृताहे प्रतिमासं कुर्यात्॥ लघुहारीतः॥ एकोद्दिष्टं प्रकुर्वीत पाकेनैव द्विजोत्तमः।
अभावे पाकपात्राणां तदहः समुपोषणं॥ गृह्यकारिकायां॥ अनन्ताक्षतपक्षेऽस्यात्तद्वैधकर्पाग्निमंत्रणं॥ मात्तरेवे
तरः कुर्याज्जेतश्राद्धनिमंत्रणं॥ उत्क्रष्पते नवश्राद्धं यदित प्रथमाद्दिकं॥ एकादशेऽह्नि कुर्वीत सर्ववर्णेष्वयं विधिः
मासिकानि यथाकालमेकोद्दिष्टानि षोडश। प्रतिमासं मृताहेषु द्वादशैतानि वत्सरं॥ उत्क्रष्पते हित त्राद्यं कुर्यादेकाद
शेऽह्नि तत्॥ ऊनाह्वे न्यूनषण्मासे त्रिपक्षे द्वादशेऽहनि॥ प्रोक्तानि मुनिभिः सर्वैरेकोद्दिष्टानि षोडश॥ एकादशे द्वाद
शेऽह्नि द्विमासे च त्रिपक्षतः। तृतीये च चतुर्थे च पंचमे षष्ठमासि च॥ न्यूनषष्ठे सप्तमे स्यादष्टमे नवमे तथा। दशमे का
दशे मासि द्वादशे न्यूनवत्सरे॥ ततः परेद्युः संप्राप्ते सपिंडीकरणं भवेत्॥ ततः परेद्युर्द्वितीयवत्सरादौ तथाह्निकं॥ तृती
यवत्सरादौ स्यात्तत्साह्निकमिति क्रमः। अयं स्मृत्यर्थसारारव्ये ग्रंथे ध्यायेत्तृतीयके॥ अभाणि श्रीधरार्येण स्मृतिस्म
तिविदां क्रमः। उत्क्रष्टे वेन्नवश्राद्धं कुर्यादेकादशेऽहनि। अतस्तस्य द्वितीयादि मासिकेनैं कृतं न ता॥ नवभांडानि त
त्रस्युरन्नसंस्करणाय वै। स्थालीपाकं पचेत्तत्र आहृतैरं बुभिर्वधूः। अपराह्णे भवेच्छ्राद्धमापस्तंबमतादिदं॥ एकोद्दिष्टे

देव षु सर्वेषु न स्वधा नामिरम्यतां ।। नासिको हि युग्मा दर्भाः स्वस्त्यस्तु प्रणवो जपः । विकरं पितृशर्मास्तु शह्नामामाविसर्जने
६९ सीमांतं स्वस्तिवाच्यं च पिंडानां च नमस्कृतिः । न पुष्पं पिंडमूर्ध्नि स्याद्वं देवि प्रकरः स्मृतं । सर्ववर्णेषु सर्वत्राप्येष साधारणो वि
धिः ।। पूर्वाह्ले स्य वृषोत्सर्गं कुर्यात्प्रेतत्वमुक्तये ।। मातृश्राद्धं तु नेहस्यादित्य वोच त्रिविक्रमः । एकादशाहश्राद्धस्य ।
69 प्रयोगः प्रवितन्यते । निमंत्र्यैकं द्विजं प्रेतमपराह्ले समर्चयेत् ।। गंधं पुष्पं तथा धूपं दीपं तस्त्वासमंत्रकं । तिलोसि प्रेत दे
वत्यः प्रेतं त्लोकान्प्रीणां तकं । मंत्रमुक्त्वा तिलानेव प्रक्षिपेदर्घपात्रतः । अयं मंत्रेनामगोत्रेण दत्वार्घ्यमनुमंत्र्य च ।। दद्याद
च्छादनं तस्मै श्राद्धशेषं समाप्य च ।। प्रेतसंबंधि वस्त्रालंकारशय्यानादिभिः सह । दक्षिणामुदकुंभं च सान्नं दत्वा तथैव गां । त
स्मै दद्याद्धुत्कशेषं तद्भांडान्यपि भाजनं । तद्भुक्तशेषानि च्छायामपामंते विनिक्षिपेत् ।। त्वप्यस्त्वेति ततः स्नात्वा स्वगमं प्रेत
वाग्यतः । अपराह्ने युक्त पूर्णकुंभं दीपाद्यपि च मंगलं । दृष्ट्वा स्पृष्ट्वा च भुंजीत स्वयं मंगलभोजनः । तस्मिन्नहनि शय्यां वै
दद्यात्सोपस्करां शुभां ।। वस्त्रोपानच्छत्रकां स्वव्यंजनादिविभूषितां । कांचनं पुरुषं तत्र फलवस्त्रसमन्वितं । संपूज्याह्निज
दंपत्ती नानाभरणभूषितौः । दक्षिणासहितां शय्यां ब्राह्मणाय महात्मने ।। एकादशतो विप्रान्पृथक्पाकेन भोजयेत् । रु राम० ६९

द्धोद्देशेन वारुद्ररूपस्य प्रेतस्य तानपि॥ प्रेतोद्देशेन तत्पक्षे श्राद्धार्थमुपवेशयेत्॥ ततो दद्यूर्णं कुंभं श्रद्दद्याद्धादशसंख्यया
नानाभक्ष्यसमायुक्तानि तिसत्यव्रतो ब्रवीत्॥ उदकुंभः प्रदातव्यो भक्ष्यभोज्यसमन्वितः। यावदद्दं मतः प्रेते सतिलो
दकपूर्वकं॥ प्रेतश्राद्धेषु यच्छिष्टं गृहे पर्युषितं च तत्॥ दंपती भुक्तशेषं यत्तन्न भुंजीत कर्हिचित्॥ अमंत्रकाणि पंचस्यु
र्नवश्राद्धानि तानि वै॥ षष्ठं समंत्रकं तत्र कविकांतो ब्रवीत्स्फुटं॥ मंत्रवंत्येव सर्वाणि मासिकानि स्मृतेर्बलात्॥ भविष्य
त्पुराणे॥ अकृत्वा षोडशैतानि श्राद्धानि वर्षशतं पुनः। न मुच्यते तु प्रेतत्वाद्यथा ह भगवान् शिवः॥ अर्वाक्सपिण्डनात्संमीत
स्य यस्य मासास्त्रयोदश॥ श्राद्धं तस्यापि कर्तव्यं प्रतिमासं तु वत्सरं॥ तथा॥ मृताहनि तु दातव्यं प्रेताय सुखमिच्छता।
मृताहनि तु दानेन मुच्यते करणो शुभात्॥ अस्थिसंचयने श्राद्धं द्विपक्षे मासिकानि च। रिक्तयोश्च तथा तिथ्योः प्रेतश्रा
द्धानि षोडश। रिक्तयोस्तिथ्योरित्येकेनाह्ना न्यूने षष्ठे द्वादशे च मासे इत्यर्थः॥ तथा च पैठीनसिः॥ आद्यमासिकाद्दिके श्राद्धे
स्यातां पूर्वे द्विक एव ते॥ मासिकानि स्वकीये तु दिवसे द्वादशापि च॥ तथा सपिंडीकरणादर्वाक्कुर्याच्छ्राद्धानि षोडश एक
कोद्दिष्टविधानेन कुर्यात्सर्वाणि तानि च॥ प्रेतसंस्कारकर्माणि यानि श्राद्धानि षोडश॥ यथाकालं तु कार्याणि नान्य

देव. याम्मुच्यतेततः। तत इति प्रेतत्वादित्यर्थः। अनेनेदमुच्यते सपिंडीकरणे द्वादशाहाद्वौ कृतेपि मासिकानि प्रतिमासमेव
७० कार्याणीति। तानि यद्यप्येकोद्दिष्टानि प्रेतत्वमोक्षार्थानि॥ तथापि तानि मंत्रवंति॥ न पुनर्नवश्राद्धवदमंत्रकाणि
य द्वादशाहपैठीनसिः॥ नवश्राद्धमुपक्रम्य मृतेहनि तु मासिकं॥ प्रेतमुद्दिश्य मंत्रैस्तु वत्सरं निर्वपेत्सुतः॥ उपक्रम्य सम
70 थ्येत्यर्थः। व्यासः। कृतचूडस्तु कुर्वीत उदकं पिंडमेव च॥ स्वधाकारं प्रयुंजीत वेदोच्चारं न कारयेत्॥ स तु मंत्रः। व्रतस्थो
वाव्रतस्थो वा एक एव भवेद्यदि॥ मातुः पितुश्च कुर्वीत मृतयोर्यौरसः सुतः॥ स्मृत्यर्थसारे॥ अथ श्राद्धक्रमाः॥
तत्राद्यौ नवश्राद्धं प्रथमेह्नि तृतीये पंचमे सप्तमे नवमे एकादशेह्नि विहितं॥ तत्र प्रथममेकादशेह्नि उत्कृष्यते॥ उत्क
र्षपक्षे तृतीयाहादिषु पंचाहर्गणसंज्ञं नवश्राद्धं भवति॥ अनुत्कर्षपक्षेच। एकादशाहिकस्य विकल्पितत्वात्॥ प्रथमाहा
दिषु पंचाहर्गणसंज्ञं भवति। यद्वा प्रथमाहे तृतीयं पंचमसप्तमाहेषु च एकस्मिन्नवमाहे च एवं त्र्यहर्गणसंज्ञं नवश्राद्धं
कार्यं। यद्वा तृतीयेह्नि पंचमसप्तमयोरेकस्मिन् नवमेह्नि चेत्येवं त्र्यहर्गणमेव कार्यं॥ अहर्युग्मत्वं न कार्यं॥ एतन्नवं राम०
श्राद्धमेकादशेह्नि वा कार्यं॥ तथा षोडशश्राद्धानि नवमिश्रकानि कार्याणि॥ तानि च प्रतिमासं मृताहे संवत्सरं वि ७०

हितानि द्वादशोत्तया ॥ द्वादशाहे त्रिपक्षे न्यूनषाण्मासे न्यूनाब्दे चेति चत्वारि ॥ एवं षोडश ॥ तत्राद्यमेकादशे ह्नि तत्क्रमस्तु
तत्रक्रमः । एकादशाहे द्वादशाहे द्वितीये मासे त्रिपक्षे तृतीये च तुर्थे पंचमे षष्ठे मासे न्यूनषष्ठे सप्तमे अष्टमे नवमे एका
दशे द्वादशे मासे न्यूनाब्दे चेति ॥ ततोपरेद्युः संवत्सरांते सपिंडीकरणं ॥ ततः परेद्युर्द्वितीयसंवत्सरादावाब्दिकं । तृतीय
संवत्सरादौ प्रत्याब्दिकमिति क्रमः । यद्यापिंडपितृयज्ञपार्वणश्राद्धार्थं अग्निमान् द्वादशाहे त्रिपक्षे वा षष्ठे ह्नि आहुत उपस्थि
ते वा आयुष्यं निपत्तौ वा अर्वाक्संवत्सरात्सपिंडीकरणं कुर्यात् ॥ तद्वा षोडशैकोद्दिष्टानि कृत्वैव कार्यं ॥ तत्र एकादशे ह्नि
चत्वारि श्राद्धानि संभवंति ॥ नवश्राद्धाद्यं नवश्राद्धांत्यं ॥ मासिकाद्यं ॥ स्वतंत्रैकोद्दिष्टं चेति ॥ तत्र स्वतंत्रैकोद्दिष्टे क्रियमाणे
न्येषां तंत्रेणानुष्ठानसिद्धिः । अत आद्यैकोद्दिष्टं नवमिश्रमित्युच्यते ॥ नवश्राद्धधर्मकं नवमिश्रधर्मकमुभयदोषकं च भ
वति ॥ ततो वसिष्ठं नवश्राद्धं० ततो वशिष्टं । पृथगनुष्ठानपक्षे च आदौ स्वतंत्रैकोद्दिष्टं च कार्यं । तत्रोभयादोषमेव ॥
ततो नवश्राद्धं । ततो मासिकं । एकादशे काह्नि एकादश ब्राह्मणभोजनं प्रेतोद्देशेन रुद्रोद्देशेन वा ॥ रुद्ररूपप्रेतोद्देशेन कार्यं
एकादश रुद्रोद्देशात् ॥ रुद्रगणमिति प्राङ्गः । वृषोत्सर्गश्च प्रशस्यते ॥ द्वादशाहस्थाने न्यूनमासिकं क्षत्रादिषु भवति ॥

द्वै० ७१ 71 संचयने कृते मनुष्यलोकात् प्रेतलोकं गच्छति आमेन पाथेयश्राद्धमेकोद्दिष्टविधानेन कार्यं। सपिंडीकरणे कृते प्रेतलो
कात् पितृलोकं गच्छति। आमेन पाथेयश्राद्धं पार्वणविधानेन कार्यं। संवत्सरादर्वाक्तपिंडीकरणे अनुमासिकानि पृथ
क् कुर्यात् एकोद्दिष्टवत्। पार्वणवद्वा मृताहश्राद्धवत्। अनुमासिकोत्तं संवत्सरविमोकश्राद्धं पुण्याहवाचनं च कार्यं इति
क्रमः॥ गृह्यकारिकायां॥ यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत्॥ तत्रानुमासिकानि स्युः क्षयाहश्राद्धवत् पृथक्। अतो
ऽनुमासिकांते च कुर्यादब्दविमोचनं॥ पुण्याहवाचनं चापि यतीनां पार्वणान्यपि॥ मासिकानि समस्तानि नापि तेषां सपिंडन
मिति॥ एकादशाहादौ पुत्रो ज्येष्ठादिर्योग्यः कुर्यात्॥ नवश्राद्धानि षोडशश्राद्धानि च विभक्तो वा अविभक्तो वा एक एव कु
र्यात्। सपिंडीकरणं तु विभक्ताः पुत्राः सधना एकस्मिन् दिने वृद्धिकामाश्चेत् पृथक् पृथक् कुर्युः। नान्यथा। तत ऊर्ध्वं सर्व
पृथगेव कुर्युः॥ अथैकोद्दिष्टं॥ तच्छ्राद्धानि एकादशाहान्यूनाब्दांतविहितानि नवमिश्राणि। ततः परं पुराणानी०
त्युक्तं। तत्र सर्वैकोद्दिष्टे दैवं नास्ति। एक उद्देश्यो ब्राह्मणश्चैकः। अयुग्मा वा विप्राः। एकं पात्रं पवित्रं च। भुक्तशेषे लोकः पि
ण्डो देयः। उत्तरैकोद्दिष्टे पार्वणैकदेशवत्। सर्वं दैवहीनं समंत्रकमेव। पाणौ मंत्राभ्यां होमः। नवमिश्रेषु दिवा निमंत्रणं राम० ७१

निमंत्रणमाहिनस्वाध्यायाः। पितृशब्दस्स्वधानमः शब्दश्च तन्मंत्राणां लोपः। तिलावापादि सर्वं तूष्णीं कार्यं। तूष्णीमर्घ्यं निवेद्य
नाचाह्यमानं त्वां तेनाम्ना प्रेतोद्देशेनार्घ्यं दत्वा गंधादि देयं॥ पाणौ प्रेताय स्वाहेत्येकाहुतिः न वा। धूपं स्वधाशब्दं पिंडे अनुशब्दं
पमंत्रश्रावणं वर्जयेत्॥ अक्षय्यमस्त्वित्युपतिष्ठतामिति वदेत्॥ प्रतिवचनं च तद्वत्॥ अभिरम्यतामिति विसर्गोऽभिरताः स्मे
ति प्रत्युक्तिः॥ नवमिश्रे च सर्वं समंत्रकमित्येके। नवश्राद्धे तु सर्वममंत्रकमेव कार्यं। नामप्रेतशब्दं च मलोपः एतत् सर्वमेव
निमंत्रणे। धूपं दीपं श्राद्धशेषभोजनं च वर्जयेत्॥ नवश्राद्धं कृत्वा स्नायात्॥ अन्यत् सर्वं पार्वणवत्॥ नवश्राद्धान्येकादशे
ह्निककार्याणि॥ तत्राद्यं महैकोद्दिष्टं। तत्र बहु दक्षिणा॥ प्रेतवस्त्राभरणयानशय्यासनभाजनपादुकोपानच्छत्रादिकं
देयं। रुद्रगणो प्रेतोद्देशपक्षे नवश्राद्धवत्। रुद्रोद्देशपक्षे तूपवीती विप्रान्सम्यगभ्यर्च्य भोजयेत्॥ रुद्ररूपप्रेतोद्देशं वा
श्राद्धं सोदकुंभं सतिलं सर्वत्र दक्षिणा देया॥ प्रेतश्राद्धविशेषेणो॥ ॥ इत्यैकादशाहिकश्राद्धप्रयोगः॥ अथ मृतशय्यादा
नविधिः। सजीवच्छय्यादानेतिकर्तव्यताति देशपरिस्मरणी य इति तत्पूर्वकोऽभिधीयते॥ तत्र भविष्योत्तरे॥ शय्यादानं प्रव
क्ष्यामि तुभ्यं पांडुकुलोद्वह॥ यां दत्वा शिवभागी स्यादिह लोके परत्र च। शय्यादानं प्रशंसंति सर्वदैव द्विजोत्तमाः

१

देव० अनित्यं जीवितं यस्मात्पश्चात्कोन्यः प्रदास्यति ॥ तावत्स्वबंधुः पतिर्जायावज्जीवति भास्वत ॥ मृतो मृते इति ज्ञात्वा क्षणात्स्ने
७२ हो निवर्त्तते ॥ तस्मात्स्वयं प्रदातव्यं शय्याभोज्यजलादिकं ० आत्मैव ह्यात्मनो बंधुरिति संचिंत्य चेतसि ॥ आत्मैव यदि
नो त्मानं दानैर्भोगैर्न पूजयेत् । को न्यो हिततरस्तस्माद्यः पश्चात्पूजयिष्यति ॥ तस्माच्छय्यां समासाद्य सारदारुम
यीं दृढां ॥ दंतपत्रचितां रम्यां हेमपट्टैरलंकृतां ॥ हंसतूलीप्रतिच्छन्नां शुभगंडोपधानकां । प्रच्छादनपटीयुक्तां गंधधू
पादिवासितां ० तस्यां संस्थापयेद्धैमं हरिं लक्ष्म्या समन्वितं ॥ लक्ष्मीनारायणं लक्षणं ० पलेन वा तदर्द्धेन तदर्द्धेनाथवा पु
नः ॥ पद्मासनगतं कुर्याद्देवदेवं चतुर्भुजं । दक्षिणाधः करे पद्मं शंखं मूर्द्धकरे न्यसेत् ॥ वामोर्द्धं च भवेच्चक्रं लक्ष्मीपृष्ठे
करः परः ॥ वामोत्संगे कृता लक्ष्मी रत्नपात्रकरा भवेत् ॥ दक्षिणश्च भुजो देव्याः पृष्ठे देवस्य चक्रिणः इति ॥ उच्छीर्ष
के घृतभृतं कलशं परिकल्पयेत् ० विज्ञेयः पांस्वग्रे छस निद्राकलशो बुधैः ॥ तांबूलकुंकुमक्षोदकर्पूरागुरुचं
दनं ० दीपिकोपानहछत्रचामरासनभाजनं ० पार्श्वेषु स्थापयेद्भक्त्या सप्तधान्यानि चैव हि ॥ शयनस्तस्य भवति यद राम
न्यदुपकारकं ० भृंगारकरकाद्यं तु पंचवर्णवितानकं ० शय्यामेवं विधां कृत्वा ब्राह्मणायोपपादयेत् ॥ सपत्नीकाय ७२

संहृज्य अर्पयेद्विप्रे विधिपूर्वकं । यथा न कृष्णशयनं शून्यं सागरजातया ॥ शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥
यस्मादशून्यं शयनं केशवस्य शिवस्य च । शय्या ममाप्यशून्यास्तु तथा जन्मनि जन्मनि ॥ दत्त्वैवं तस्य सकलं प्रणि
पत्य विसर्जयेत् । एवं शय्याप्रदाने तु विधिरेषः प्रकीर्त्तितः । एकादशाहेऽपि तथा विधिरेषः प्रकीर्त्तितः ॥ द्वाहाति य
द्विधमार्थं वा धवो वा धवे मृते । विशेषं चात्र राजेन्द्र कथ्यमानं निशामय । तेनोपयुक्तं यत्किंचित्पूर्वं गृहे स्थितं भ
वेत् । तज्जातलग्नं च तथा वस्त्रवाहनभाजनं । यद्यदिष्टं च तस्यासीत्तत्सर्वं परिकल्पयेत् । तत्रैव पुरुषं हैमं
तस्योपरि स्थापयेत्तदा । पूजयित्वा प्रदातव्या मृतशय्या यथोदिता । पद्मपुराणे । मृतकान्ते द्वितीयेऽह्नि शय्यां
दद्याद्विचक्षणः । कांचनं पुरुषं तद्वत्फलवस्त्रसमन्वितं । संपूज्य द्विजदंपतीं नानाभरणभूषितं । उपवेश्य
तु शय्यायां मधुपर्कं ततो वदेत् । रजतस्यात्तु पात्रेण दधिदुग्धसमन्वितं । अस्थिललाटं संगृह्य सूक्ष्मं कृत्वा
सवज्रकं ॥ पायसे द्विजदंपत्यं नानाभरणभूषितं । भोजयेत्प्रयतः प्राज्ञो विधिरेष सनातनः ॥ एष एव विधिर्दृ
ष्टः पार्वतीये द्विजोत्तमैः । शय्यायां ब्राह्मणोपवेशनविधिर्ब्राह्मणा कर्तव्यं चेद्वाराहपुराणे । संगृह्य पाणि

देव ७३ नापाणौमंत्रेणोत्थापयेद्द्विजं० दद्यात्कथ्यासनंचैवतथैवांजनकंकती अंजनंकंकतींगृह्यशय्यामाक्रम्यसद्विजः
मुहूर्त्तंतत्रविश्रम्यनिवापस्थानमागतं० गवांलांगूलमाहृत्यब्राह्मंहस्तंसमाददेत्॥ शय्यादानफलंतुभविष्यो
त्तरे० स्वर्गेपुरंदरगृहेसूर्यपुत्रालयेतथा० सुखंवसत्यसौजंतुःशय्यादानप्रभावतः। सूर्यपुत्रालयेचैव।
73 तथावैवस्वतेपुरे० पीड्यंतिनतंयाम्याःपुरुषाभीषणाननाः। नघर्मेणनशीतेनबाध्यतेसनरःक्वचित्। अ
पिपापसमायुक्तः स्वर्गलोकंसगच्छति विमानवरमारूढः सेव्यमानोप्सरोगणैः। आभूतसंप्लवंयावत्तिष्ठ
त्यातंकवर्जितः। शय्याप्रदानममलंतवपांडुपुत्रसंकीर्त्तितंसकलसौख्यनिधानभूतं। योवैददातिविधिव
त्स्वयमेवनाकेकल्पंविकल्परहितःसविमात्तिमर्त्यः॥ अत्रप्रसंगात्मृतशय्याप्रतिग्रहनिषेधोभिधीयते०
पद्मपुराणे० अतिदुष्टाप्रेतशय्यानग्राह्याद्द्विजसत्तमैः। गृहीतायांतुतस्यांचपुनःसंस्कारमर्हति॥ वेदेचैवपुरा
णेषुशय्यासर्वत्रगर्हिता० ग्रहीतारस्तुजायंतेसर्वेनिरयगामिनः॥ इतिशय्यादानविधिः॥ एकादशाहादारभ्य
संवत्सरपर्यंतंप्रतिदिनंप्रेतायोदकुंभोदातव्यः॥ तथाचपद्मपुराणे० उदकुंभःप्रदातव्योभक्ष्यभोज्यसमन्वितः राम० ७३

यावद्वर्षं नरश्रेष्ठ सतिलोदकपूर्वकं॥ आह हारीतः। मृते पितरि वै पुत्रः पिंडमब्दं समाचरेत्॥ अन्नं कुंभं च विप्राय
प्रेतनिर्देशधर्मतः। स्मृतिसमुच्चये॥ एकादशाहात्प्रभृति घटस्तोयान्नसंयुतः। दिने दिने प्रदातव्यो यावत्स्या
द्वत्सरः स्मृतैः॥ पारस्करः। अहरहरन्नमस्मै ब्राह्मणायोदकुंभं च दद्यात्पिंडमप्येके निपृणंति॥ याज्ञवल्क्यः। अर्वा
क्सपिंडीकरणं यस्य संवत्सरात्कृतं॥ तस्याप्यन्नं सोदकुंभं दद्यात्वर्षं द्विजन्मने॥ आहापस्तंबः॥ यस्य संवत्सरादर्वा
क्स॰ पिंडीकरणं कृतं॥ अहन्यहं तु घटं दद्यात्प्रत्यहं त्वन्नसंयुतं॥ लौगाक्षिः। यस्य संवत्सरादर्वाक्सपिंडीकरणं भवेत्॥
मासिकं चोदकुंभं च देयं तस्यापि वत्सरं॥ गरुडपुराणे॰ एकादशाहादारभ्य घटं सान्नजलान्वितं॰ दिने दिने च दात
व्यमब्दं यावद्द्विजोत्तमे॥ मानुषस्य शरीरेऽत्रास्थीनां चैव संचयः। तिष्ठत्येव सर्वदेहे षष्ट्यधिकं शतत्रयं। उदकुंभेन
तुष्टानि तान्यस्थीनि भवंति हि। एतस्मिन्दीयते कुंभः प्रीतिः प्रेतस्य जायते॥ निर्णयामृते॥ संवत्सरादर्वाक्सपिं
डीकरणे कृतेऽपि संवत्सरपर्यंतं संकल्पविधानेन पार्वणं सोदकुंभं श्राद्धं कुर्यात्॥ तदाह याज्ञवल्क्यः॥ अर्वाक्सपि
डीकरणमित्यादि। तस्यापीत्यपि शब्देन संवत्सरादर्वागकृतसपिंडस्यापि समुच्चयः। अयं तु विशेषः॥ अकृतस

देव०
७४

पिंडस्यैकोद्दिष्टं॥ कृतस्य पिंडनस्यापार्वणं॥ तत्रापि विशेषो गोतमेनोक्तः॥ अदैवं पार्वणश्राद्धं सोदकुंभमधर्मकं
कुर्यात्प्रत्याब्दिकं श्राद्धासंकल्पविधिनान्वहमिति॥ अधर्मकं दातृभोक्तोः पुनर्भोजनादिधर्मरहितं॥ गरुडपुराणे
। अथ वक्ष्यामि संक्षेपाद्यममार्गस्य निष्कृतिं। वृषोत्सर्गस्य पुण्येन पितृलोकं स गच्छति॥ एकादशाहपिंडेन शुद्धदेहो
भवेन्नरः॥ उदकुंभप्रदानेन किंकरास्तृप्तिमाप्नुयुः। शय्यादाने विमानस्थो याति मार्गे खगेश्वर॥ तद्धि दीयते सर्वं
द्वादशाहे विशेषतः। पदानि सववस्तूनि वरिष्टानि त्रयोदश॥ योऽददाति मृतस्येह जीवन्नथात्महेतवे॥ तदाश्रितो
महामार्गे वैनतेय स गच्छति॥ एक एवास्ति सर्वत्र व्यवहारः खगेश्वरः। उत्तमाधममध्यानां तत्तदावर्जनं भवेत्। या
वद्भाग्यं भवेत्तस्य तावन्मार्गे तिरिष्यते॥ स्वयं स्वस्थेन यद्दत्तं तत्राधिकरोतितं॥ मृते यद्बांधवैर्दत्तं तदाश्रित्य स्तुवीम
त॥ गरुड उवाच॥ कस्मात्पदानि देयानि किंविधानि त्रयोदश॥ दीयते तस्य देवेश तद्ब्रूह स्वयथातथं श्रीभगवानु
वाच। छत्रोपानहवस्त्राणि मुद्रिका च कमंडलुः॥ आसनं भाजनं चैव पदं सप्तविधं स्मृतं० तथा आसनोपानहौ
छत्रं मुद्रिका च कमंडलुः॥ भाजनं भाजनाध्यासो वस्त्राण्यष्टविधं पदं॥ आतपस्तत्र रौद्रो यो दह्यते येन मानवः॥ छत्र

राम०
७४

दानेन सुछाया जायते प्रेततुष्टिदा। असिपत्रवनं घोरं सोतिक्रमति वै सुखं। अश्वारूढाश्च जायंते ददते ये ह्युपानहौ
आसने भाजने चैव सम्यग्दत्ते द्विजातये। सुखेन भुंक्ते स प्रेतः पथि गच्छन् शनैः शनैः। वक्रधर्मसमायुक्ते निवाति
तोयवर्जिते। कमंडलुप्रदानेन सुखं भवति निश्चितं। मृतोद्दिशेनयोदद्याद्दुग्धपात्रं लताम्रजं। प्रपादानसहस्रस्य
तत्फलं सोश्नुते ध्रुवं। यमदूता महारौद्राः करालाः कृष्णपिंगलाः। न पीडयंति दाक्षिण्या हस्ताभरणदानतः। सायु
धान् अवमानांश्च न मार्गे हृष्टिगोचरं। प्रयाति यमसंस्थाने मुद्रिकायाः प्रदानतः। भाजनासनदानेन मुद्रिका भोज
नेन च। आज्ययज्ञोपवीतेन परं संपूर्णतां व्रजेत्। एवं मार्गे स गच्छन्वै तृषार्तः श्रमपीडितः। महिषीरथगोदानात्सु
खी भवति निश्चितं। तथा ये नराः पापकर्माणस्ते गच्छंति यमालयं। नृणां मांसादिकं दत्तमनंतफलदं भवेत्।
पादक्रमप्रमाणाद्धं स्वर्गे वसति भूमिदः। अश्वारूढाश्च ते यांति ददते ये ह्युपानहौ। आतपे श्रमयोगेन दह्यंते तेन छत्र
चित्। छत्रदानेन वै प्रेता विचरंति सुखं पथि। तमुद्दिश्य प्रदद्यात्सन्नं तेन चाप्यायितो व्रजेत्। अंधकारे महाघोरे ह्य
मूर्ते लक्ष्यवर्जिते। उद्योतेनैव ते यांति दीपदानेन मानवाः। आश्विने कार्तिके वापि माघे मृततिथावपि। चतुर्द

दे॰ कि॰
७५

25

श्यांच दीयेत दीपदानं सुखाय वै॰ प्रसह्य च प्रदातव्यं मार्गे सुविषमेन रैः। यावत्संवत्सरं वापि प्रेतस्य सुखलिप्सया
कुले घोतते सुद्धात्मा प्रकाशत्वं च गच्छति। ज्योतिषामिव सरूपो सौ दीपदानरतो नरः। प्राङ्मुखोदङ्मुखं दीपं
देवागारे द्विजालये॰ कुर्याद्याम्यमुखं पित्रे अद्भिः संकल्प्य सुस्थिरं॰ सर्वोपहारयुक्तानि पदान्यत्र त्रयोदश। यो दद्या
त्पितस्येह जीवन्वा थात्महेतवे॰ स गच्छति महामार्गे महत्कष्टविवर्जितः॥ आसनं भोजनं भोज्यं दीयते यद्द्विजातये।
सुखेन भुंजमानस्तु तेन गच्छति सत्पथि॰ कमंडलुप्रदानेन तृषितः पिवते जलं॥ भाजनं वस्त्रदानं च कुसुमं चाङ्गुली
यकः॥ एकादशाहे दातव्यं प्रेतो याति शुभां गतिं॰ त्रयोदशपदानीत्थं प्रेतस्य शुभमिच्छता। दातव्यानि यथाशक्त्या
प्रेतो सौ प्रीणितो भवेत्। भाजनानि तिलाश्चैव उदकुंभास्त्रयोदश॥ मुद्रिकां वस्त्रयुग्मं च तथा छत्रं उपानहौ
एतावतः पदार्थान्हि प्रेतोद्देशेन दापयेत्। वृषोत्सर्गे कृते तार्क्ष्य प्रेतो याति परां गतिं तथा अन्नं च उदकं चैव उपा
नहौ कमंडलुं॰ छत्रं वस्त्रं तथा यष्टिं लोहदंडं तथाष्टमं॥ अग्निष्टिकां वदीपं च तिलं ताम्बूलमेव च॰ चंदनं पुष्पदा
नं चोपदानानि चतुर्दश। यो ऽश्वं रथं गजं वापि ब्राह्मणे प्रतिपादयेत्॰ स्वर्गमहिम्नोनुसारेण तत्तत्स्वमवाप्नुयात्। ना राम॰
७५

नाल्गेकान्विचरति महिषी वृहत्स्तियः। यमवाहनस्यमातामहिषीस्तुगतिप्रदा। तांवलपुष्पंदातव्यंयाम्यानांहर्ष
वर्द्धनं॰ तेनसंतर्पितांसर्वेतस्मिन्क्लेशंनकुर्वते॰ गोभूतिलहिरण्यादिदानान्यानाद्रः स्वशक्तितः। मृतोद्देशेनयोद
द्याज्जलपात्रंचमृन्मयं॰ उदपात्रसहस्रस्यफलमाप्नोतिमानवः। यमदूतामहारौद्राः करालाः कृष्णपिंगलाः।
नभीषयंतितंतार्क्ष्यवस्त्रदानेकृतेसति। मार्गेवैगच्छमानः सत्त्वघातैः श्रमपीडितः। यदान्नदानयोगेनसुखीभव
तिनिश्चितं॰ शय्यातूलीप्रतिच्छन्नाशुभशीर्षोपधानिका। तथादक्षिणयायुक्ताआयुधांवरसंयुतां। हेमश्रीप
तिनायुक्तादेयाद्येयंद्विजातये। तयाप्रेतश्चमुक्तोसौमोदतेसहदैवतैः। एतत्तेकथितंतार्क्ष्यदानमंतेष्टिकर्मजं॰
॥ ॥ इतिपदातिदानानि॥ ॥अथोदकुंभदानंगरुडपुराणे॥ ॥उदकुंभप्रदानंमेकथयस्वयथातथा
विधिनाकेनदातव्याः कुंभास्तेकतिसंख्यया। किंलक्षणाः कस्यदेयाजनार्दन। कस्मिन्कालेप्रदातव्याः प्रेतत
प्तिदायकाः॥ श्रीभगवानुवाच। सत्यंतार्क्ष्यप्रवक्ष्यामिउदकुंभप्रदानकं॰ प्रेतोद्देशेनदातव्याअन्नपानीयसंयुताः।
विशेषेणमहापक्षिन्प्रेतमुक्तिप्रदायकाः। द्वादशाहेचषण्मासेत्रिपक्षेवापिवत्सरे। उदकुंभाः प्रदातव्याः मार्गे

दे०क्रि: तस्य हितायवै। ५ अहन्यहनि दातव्याउदकुंभांस्तिलैर्युताः। सुलिप्ते भूमिभागे तु पक्वान्नजलपूरिताः। प्रेतस्य फलदात
७६ व्यं भोजनं च यदृच्छया॥ सुप्रीतस्तेन दातव्यं प्रीतो याम्येः स गच्छति। द्वादशाहे विशेषेण उदकुंभान्प्रदापयेत्। विधि
ना तत्र संकल्प्य घटान्नू द्वादशसंख्यया। एकापि वर्द्धनी तत्र पक्वान्नजलपूरिता। विष्णुमुद्दिश्य दातव्या संकल्प्य ब्राह्म
76 णे शुभे। एकोवै धर्मराजाय तेन तुष्टेन मुक्तिभाक्। चित्रगुप्ताय वैकं तु गात्तत्र सुखी भवेत्० षोडशाद्याः प्रदातव्या
माषान्नजलपूरिताः। उक्रान्तिश्राद्धमारभ्य श्राद्धषोडशकस्य ते० षोडशब्राह्मणानां तु एकैकं विनिवेदयेत्॥ एकाद
शाहात्प्रभृति दीपो नित्यं घटाक्षयः। पक्वान्नजलपूर्णो यावत्संवत्सरं दिने। एकोवै वर्द्धनी तत्र वंशपात्रोपरि स्थिता
जलपात्राणि हृद्यानि दत्वा द्विकटकानि च॥ वस्त्रैराच्छादिताभ्येवं संयुक्तानि सुगंधिभिः। ब्राह्मणेभ्यो विशेषेण जलस
र्गानि दापयेत्॥ अहन्यहनि संकल्प्य विधिपूर्वं खगेश्वर॥ ब्राह्मणाय कुलीनाय वेदव्रतयुताय च। विद्याव्रतवता
दृयं नूर्ब्वे तन्न कदाचन॥ समर्थो वेदहन्ताश्च स्तारणे स्तरणेपि च॥ इत्युदकुंभदानं० अथ सपिंडीकरणकालाः
१ द्वादश तत्र मध्यकालं विहितस्तु मासिकेष्वनुष्ठितेषु पूर्णे संवत्सरे तदूर्द्ध्वमौत्सर्गिको नग्निकस्य सपिंडीकरणस्य कालाः। राम० ७६

तथा च मार्कण्डेयपुराणे मासिकांतानि श्राद्धान्युक्त्वाभिहितं ॥ अथ संवत्सरे पूर्णे यथावत्क्रियतेनघैः । सपिंडीकरणं स
म्यक् तत्रापि विधिरुच्यते । अस्य च कालस्यानग्निककर्तृकानग्निमद्द्वत्सपसपिंडीकरणांगत्वं नैमित्तिकं च कालां
तरमुक्तं भविष्यत्पुराणे ॰ सपिंडीकरणं कुर्याद्यजमानो ह्यनग्निमान् । अनाहिताग्नेः प्रेतस्य पूर्णेब्दे भरतर्षभ ॥
उक्तं च पुलस्त्येन ॰ निरग्निकः सपिंड्यं पितुर्मातुश्च धर्मतः । पूर्णे संवत्सरे कुर्याद्वृद्धिर्वा यदहर्भवेत् । वृद्धिश्चौ
मौंजीविवाहादिरूपोभ्युदयः । उपलक्षणं चैतत्तन्नांदीश्राद्धनिमित्तभूतस्य कर्ममात्रस्य एतच्चाधानाद्युपसंग्रा
वित्यशनीवचनेकं तु नांदीमुखं श्राद्धमिति शाट्यायनिवचनेन स्फुटीभविष्यति । सैषा पास्मिन्दिने वृद्धिरापद्यते
। ततः प्रागेवाब्दसपिंडीकरणं कृत्वा तदंगभूतं नांदीमुखसंज्ञकं ॥ प्रेतस्यैवा गृहपतावित्यत्र श्राद्धाभाव इति केचि
त्तु । श्राद्धं कुर्यादित्यर्थः । अनेन प्रवृत्ताधिकारस्यासमापितप्रेतश्राद्धस्य चौडमौंजीविवाहाधानादौ तदंगभूते
च नांदीश्राद्धेऽनधिकारोपि दर्शितः ॥ आह लघुहारीतः । भ्राता वा भ्रातृपुत्रो वा सपिंडः शिष्य एव वा । सहपिंडक्रियां
कृत्वा कुर्यादभ्युदयं ततः ॥ नागरखंडे ॥ ततः सपिंडीकरणे वत्सरात्पूर्वतः स्थितं ॰ । वृद्धिर्वा गामिनी चेत्स्याद्वागपि

च कारयेत्॥ आधानांगभूतनांदीश्राद्धात् प्रागपकर्षमभिप्रेत्याहोशनाः पितुः सपिंडीकरणं वार्षिकं मृतवत्सरे ॰
आधान॰ नाद्युपसंप्राप्ता वेतत् प्रागपि वत्सरात्। तत्र चापकृष्यमाणे सपिंडीकरणे तदंतमपकर्षेस्यादिति न्यायात्।
पूर्वाणि मासिकादीन्यपकृष्य कृत्वा सपिंडीकरणं कर्तव्यं॥ वृद्धवसिष्ठोप्याह॥ श्राद्धानि षोडशादत्त्वा नैव कुर्यात्सपिंडनं
। तदूनौ तु कृते प्रेतः पितृत्वं न प्रपद्यते॥ अपकर्षपक्षएवैतत्। अनपकर्षे त्विक्रमविधानादेव तत्सिद्धेः॥ अतएव शा
ट्यायनिः। प्रेतश्राद्धानि सर्वाणि सपिंडीकरणे तथा॥ अपकृष्यापि कुर्वीत कर्तुं नांदीमुखं द्विजः॥ यत्तु लौगाक्षिव
चनं॥ यस्य संवत्सरादर्वाक् सपिंडीकरणं भवेत्॥ मासिकं चोदकुंभं च देयं तस्यापि वत्सरमिति तत्तु तदंतापकर्षमा
येन कृतेष्वपि मासिकेषु तान्येव तु पुनः कुर्यादिति कल्पसूत्रकारवचनोक्तपुनरनुष्ठानविषयत्वेन व्याख्येयं। अप
कृष्येत्यनुवृत्ता वाहोशना॥ वृद्धिश्राद्धविहीनस्तु प्रेतश्राद्धानि यश्चरेत्। अश्राद्धी नरके घोरे पितृभिः सहपच्यते। अ
नुपस्थितायां वृद्धौ यः प्रेतश्राद्धान्यपकर्षेदित्यर्थः। वृद्धिश्राद्धमंतरेणानपकर्षोयं समर्थविषयः। असमर्थविषये राम॰
तु वृद्धिश्राद्धप्रत्युपस्थानं विनाप्यपकर्षमपकृष्यमाणस्य च कालविकल्पानाह गोभिलः। पूर्णे संवत्सरे षण्मासे ७७

त्रिपक्षेवायदहर्वावृद्धिरापद्येतेति। अत्रकेचित्पूर्णेसंवत्सरेयदहर्वावृद्धिरापद्येतेत्येतयोः पक्षयोरनग्निकैकविषय
त्वं। षण्मासेत्रिपक्षेवेत्येतयोस्तुसाग्निकैकविषयत्वमितिव्यवस्थांमन्यंते। उद्भावयंतिचात्रपैठीनसिवचनं। त्रिपक्षे
ग्निमतः कालोवृद्धिश्चापूर्तकर्मसु। सपिंडीकरणंकुर्यात्पूर्णेसंवत्सरेपिवेति।। अग्निमत्सपिंडीकरणकालप्रकरणे
वक्ष्यमाणानिवचनान्युपन्यस्यंति।। अत्रेदंवक्तव्यं॰ यद्यग्निमत्वविशेषणावतस्त्रिपक्षादिपक्षाः संति। संतुते।
तस्यसंवत्सरांतेकर्तुंसमर्थस्याग्निमुख्यकल्पाअनग्निकत्वसामर्थ्यप्रयुक्ताः। प्रकृतेगोभिलवचनोक्तसंवत्सरपक्षे
लौकवाक्यतांगताः संतः संत्वनुकल्पाः। व्याघ्रस्त्वग्निरहितानामपिसहषोडशभिः श्राद्धैः सपिंडीकरणस्यद्वादशा
हएवप्रशस्तः कालइत्याह। आनंत्यात्कुलधर्माणांपुंसांचैवायुषः क्षयात्।। अस्थितेश्चशरीरस्यद्वादशाहः प्रशस्यते
। चतुर्विंशतिमते।। सपिंडीकरणंचाब्दे संक्षरणेऽभ्युदयेपिवा। द्वादशाहेतुकेषांचिन्मतंचैकादशेतथा।। इत्यनग्निसपिं
डीकरणकालाः।। अथसाग्निकसपिंडीकरणकालाः।। तत्राहलघुहारीतः। अनग्निस्तुयदावीरभवेत्कुर्यात्तदागृही
प्रेतश्चेदग्निमांस्तुस्यात्त्रिपक्षेवैसपिंडनं। अत्रगृहीश्राद्धकर्तापद्याहवनीयरहितः। प्रे॰ तश्चाहवनीयवान्भवेत्

दे॰क्रि॰
७८
78

तदाहकर्त्तृत्वस्य प्रेतस्य मृताहदिवसादारभ्य तृतीयेपक्षे सपिंडीकरणं कुर्यात्॥ तथा॥ यजमा ४२ नोग्निमान्वराजन्नू
प्रेत श्चानग्निमान् भवेत्॥ द्वादशाहे भवेत्कार्यं सपिंडीकरणं स्त्रियाः॥ अत्र मृताहादारभ्य द्वादशोह्नि इति वेदितव्यं॥ आ
ह कात्यायनः॥ एकादशाहं निर्वर्त्य पूर्वं दर्शाद्यथाविधि। प्रकुर्वीताग्निमान्विप्रो मातापित्रोः सपिंडतां॥ अस्याभिप्रायः॥
अग्निमता ह्यमावास्यायां पिंडपितृयज्ञः पिंडान्वाहार्यकं श्राद्धं च कर्तव्यं॥ तत्र प्रमीतमातापितृकस्य सपत्नीकपित्रादि
दैवत्यं न चाकृतसपिंडीकरणयोस्तयोर्दर्शश्राद्धादौ देवतात्वमुपपद्यते तस्य सपिंडीकरणोत्तरकालिकत्वस्मरणात्॥ अ
तः पिंडपितृयज्ञश्राद्धयोर्लोपो माभूदिति मत्वाग्निमान्विप्र एकादशाहकर्त्तव्यं प्रेतकार्यं निर्वर्त्य दर्शात्प्रागेव यस्मिन्क
स्मिन्नप्यहनि मातापित्रोः सपिंडीकरणं कुर्यादिति॥ अत एवाह प्रजापतिः॥ नासपिंड्याग्निमान्विप्रः पितृयज्ञं समा
चरेत्। न पार्वणं नाभ्युदयं कुर्वन्न लभते फलमिति॥ विप्रग्रहणमुपलक्षणं। क्षत्रियादिष्वपि न्यायस्य तुल्यत्वात्॥
।पक्षांतरमाह हारीतः॥ यातु पूर्वममावास्यां मृताहाद्दशमाद्भवेत्॥ सपिंडीकरणं तस्यात स्यां देवस्तुतोग्निमान्॥ मृ कुर्या२
ताहादारभ्य यद्दशममहर्भवति। तस्मात्परा यामावास्या तस्यामित्यर्थः॥ अत एवाह जाबालः॥ सपिंडीकरणं कुर्या राम॰
७८

त्सर्वे दर्शेऽग्निमान्स्तुतः। परतो दशरात्रस्य पूर्णत्वे तु तथापरः। मृताहमारभ्य यद्दशरात्रं तस्मात्परतो यः प्रथमो दर्शो
भवेत्। तस्मिन्नग्निमान्सुतः पित्रोः सपिंडीकरणं कुर्यात्। इत्यर्थः। दशरात्रग्रहणमाशौचकालोपलक्षणार्थं। त
देवं साग्निकस्यात्रयः सपिंडीकरणकाला उक्ता भवंति। द्वादशाहः दशाह्यपरकालीनायाऽमावास्यायाः पूर्वं किंम
प्येकस्मिन्नहः। दशाहात्परामावास्या चेति॥ इति साग्निकसपिंडीकरणकालास्त्रैवर्णिकानां॥ अथ शूद्रस्य सपिंडीक
रणकालाः॥ तत्र सपिंडीकरणं कर्तव्यमित्यनुवृत्तौ विष्णुः। मंत्रवर्जं हि शूद्राणां द्वादशेऽहनि कीर्तितमिति। अमावास्या
वृ श्राद्धकारिशूद्रविषयमेतदिति स्मृत्यर्थः। वचनबलादाशौचमध्य एव श्राद्धकरणं॥ इति शूद्रस्य सपिंडीकरणकालः॥
निर्णयामृते॥ अथ सपिंडीकरणे तस्याष्टौ काला भवंति॥ तदुक्तं कालादर्शे॥ एकादशे द्वादशेऽह्नि त्रिपक्षे वा त्रिमा
सि वा॥ षष्ठे चैकादशे वाब्दे संपूर्णे वा शुभागमे इति। शुभागम इति यद्दैवं विवाहाद्याभ्युदयिकं प्राप्तं ततः पूर्वं सपिंडीक
रणं कुर्यात्॥ तथा च बौधायनः। अथ संवत्सरे पूर्णे सपिंडीकरणं त्रिपक्षे वा तृतीये वा मासि षष्ठे एकादशे वा द्वादश्या
हे वैकादशाहे वेति। एषु चैकादशाहरूपः कालः कर्तरि पुत्रे साग्नौ एकादशाहे एव दर्शे सति स्यात्॥ तदाह कार्ष्णाजिनिः

दे॰ क्रि॰
७९

सपिंडीकरणं कुर्यात्पूर्ववच्चाग्निमान्सुतः। परतो दशरात्राच्चेत्कुर्यात्पूर्वोपरीतरइति। दशरात्रात्परतरएकादशेह्नि कुर्य्यादित्यर्थः। इतरो नग्निः। वृद्धवसिष्ठः॥ प्रथमात्स्याद्दमावास्या मृताहाद्दशमेहनि। सपिंडीकरणं तत्र कुर्यादेवसुतोग्निमान्। मृताहादितिमर्यादायां पंचमी। मृताहादूर्ध्वं दिनमारभ्येत्यर्थः। साग्नेरमावास्यायामपराह्णे पितृयज्ञेन चरंती ति पिंड पितृयज्ञविधानात्सपिंडीकरणे कृतएव पिंडपितृयज्ञप्रवृत्तेरेवं कर्तव्यमित्यर्थः॥ तदाह गालवः॥ सपिंडीकरणात्प्रेते पैतृकं पदमास्थिते। आहिताग्नेः सिनीवाल्यां पितृयज्ञः प्रवर्त्तते। सिनीवाल्यामिति दर्शोपलक्षणं भविष्यत्पुराणे॥ यजमानोग्निमान्राजन्नेतश्चानग्निमान्भवेत्। द्वादशाहे तदा कार्यं सपिंडीकरणं सुतैः। यजमानः कर्त्ता॥ कात्यायनोपि॥ एकादशाहं निर्वर्त्य प्राग्दर्शाद्यथाविधि। प्रकुर्वीताग्निमान्पुत्रो मातापित्रोः सपिंडतामिति अस्यार्थः। दशाहादूर्ध्वमेकादशेह्नि आद्यं श्राद्धं निर्वर्त्यप्याश्चात्सपिंडतां कुर्वीतेत्यर्थः। अन्यथा सर्वेषामेवर्णानामाद्यमेकादशेहनीति वाक्यविरोधः स्यात्। एकादशाहमिति षोडशश्राद्धोपलक्षणं। श्राद्धानि षोडशादत्वा नैव कुर्यात्सपिंडतामिति षोडशश्राद्धाकरणे सपिंडीकरणेधिकाराभावात्॥ कर्तर्यनग्नौ प्रेतेवाहिताग्नौ तृतीयः पक्षः कालः रा॰म॰
७८

। तदाहस्तुमंतुः। प्रेतश्चेदाहिताग्निः स्यात्कर्तानग्निर्यदा भवेत्। सपिंडीकरणं तस्य कुर्यात्पक्षे तृतीयक इति। अनग्नी
नां तु द्वादशाहाद्याः सप्तकाला भवंति। न वृद्धोपरीतरइमनग्नेः संवत्सरादूर्ध्वं कार्यमिति केचन। तत्सपिंडीकरण
विधिना कथं सप्तकाला इति चेत्। सत्यं। स एव मुख्यः कालः। तत्र देशकालादिस्वास्थ्यानिश्चयाद्द्वादशाह एव कार्यं
। तदाह व्याघ्रः। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्। अस्थितेश्च शरीरस्य द्वादशाहः प्रशस्यत इति।
तत्रासंभवे त्रिपक्षादिरपि कालस्तेनोक्तः। तदुक्तं भविष्योत्तरे। सपिंडीकरणं कुर्याद्यजमानस्त्वनग्निमान्।
अनाहिताग्नेः प्रेतस्य पूर्णेब्दे भरतर्षभ। द्वादशेहनि षष्ठे वा त्रिपक्षे वा त्रिमासि वा। एकादशेपि वा मासि मांगल्यस्या
उपस्थितौ। षष्ठे मासीत्यन्वयः। नागरखंडे ततः सपिंडीकरणं वत्सरादूर्ध्वतः स्थितं। वृद्धिर्वा यदि मध्ये स्यात्तदर्वाग
पि कारयेत्। चतुर्विंशतिमते। सपिंडीकरणं चाब्दे संपूर्णेभ्युदयेपि वा। द्वादशाहे तु केषांचिन्मतं तच्चैकादशे तथा
दीपिकायां। स्यात्सापिंड्यमनग्निकर्तृकमनग्नेः पूर्णेब्दे वर्षे। ततः प्रागभ्युदयागमे। अथनपडुश्चेन्मासषड्ग
ते। सार्धमासे कृतवासरे वित्रुपादेकादशे द्वादशे वा। साग्निकस्य तु निरग्निश्चेत्सपिंडीकृतौ। आयत्यात्ययता सरात्स

तनुयात्ताक्षत्रये० अथाग्निमात्कर्तृऽनग्निस्तपिंडनं मृतदिनात्कुर्याद्दिनद्वादशो। पित्रोः प्रेतकृतिं विधाय सकला
मेकादशाहे द्विजः। कस्मिंश्चिद्दिवधीतवाऽतवान्हि पुरतः। सापिंड्यमिंदुक्षपात्॥ एकादशदिने चेदमावास्या तदासाग्नि
केन तस्यामेव तत्पिंडीकरणं कार्यमित्याह स्वाशौचोत्तरदर्शवासरइदं साग्निधरे होति। ननु साग्निकस्य कर्तुरेकादशा
हद्वादशाहरूपकालानियमउक्तः। साग्नेः प्रेतस्य त्रिपक्षनियमः। यदा प्रमादात्तत्र न कृतं भवेत्। तदा सपिंडीक
रणं लोपः स्यादिति चेत्। न। गोभिलेन कालांतरविधानात्। द्वादशाहादिकालेषु प्रमादादननुष्ठितं। सपिंडीकरणं
कुर्यात्कालेषूत्तरभाविष्विति। उत्तरभाविषु त्रिपक्षादिषु॥ अत्र विशेषः। कृतं यत्र तदूर्ध्वानां मासिकानां पुनः क्रिया
। पुनरनुष्ठानं। संवत्सरादर्वाक्सपिंडीकरणनिमित्ता द्विरावृत्तिरूर्ध्वभाविनामेव॥ नाधोभाविनामित्यर्थः। तदा
ह कार्ष्णाजिनिः। अर्वाग्द्वादश्यत्र यत्र सपिंडीकरणं कृतं। तदूर्ध्वं मासिकानां स्याद्यथाकालमनुष्ठितिरिति। अत्र त्वाहिं
। संवत्सरे षष्ठे त्रिपक्षे मासे त्रिमासे द्विमासे एकमासे ऊर्ध्वमासे द्वादशरात्रे वा। एते विकल्पाश्चाग्नेः तत्रापेक्षया दृष्टव्याः॥ राम०
देशकुलगोत्राभिप्रायेण वा। साग्नेस्तु सर्वस्य पूर्वमेव दर्शादर्वागिति नियमः। अत्र जाबालः। सपिंडीकरणं कुर्या ८०

त्सर्वदर्शी। ह्यग्निमान्कृतः। परतो दर्शात्तत्र स्यात्पूर्णो ह्येतु तथापरः। तथा॥ नासपिंड्याग्निमाननुन्नः पितृयज्ञं समाचरेत्।
पापी भवति कुर्वाणो हि पितृहा चोपजायते॥ अत्र देवलः। मासपिंड्यां कृते प्रेते पितृकार्यं प्रवर्तते। ग्रहोपरागाष्टकयोः पं
च यज्ञेषु च पार्वणे॥ यतिधर्मेऽपि॥ नाश्नाति पितृसादेवामृते च गृहमेधिनि। भिक्षुर्भिक्षां न गृह्णाति यावत्कुर्यात्सपिंडतां
नित्यनैमित्तिके ह्यस्तं पितृकार्यादिकर्मलोपात् लुप्तकर्मणां गृहेषु भिक्षाग्रहणनिषेधात्। एतत्सर्वं नित्यनैमित्ति
कादिकर्मानुष्ठानमनग्नेरपि समानं। अतः संवत्सरं यावत्कर्मलोपभयादपकृष्य सपिंडनं तेनापि कार्यं। तथा च
व्याघ्रः। आनंत्यात्कुलधर्माणां पुंसां चैवायुषः क्षयात्॥ अस्थिरत्वाच्छरीरस्य द्वादशाहः प्रशस्यते। तथा विष्णुरपि।
एवं सपिंडीकरणं मासिकान्यब्दं द्वादशाहं श्राद्धं कृत्वा त्रयोदशेऽह्नि कुर्यात्॥ सपिंडीकरणस्य गौणकालमाहऋ
ऋष्यशृंगः। सपिंडीकरणं श्राद्धमुक्तकालेन चेत्कृतं। रौद्रे हस्ते च रोहिण्यां मैत्रमेवा समाचरेत्॥ न त्वयं सपिंडीक
रणापकर्षः साग्निविषयः। निरग्नेः संवत्सरे पूर्णेऽधिकार इति नियमः। तन्न। व्याघ्रविष्ण्वादिवाक्यानां साधारणत्वा
द्विशेषः। शक्यते वक्तुं प्रमाणाभावात्। कुलधर्मायुःक्षयादीनां चानग्नेरपि संभवात्। दृश्यते चानग्नेरप्याहुः

द्वै·क्रि·
८१

९८

क्षयादयः। विष्णुना तु केवलमनग्नेः शूद्रस्याप्यकपर्षोदर्शितो मंत्रवर्ज्जं हि शूद्राणामिति वचनात्। पंचमहायज्ञादिकर्म
लोपो ग्रहोपरागादि श्राद्धविधिश्च तर्पणं साधारणमिति। अत्र कर्मलोपपरिहाराय कैश्चित्परिकल्पितं। प्रमीतपि
तृक पुत्र एकादशाहादनंतरं येभ्यः पित्रा जीवता दत्तं तेभ्यः पुत्रः सपिंडीकरणं यावद्दद्यादिति। तत्स्मृतिशास्त्रानभि
ज्ञतया अनभिज्ञकल्पनोपेक्षणीया प्रमाणाभावात्॥ अतो नात्मनः संवत्सरं यावत्कर्मलोपः कर्तुं युक्तो नापि
मृतस्य पित्रादेः प्रेतलोके वासश्चिरं कर्तुं युक्तः प्रतिदिनमायुःक्षयात्॥ शरीरस्यास्थितेश्च। श्वः कार्यमद्य कुर्वीत
त्युपदेशात्। शास्त्रकरणादपकर्षविधानादविकलशास्त्रार्थसंपन्नेश्च॥ अतोपकर्षपक्षः शोभनः। ननु भवत्वप
कर्षः सपिंडतामात्रस्य। न मासिकानां। नाप्युदकुंभस्य॥ तथा च याज्ञवल्क्यः। अर्वाक्सपिंडीकरणाद्यस्य संवत्स
राद्भवेत्॥ तस्याप्यन्नं सोदकुंभं दद्यात्संवत्सरं द्विजे इति। अत्रोच्यते॥ मासिकानुदकुंभश्चाप्यपकृष्यंते। मासिकाप
कर्षपक्षे तावच्छंदोगपरिशिष्टे कात्यायनः। एकादशाहे निर्वर्त्य पूर्वं श्राद्धानि षोडश। प्रकुर्वीत त्रिमासं तु ततो मातापि राम·
त्रोः सपिंडतां। ननु सामान्येनैषोपकर्षः आम्नातो न निरग्नेः॥ तन्न। सर्वसाधारणात्॥ तथा च वृद्धवसिष्ठः। श्राद्धानि षो ८१

इत्यादत्त्वा न कुर्यात्सहपिंडतां। तद्दानेन त्वकृते प्रेतः पितृत्वं न प्रपद्यते। किं चोत्तरकालं निषेधोप्यस्ति।। तथा च कात्यायनः
। सपिंडीकरणादूर्ध्वं न दद्यात्प्रतिमासिकं।। तथा शातातपः। अर्वाक् चेद्वत्सराद्वृद्धौ पूर्णे संवत्सरेपि वा। ये सपिंडीकृताः
प्रेताः तेषां तु न पृथक्क्रिया। एवं सति य एव प्राक्तनः क्रमो विहितः स एवापकर्षपक्षेपि कार्यः।। तथा च मारीचिः। मुख्यं
श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति। द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा।। द्वादशग्रहणं षोडशश्राद्धोपलक्षणा
र्थं। विष्णुश्च। वत्सराभ्यंतरे यद्यधिमासो भवेत्। तदा मासिकार्थं द्विजमेकं वृद्धिं नयेत्। अयमर्थः। यदा पुत्रादिः
संवत्सरे पूर्णे सपिंडतां कुर्यात्तदा प्रतिमासं क्रियमाणेधिकस्य मासस्य स्वस्थान एव वृद्धिः। यदाल्पकर्षो मासि
कादीनां तदाधिमासस्थान एकस्य मासिकस्य वृद्धिः कार्या। कौथुमिः। अब्दमंबुघटं दद्यादन्नं वापि ससंयुतं। सं
वत्सरे विवृद्धेपि प्रतिमासं च मासिकं। एतेनोदकुंभो व्याख्यातः। यदा पुनर्द्वादशोधिमासो भवेत्। तदा तत्रैव मासिका
न्युदकुंभं च सर्वं तत्र समाप्य सपिंडतां कुर्यात्। अपकर्षपक्षेपि सर्वं तत्रैव समापयेत्। प्रेतकार्यं नाधिकं कुर्यात्। तथा
च लघुहारीतः।। असंक्रांतेपि कर्तव्यं माब्दिकं प्रथमं द्विजैः।। तथैव मासिकं सर्वं सपिंडीकरणं तथा। उदकुंभस्यापकर्षो

स्तित थाच विष्णुः। अर्वाक्सपिंडीकरणात्प्रेतो भवति वै मृतः। प्रेतलोकगतस्यान्नं सोदकुंभं प्रयच्छत॥ अयमर्थः।
अपकृष्य वानपकृष्य वा सपिंडीकरणे कृते सति प्रेतत्वनिवृत्तिः। तन्निवृत्तौ पितृलोकप्राप्तिः। पितृलोकगतस्यान्नं श्रा
द्धं भुंक्ते स्वधासमं। पितृलोकगतस्यास्य तस्मा छ्राद्धं प्रयच्छतेति। एतद्वाक्यद्वयविमर्शनात्। सपिंडीकरणापकर्षे स
ति उदकुंभापकर्षोपि ज्ञायते॥ एतद्वाक्यद्वयं गोविंदराजेनोक्तमिति बोद्धव्यं। तथाभूतवाक्यरचनात्। वाक्यमपि
प्रत्यक्षमस्ति। तथा च स्कंदपुराणे। सवित्सरिके प्रेतोदकुंभापकर्षपक्षे। अन्नं चैव सशक्त्यात्तु संख्यां कृत्वाह्निकस्य च।
दातव्यं ब्राह्मणे स्कंद घटादौ निक्षपंश्च यत्। अपि श्राद्धसतैर्दत्तैरुदकुंभं विना नरः। दरिद्रा दुःखिनस्तात भ्रमंति व
भवार्णवे। तेनापकृष्य दातव्यं प्रेतस्याप्युदकुंभकं॥ मार्कंडेयः। आमश्राद्धानि दत्तानि भुज्यंते तत्र मानवैः। ननु याज्ञ
वल्क्यवचनविरोधः। तदुच्यते॥ तस्य वाक्यस्यैवं योजना कार्या॥ यस्य संवत्सरादर्वाक्सपिंडीकरणं भवेत्। तस्यापि प्रे
तस्य यतस्य यद्वर्षं यावत्प्रदेयत्वेनान्नं सोदकुंभं विहितमस्ति। तदर्वाक्सपिंडीकरणाद्द्द्यात्। अपि शब्दोवधारणे। अ
वश्यदातव्य त्वात्तस्य। किंच प्रेत शब्दोच्चारणेनोदकुंभदानात्। सपिंडीकरणोत्तरकालं च प्रेतशब्द प्रयोगनिषेधः।

तथा च शातातपः। सपिंडीकरणं श्राद्धं दैवपूर्वं नियोजयेत्॥ पितॄनावाहयेत्तत्र पुनः प्रेतं न निर्दिशेत्। सपिंडीकरणोत्त
रकालं न प्रेतनिर्देशः। नैकस्य दानमिति। तथा हारीतः। अन्नं कुंभं च विप्राय प्रेतनिर्देशधर्मतः। सपिंडीकरणोत्तरकाला
नुवृत्तौ पुनर्हारीतः। नैकस्य दानमिति। ततः प्रभृति वै प्रेतः पितृसामान्यमाप्नुयात्। विंदते पितृलोकं च ततः श्राद्धं प्रवर्त्त
ते। सचोदकुंभाकिं पृथक्कृत्वा एकस्य दीयते। उत्तरयाणां एकस्य दाने प्रमाणाभावात्। श्राद्धधर्मैरशेषैस्तत्पूर्वानिर्व
येत् इत्यादिभिर्वाक्यैः सपिंडीकरणोत्तरकालं समस्तप्रकृयानिवृत्तैः पृथग्दाने निषेधात्॥ तथा च पुनर्हारीतः।
सपिंडीकरणोवृत्ते पृथक्त्वं नोपपद्यते। पृथक्त्वे तु कृते पश्चात्पुनः कुर्यात्सपिंडनं। सपिंडीकरणोत्तरकालं विष्णुप्रभृतिभिः
सर्वैरुदकुंभदानस्य निषिद्धत्वात्। सपिंडीकरणादूर्ध्वं न दद्यादुदकुंभकं। तेनोत्तरकालं दीयत इति विकल्पासंभवः। एवं
सतियस्य वाक्यस्य यथासंगतिस्तत्र थायोज्यं॥ अथ नवश्राद्धादिः। सपिंडीकरणांतः क्रमो विधेर्विवक्षितः। अतो योन
पकर्षपक्षे क्रमः। स एवापकर्षपक्षे दैवमानुषोपघातकृती त्कर्षपक्षेपि कार्यः। कृत इति चेत्॥ श्रौतस्मार्तन्यायविरो
धात्। शिष्टाचारविरोधाच्च॥ कालनिर्णयदीपिकायां॥ सात्सापिंड्यमनग्निकर्तृकमनग्नेः पूर्णेवर्षे॥ ततः प्रागस्मुद

दे॰क्रि॰ याग्रमे। अथ न पडुक्ते मासि षष्ठे गते सार्द्धे मास्तृत वासरे वितनुयादेकादशे द्वादशी वेति। न्यूनाब्दस्य पिंडने च पित्रोरास्या
८३ त्षोडशानां कृतिः श्राद्धानामिति॥ तथा च तत्रैव मासिकानां च कालाः। अथ शक्तिर्न चेत्। स्युः षड्भिर्स्त्रिभिर्द्दिनै रवि
83 भिस्तैरेकत्र वा द्वादशे वाह्नि द्वादशमासिकानि तद्दिने सापिंड्यं तीर्वाक्स्मृतां षड्भिः रात्रिभिर्द्वादशमासिकानि रात्रं प्रति
द्वैमासिके इत्यर्थः॥ तथा च हारीतः। मुख्यं श्राद्धं मासि मासि अपर्याप्तावृतुं प्रति। द्वादशाहे न वा भोज्याएकाहे द्वादशापि वे
ति। अत्र द्वादशभिरहोभिर्मासिकानुष्ठानेऽन मासिकादीनि चत्वारि प्रथममासि त्रीणि पक्षद्वादशदिनेषु कर्त्तव्यानि ए
वं षोडशश्राद्धानि भवंति। द्वादशापि वेत्यत्र द्वादशग्रहणं षोडशानामुपलक्षणं। अयं च पक्षो वृद्ध्यादिनिमित्तापकर्षे
वोद्धव्यः। ततश्चापकर्षकालात्पूर्वमतव्यतिरिक्तानि यावंति भवंति तत्संख्याकदिनेषु तावंति कृत्वोत्तरदिने सपिंडीकरणं
कर्त्तव्यं। एकाहे द्वादशापि वेति पक्षे तंत्रेण सर्वाणि मासिकानि कर्त्तव्यानि। तत्राविप्रतिपत्तिः। प्रति श्राद्धमेकैकमयुग्मा
न्वा ब्राह्मणान्पृथक्पृथगुपवेश्य द्वादशाहविहितोनमासिकप्रभृतिन्यूनाब्दिकांतानि श्राद्धानि तंत्रेण कुर्यात्। ततश्च राम॰ ८३
ति श्राद्धमर्घ्यपिंडकरणं। अत एव एकाहे द्वादशापि वेति द्वादशस्तु श्राद्धेषु पृथगेकैकभोजनेन समुदितेषु द्वादशत्वमुक्तं

अपंचपक्षोयुक्ततरइवाभाति। वचनमूलत्वात्। द्वादशाहेथवा भोज्याएकाहे द्वादशापि वेति क्वचित्पाठः। अथवा
द्वादशाहे एकाहे द्वादशापि भोज्याः। एतच्च देशकालदेवताकर्त्रैक्ये तंत्रमिति द्वादशाहेथ सर्वाणि संक्षेपेण समापये-
दित्युक्तानुवादः। द्वादशापि वा च पुनरर्थे। एकं त्रीन्वा ब्राह्मणानुपवेश्य तंत्रेण सर्वश्राद्धानि विधाय सपिंडीकरणं
कुर्यादिति। वितृद्धिविधिविध्वंशे तु प्रकारां[illegible]तरमुक्तमस्ति। श्राद्धानि षोडशापाद्य विदधीत सपिंडनं। तथा श्रा-
द्धानि षोडशादत्वा नतु कुर्यात्सपिंडतामिति पादिभिर्वाक्यैः षोडशश्राद्धानि कालेवैव सपिंडीकरणं कर्तुं। अभिम-
तं। यदा च सपिंडीकरणं संवत्सरात्प्रागेकादशाहद्वादशाहाभ्युदयागमत्रिपक्षषण्मासादौ क्रियते। तदा मासिका-
न्यपकृष्य तंत्रेण कर्तव्यानि। अत एवोक्तं। द्वादशाहेथ सर्वाणि संक्षेपेण समापयेदिति।। संक्षेपव्यतिरेकेण क्रि-
यमाणश्राद्धषट्केोद्दिष्टविषयोक्तकुतपारंभरोहिणातिक्रमसमाप्तौ रनिष्टत्वेनैव संक्षेपेण समापयेदित्युक्तं।
गणितात्सिद्धांतकालः कालेतिष्ठंति देवताः। वरमेकाहुतिः काले नाकाले कोटिसंख्यया। कालातीतं च यः कुर्या-
च्छ्राद्धं होमं जपं तथा। व्यर्थं भवति तत्सर्वमिष्टे तेनु विधं यथा। कालेस्थिताः कालवशाश्च सर्वे कालोपजीवाः कलिकाल

दे॰ क्रि॰
८४

84

जाताः। देवा देयो येन हर्तेन तस्मात्कालं प्रयुक्तं समुदाहरंतीति शातातपेनोक्तत्वात्॥ संक्षेपो ह्यत्र ब्रह्मादिस्तंब
पर्यंतं जगत्तृप्यत्विति ब्रुवन्। जलांजलित्रयं दद्यात् कुर्वन्संक्षेपतर्पणमिति संक्षेपनिदर्शनेन द्वादशाहाद्यनाह्निक
पर्यंतेषु श्राद्धेषु क्षणाः क्रियतामित्यादिनिमंत्रणादिविषयप्रयोगरूपस्तेषु विप्रेष्वेकस्मिन्वा तंत्राशनैकोद्दिष्टपिंडदा
नादिरूपश्च संक्षेपोक्तिः अत्र देशकालदेवताकर्त्रैक्ये तंत्रमिति पारिभाषिकानुवादरूपा। अतो नैकः श्राद्धद्वयं कु
र्यात्समानेऽहनि कर्हिचिदिति जमदग्निवाक्यमपि पृथक् श्राद्धद्वयकरणएव निषेधकं न तंत्रकरणे॥ कालनिर्णयदी
पिकायामप्युक्तं। स्याच्चेच्छ्राद्धनिमित्तकालयुगपद्भावस्तदैकक्रियानुष्ठानात्सकलस्य सिद्धिः स्यादिति तंत्रेण संकल्प इति
।एवं च सति कात्यायनेनापि गणशः क्रियमाणे तु मातृभ्यः पूजनं सकृत्। सकृदेवे भवेच्छ्राद्धं न पृथक्पृथगादिषु इ
त्येत्रयदेशाद्यैक्ये सकृत्करणमात्रस्य जनेककर्मगश्राद्धेषु चोक्तेस्तदपि सर्वकर्मग्रहणं प्रयोगैक्यारूपतंत्रपक्षेलोव ज्ञेय
मित्यविरोधः। एवममावास्याहि श्राद्धसंनिपातेपि ज्ञेयं। सपिंडापिंडश्राद्धसंनिपाते तु तंत्रप्रयोगस्तु चार्यः सपिंड राम॰
श्राद्धविधिनैव सकृच्छ्राद्धं कर्तव्यं। सपिंडश्राद्धविधावपिंडश्राद्धविधेरंतर्भावात्। अपिंडश्राद्धविधौ तदंतर्भावाभा ८४

वात। नित्यश्राद्धस्वरूपरक्षणार्थं तस्यापि संभवः यद्यपि नित्यश्राद्धस्य न कुतपादिकालः। तथापि नैकः श्राद्धद्वयं कुर्यात्स
माने हनि कर्हिचिदिति ग्रहणेन भिन्नकालानमपि श्राद्धं निषिद्धं। अत एव नैमित्तिकः काम्यो वा यो विधिस्तयोर्नि
त्यो निविशत इति गृह्ये प्युक्तं एतत्सर्वं जातीयश्राद्धे ज्ञेयं। विजातीयश्राद्धसंनिपाते विधिभेदेनांतर्भावासंभवात्पृथ
क्करणमेव॥ तथा च ब्रह्मांडपुराणे। यद्येकत्र भवेज्ज्ञातुरेकोद्दिष्टं तु पार्वणं। पार्वणं त्वभिनिर्वर्त्य एकोद्दिष्टं समाचरे
दिति॥ स्मृत्यंतरे च। एकस्मिन्वासरे स्यातां वृद्धिसांवत्सरावुभौ। पूर्वं सांवत्सरं कुर्यात्ततः परमिति। आशौचसंकोचे
नि वासद्यः शौचेन वा नव श्राद्धसंनिपाते पितृशाहपिंडाः पृथक् कार्याः प्रथमेहनि यः पिंडस्तेन मूर्धा प्रजायत इत्या
दिभिर्दशपिंडानामेव शरीरोत्पत्तिहेतुत्वोक्तेः। अत एव सद्यः शौचे पितृणां तथाः सर्वेषां युगपत्तथैत्याद्युक्तं। शेषश्राद्धाना
मपकर्षकरणमनुज्ञानमपि समुच्चयार्थं। न तु स्वस्वकालप्राप्तश्राद्धानां विलोपार्थं। न ह्यासस्यापि विलोपोऽस्ति प्रेतक
स्य विशेषतः। वक्ष्यमाणकाले कृतिः कालेनाकाले कोटिसंमितेति वचनात्। प्रेतसंस्कारकर्माणि यानि श्राद्धानि षोडश
क यथाकालं तु कार्याणि नान्यथा मुच्यते ततः इति हारीतवचनाच्च॥ तत इति प्रेतत्वादित्यर्थः। अत एव सूत्रकारेणो

कं द्वादशाहेथ सर्वाणि संक्षेपेण समापयेत्। तान्येव तु पुनः कुर्यात्प्रेतशब्दं न कारयेदिति॥ ॥ इति षोडशश्राद्धानि॥
॥ ॥ अथ सपिंडीकरणप्रयोगः॥ तत्र संवत्सरं प्रेतकर्माण्यभिधायोक्तं मार्कंडेयपुराणे॥ अथ संवत्सरे पूर्णे
यथावत्क्रियते नरैः॥ सपिंडीकरणं श्राद्धं तत्रापि विधिरुच्यते॥ अत्र संवत्सरे पूर्णे इत्ययमौत्सर्गिकः कालः। का
रणांतरप्रयुक्तास्त्वपूर्णेपि संवत्सरे अस्यापवादिकाः कालास्ते सर्वेपि पूर्वमेव कालप्रकरणे प्रतिपादिताः। सपिं
डीकरणलक्षणं तु श्राद्धभेदप्रकरणे प्रतिपादितं। तस्यैवैतावत्संक्षेपतो रूपं। अचिरप्रमीतप्रेतीभूतमनुष्योद्देशे
नैकोद्दिष्टविधिनापि तत्त्वप्राप्तये तत्पूर्वमनुष्योद्देशेन पार्वणविधिना युगपदेकप्रयोगात्मकत्वेन ब्राह्मणभोज
नेनुष्ठीयमाने प्रेतार्घोदकं पित्रर्घपात्रेषु प्रेतपिंडश्च पिंडपिंडेषु विभज्य प्रक्षिप्यत इति सपिंडीकरणस्य विधि
रुच्यत इति प्रतिज्ञायास्मिन्नेव पुराणेभिहितं। प्रेतोद्देशेन कर्तव्यं श्राद्धं तत्र समाहितैः। तच्चापि दैवरहितमेकार्घै
कपवित्रकं॥ नैवाग्नौकरणं॥ तत्र तच्चावाहनवर्जितं॥ अपसव्यं च तत्रापि भोजयेद्युजो द्विजान्॥ पितृत्रयार्घमपि च भो
जयेद्वत्तथापरान्॥ विशेषस्तत्र चान्योस्ति प्रतिमाससक्रियाधिक। तं कथ्यमानमेकाग्र्यात् शृण्वतो मे निशामय। ति

लगंधोदकैर्युक्तं तत्रपात्रचतुष्टयं। कुर्यात्तिलहस्ताणां त्रितयमेकं प्रेतस्यपुत्रकः। पात्रत्रये प्रेतपात्रमर्घार्थं च प्रसेचये
त्। ये समाना इति जपन् पूर्ववदेकमाचरेत्। स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदाहृतम्। सपिंडीकरणं तासां
पुत्राभावेनविद्यते। एकोद्दिष्टं तु वै तासां कर्तव्यं बुधिसत्तमा॥ भविष्यत्पुराणे पात्राणि कृत्वा चत्वारि पूरयित्वा
तिलांबुभिः। त्रिष्वेकं पितृपात्रेषु प्रसिंचेन्नामगोत्रतः॥ याज्ञवल्क्यः। गंधोदकतिलैर्युक्तं कुर्यात्पात्रचतुष्टयं।
। अर्घार्थं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत्। ये समाना इति द्वाभ्यां शेषं पूर्ववदाचरेत्। यत्तु सपिंडीकरणमेकोद्दि
ष्टं स्त्रिया अपि। गंधैश्चंदनादिभिरुदकेन तिलैश्च युक्तं पात्रचतुष्टयं प्रेतादिभ्यो ऽर्घदानं कुर्यात्। ततः प्रेताया
र्घं दत्वा तत्पात्रस्थं जलं पितामहादिपात्रेषु ये समाना इति द्वाभ्यां मंत्राभ्यां यथाक्रमं पितृदेवताभ्यां प्रसिंचेत्। शेषं
तु कर्म ब्राह्मणातिमंत्रणादि पार्वणवदाचरेत्। एतदुक्त प्रकारं पितामहदेवत्यं पार्वणं प्रेतदैवत्यं चैकोद्दिष्टं श्राद्धं
सपिंडीकरण संज्ञकं वदितव्यं। स्त्रिया अपि चैतत्कार्यं। न पुनः पुरुषस्यैव वतु विंशति मते। सपिंडीकरणं चाद्दे
संपूर्णे ऽभ्युदये पि वा। द्वादशाहे तु केषांचिन्मतं वै कादशे तथा॥ पूर्वं कृत्वा नवं प्रेतपुत्रस्त्वपितामहान्। चतुर्भिः

दे॰ क्रि॰ ९६

96

पितृभिर्युक्तं पार्वणं तु विधीयते॥ चत्वारि चार्घपात्राणि अर्चयेत् सर्ववस्तुभिः। प्रेतपात्रं पितॄणां तु पात्रेषु निनयेद् बुधः
। मधुवाता ऋतायते जस्मास्तं गच्छध्वमिति त्र्यृचं। ये समाना इति द्वाभ्यां केचिदिच्छन्ति सूरयः। एवं पिण्डेषु कर्तव्यं परमं तु वि
सर्जनं॥ ॥ आश्वलायनगृह्यपरिशिष्टं॥ अथ सपिण्डीकरणं चत्वार्युदपात्राणि एकं प्रेतस्य त्रीणीतरेषां प्रथमं
पात्रं त्रिषु पात्रेषु नियोजयेत् समानीय आकूतिरित्येवमेवं प्रथमं पिण्डं त्रिषु पिण्डेषु नियोजयेत् मधुमतीभिः संगच्छध्व
मिति द्वाभ्यामेवं चतुर्थो नुज्ञापितो भवतीति। न चात्र दैवं भोजयेत् प्रागेव दैवर्घ मन्त्राद्यं च दत्वा गंधमाल्यैः पात्रम
र्चयित्वा कृतशेषं पितृभ्यः पात्रेषु दद्यात्॥ कात्यायनः॥ ततः संवत्सरे पूर्णे चत्वारि पात्राणि सतिलगंधोदका
नि पूरयित्वा त्रीणि पितॄणामेकं प्रेतस्य प्रेतपात्रं पितृपात्रेष्वासिंचति ये समाना इति द्वाभ्यामेतेन पिण्डो व्याख्यातः
कूर्मपुराणे॥ सपिण्डीकरणं प्रोक्तं पूर्णे संवत्सरे पुनः। कुर्याच्चत्वारि पात्राणि प्रेतादीनां द्विजोत्तमाः। प्रेतार्घ्यं
पितृपात्रेषु पात्रमासेचयेत् ततः। ये समाना इति द्वाभ्यां पिण्डानप्येवमेव हि। सपिण्डीकरणं श्राद्धं दैवपूर्वं विधीयते राम॰
पितॄनावाहयेत्तत्र पुनः प्रेतं च निर्दिशेत्॥ बैजवापः। अथ सपिण्डीकरणं संवत्सरमेकं पिण्डमनुद्दिश्य समाप्ते ९६

संवत्सरे च त्वार्घुद्दपात्राणि प्रयुनक्ति तत्रैकं प्रेताय त्रीणि पितृभ्यः प्रेतपात्रं पितृपात्रेष्वासिंचति ये समाना इति द्वा
भ्यामेव पिंडो प्यभिमृशत्येष वो नुगतः प्रेतः पितरस्तं दधामि वः। शिवमस्त्विति शेषाणां जायतां चिरजीविता। स
मानीव आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सुसहासति। संगच्छध्वं संवदध्वं सं वो मनांसि
जानतां। देवभागं यथापूर्वे संजानाना उपासते। त्वभिशस्तपतितभ्रूणहनस्त्री चातिचारिणी नातिदिशेत्। अतिदेशः
पितृभिः सहसंवर्जनं॥ अत्राह हारीतः। समाप्तेब्दे पशुश्राद्धं विधिवत्प्रतिपादयेत्। ततः चतुरो निर्वपेत् पिंडान्प्र
थमं तेषु संधयेत्॥ वपां पशुवसां चैव ह्यवदानानि यानि च। कृत्वा तानि विधानेन शेषास्तिं ज्ञात्समावयेत्। ततः प्र
भृति वै प्रेतः पितृसामान्यमाप्नुयात्। विंदते पितृलोकं च ततः श्राद्धं प्रवर्तते। विधिना च निपुणस्यापि वह्नौ मासि नि
वैपणेः। तावद्वर्षसहस्राणि स्वर्गलोके महीयते॥ आह विष्णुः। संवत्सरांते प्रेताय तत्पित्रे तत्पितामहाय त्पितामहा त्प
य च ब्राह्मणान्देवपूर्वान्भोजयेत् अत्रौकरणमावाहनं पाद्यं च कुर्यात् संसृजं तु त्वा पृथिवी समानीव इति प्रेतपात्रं पा
त्रत्रये योजयेत् उच्छिष्टसंनिधौ पिंडचतुष्टयं कुर्यात् ब्राह्मणांश्चाचांतान्दत्तदक्षिणांश्चानुव्रज्य विसर्जयेत् तत्राः

प्रेतपिंडं पात्रपाद्योदकवत्पिंडत्रयो निदध्यात् कर्षूत्रयसंनिकर्षेऽप्येवं। एवं सपिंडीकरणं मासिकार्थवद्द्वादशाहं [घो]
कृत्वा त्रयोदशेऽह्नि वा कुर्यान्मंत्रवर्जं हि शूद्राणां द्वादशेऽह्नि वत्सरान्तरे पञ्चाधिमासो भवेत्तदा मासिकार्थे दिनमेकं
च वर्जयेत् इति॥ अस्यार्थः। कर्षूत्रयसंनिकर्षेऽप्येवमिति प्रेतैकोद्दिष्टसंबंधि कर्षूत्रयसंनिहितान् पिंडपिंडान् पि
त्रादिपिंडेषु योजयेत्॥ मासिभवानि श्राद्धानि मासिकानि। तदर्थः प्रेताप्यायनादिः तत्फलकानि श्राद्धानि मासि
कार्थवंति। तान्याशौचापगमे द्वादशाहे। द्वादशस्वहःसु कृत्वा त्रयोदशेऽह्नि सपिंडीकरणं कुर्यादित्यर्थः। अ
त्रोनमासिकादीनि प्रथमतृतीयषष्ठद्वादशदिनेषु कर्तव्यानि। एवं षोडशश्राद्धानि। अयं पक्षो वृद्ध्यादिनिमि
त्तापकर्षे बोद्धव्यः। अत एव द्वादशाहं श्राद्धं कृत्वेति प्रदर्शनार्थं। ततश्चापकर्षकालात्पूर्वकृतव्यतिरिक्तानि यावंति भवंति
तत्संख्याकदिनेषु तावंति कृत्वोत्तरदिने सपिंडीकरणं कर्तव्यं। शूद्राणां तु आशौचादनंतरं द्वादशस्वहःसु द्वादश
श्राद्धानि कृत्वा द्वादशेऽह्न्येव मंत्रवर्जं सपिंडीकरणं कर्तव्यं न त्रयोदशेऽह्नि। इतरवत्। काठकगृह्ये। चतुर्थपिंडमुत्सृ श्रा० ८७
ज्य त्रेधं कृत्वा पिंडेषु निदध्यात्। संसृजतु त्वा पृथिवी वायुरग्निः प्रजापतिः। संसृज्यध्वं पूर्वेभिः पितृभिः सहसमानाः

संयोमनांसीत्येवमुद्दकमिति॥ ब्रह्मपुराणे॥ चतुर्भ्यश्चार्घपात्रेभ्य एकं वामेन पाणिना॥ गृहीत्वा दक्षिणेनैव पाणि
ना चतिलोदकं। संसृजेत्तत्ता पृथिवी ये समाना इति त्रुवन्॥ प्रेतविप्रस्य हस्ते तु चतुर्भागं जलं क्षिपेत्॥ ततः पितामहा
दिभ्यस्तन्मंत्रैस्त्रः पृथक्पृथक्। ये समाना इति द्वाभ्यां तज्जलं तु समर्पयेत्॥ अर्घ्यं तेनैव विधिना प्रेतपात्रात्तु पूर्ववत्
तेभ्यश्चार्घ्यं निवेद्यैव पश्चाद्वस्त्रं समाचरेत्॥ अथ तेनैव विधिना दर्भमूलेऽवनेजनं। पितुर्दत्वा त्रपिण्डं तद्दद्यात् कृत्वा
तु पूर्ववत्। दत्वा पिण्डमथ प्राच्यां गंधात्वा तु वसुभास्करं। सुवर्णरूप्यदर्भैस्तु तस्मिन्पिंडे ततस्त्रिधा॥ कृत्वा पितामहा
दिभ्यः पितृभ्यः प्रेतमर्पयेत्॥ संसृजेत्तु ता पृथिवी वायुरग्निः प्रजापतिः। एतन्मंत्रं जपेद्धत्वा समानावंतमेव च।
ये समाना इति द्वाभ्यां पितृभ्यः प्रेतमर्पयेत्। संवर्तुलांस्ततस्तांस्त्रीन्पिंडान्कृत्वा प्रपूजयेत्॥ अर्घपुष्पैस्तथा धूपै
र्दीपमाल्यानुलेपनैः॥ मुख्यं तु पितरं कृत्वा पुनस्त्रीन्यथाक्रमं। अत्र सर्वत्र प्रेतशब्देनाचिरप्रमीत उच्यते न
पुनः प्रकर्षेण इतो गत इति चतुर्थ्या वृद्धप्रपितामह इति॥ तदाह गार्ग्यः। समानं तेषु पितृभिः प्रेतं योजयेत् पितरं स्व
तः। तदादि पार्वणं श्राद्धं स्मृताहन्यपि नान्यथा॥ पुराणे श्राद्धद्वयमुपक्रम्य कुर्वीत सह पिंडनं॥ तयोस्त्रिपुरुषं पू

र्व मे को द्दिष्टं ततः परं ॥ काठपरिशिष्टे ॥ ॥ दत्वा पिंडान्पितृभ्योथ पश्चात्प्रेताय धर्मतः । तं तु पिंडं त्रिधा कृत्वा अन्नं तु ह्रस्व्यां
नु संततं । निदध्यात्त्रिषु पिंडेषु एष संसर्जने विधिः ॥ ब्रह्मांडपुराणे ॥ सपिंडीकरणात्पूर्वं प्रेतो भवति वै मृतः । कृते
सपिंडीकरणे पितृत्वं प्रतिपद्यते ॥ शातातपः । संवत्सरे तु विज्ञेयं सपिंडीकरणं त्विह । सपिंडीकरणं तावज्ज्ञेयाः
प्रेतक्रिया बुधैः । अनेन नवमासिकादौ प्रेतशब्दाभिधेयोऽपि स्मृतः सएव सपिंडीकरणेऽपीतिगम्यते । अतो नवप्रमी
तस्य पित्रादेरर्घपात्रं पितामहाद्यर्घपात्रेषु पिंडं च पिंडेषु संयोजनीय इति स्थितं । पितामहे ध्रियमाणे यदि पिता प्रमी
तः स्यात्तदा पितामहं परित्यज्य प्रपितामहात्प्रभृति पुरुषत्रयेण सह सपिंडीकरणं कार्यं । तथा च ब्रह्मपुराणे ।
मृते पितर्यस्यार्थ विद्यते तु पितामहः । तेन देयास्त्रयः पिंडाः । प्रपितामहपूर्वकाः । तेभ्यश्च पैतृकः पिंडो नियोक्तव्य
स्तु पूर्ववत् । न देयो जीवते पिंडः स च यस्मान्मृतो भवेत् । पिंडस्तु जीवतो हस्ते शिरःच्छेदसमो भवेत् । अयं च जीवत्पि
तामहकस्य पितृसपिंडीकरणप्रकारो जीवपितृकाद्याधिकारिक पिंडपितृयज्ञप्रकारेणामुपलक्षणार्थं द्रष्टव्य नु सं
धेयं । अत्र पितामहादिभिः सह सपिंडीकरणोक्ते पि पितामहो परमे सति तद्दर्शोद्दिष्टे दैहिके सपिंडीकरणं ते कृते पुनः

पितामहेनापि सह पितुः सपिंडीकरणं कर्तव्यं अन्यथामावास्यादिकालानुष्ठेयं श्राद्धं न निष्पद्येतेति केचित्। म्रियमा
णायां पितामह्यां मातुः सपिंडीकरणे यथोक्तः पितृसपिंडीकरणन्याय एवानुसंधेयः। तथा चास्मिन्नेव पुराणे अभिहितं
। मातर्यग्रे प्रमीतायां विद्येत प्रपितामही॥ प्रपितामहीतः सर्वस्तु कार्यस्तत्राप्ययं विधिरिति॥ इयं च सपिंडीकरणं
कालातिक्रमेपि पुत्र एव कुर्यात्॥ ॥ तदुक्तं वायुपुराणे॥ श्राद्धानि षोडशादत्वा न कुर्यात्सपिंडतां॥ प्रोषितोवसि
ते पुत्रः कालादपि चिरादपि॥ प्रोषितावसिते प्रवासावसाने। पुत्रश्चिरादपि कालात्सपिंडत्वं कुर्यात्। ते तत्षोडश
श्राद्धान्यदत्वा न कुर्यात्। पद्धितातिकनिष्ठम्नात्रादिनादत्तानि तदा सपिंडत्वमेव कुर्यादिति॥ श्राद्धकारिकायां॥
। कार्यव्यासंगतो वित्ताभावाद्वा देशविप्लवात्। राजदैवोपघाताद्वा मासिकान्यकृतानि चेत्। कृत्वा सपिंडनं वृद्धि
कर्मस्यान्मासिकान्यतः॥ अधुना कर्मणस्तस्य प्रयोगः प्रवितन्यते। पूर्वेद्युस्तदहर्वापि विप्रान्सप्तान्निमंत्रयेत्॥
दैवे द्वावुपवेश्याथ प्रेते त्वेकमुदङ्मुखं। ततस्त्रीन्पूर्ववत्पित्र्ये कुर्याद्धुद्धाद्वयं स्तुतः। प्रेतस्यामुकगोत्रस्य प्रेतत्वस्य
विमुक्तये। सपिंडीकरणं श्राद्धं करिष्येहमथोच्चरेत्। विश्वेदेवाः कामकालसंज्ञिकानेतरत्र वै। पितृणामावाहयेदत्र ति

दे०क्रि० लैः सर्वांस्तथार्चयेत्॥ प्रेतपात्रं ततस्तस्त्रक्षीं पूरयेत्तत्रवै तिलान्। निक्षिपेन्मंत्ररहितं गंधपुष्पाणि चक्रमात्।
८९ ततस्तुरत्नापित्र्हणांस्या न्मंत्रवत्तात्रपूरणं। अमंत्रं प्रेतपात्रार्घ्यं चतुर्थांशं प्रयच्छति॥ प्रेतस्य नामगोत्राभ्यां तस्मै विप्र
करे ततः। येसमाना इति द्वाभ्यामवशिष्टं त्रिषु क्षिपेत्। पितृपात्रेषु तेनैव न शेष्यं तत्परार्थतः। वत्सगोत्रं शिवप्रेतं गो
त्रेणामुकशर्मणा। मंत्रात इदमुत्वार्थ्य तातपित्रा सह संसृजेत्॥ एवं पात्रद्वये सर्वं तथा मंत्रादिषु स्मृतं। मद्दमे धात्तिथी
नूत्तामासेकोद्दिष्टदिनेतरां। सर्वार्घात्याक्तु गोविंशद्रागशंवधारिविति। नायमंगीकृतः शिष्टैरस्मदीयैश्चिरंतनैः।
पित्र्योद्भवादिवत्तस्मात्तेनवश्राद्धवद्दोषकं। पित्र्यविप्रकरे होमः साग्नेरपि भवेद्दिह॥ अग्नौकरणशेषं हि पित्र्यब्राह्मण
भोजने। लौकिकेग्नौ क्षिपेदन्ने श्राद्धेस्मिन्नुकरणे कृतं॥ पार्वणादौ तदश्नीयादित्युक्तं श्रीधरादिभिः। नैकोद्दिष्ट
हि विकरस्तरस्मिन्त्रियोगतः॥ कृत्वावनेजनं प्रेतपिंडं दद्यात्तथेतरान्। पितृपिंडं त्रिसंख्याकान्तथा प्रत्यवनेजि
तान्। प्रेतपिंडात्प्रुरस्तात्तानि तेवं क्वाठकश्रुतिः॥ प्रेतपिंडं त्रिधाकृत्वा निदध्याद्दर्घ्यपात्रवत्॥ त्रिषु पिंडेषु तुस्तातो राम०
त्राह्मणैः श्राद्धतर्पितैः। पिंडात्समन्त्राविधिवदभिमंत्र्यपेदमुच्चरेत्॥ एषवोनुगतः प्रेतः पितरस्तं ददाम्यवः। ८९

शिवमस्त्विति शेषाणां जायन्तां चिरजीविता॥ समानीव आकूतिः समाना हृदयानि वः। समानमस्तु वो मनो यथा वः सु
सहासति। एवं श्राद्धद्वयं कुर्यात्कार्येवशादेकपाकतः। एकोद्दिष्टं पार्वणं तच्छेषं प्रकृतिवद्भवेत्। नच पिंडदानानंतर
मेव प्रेतत्वं निवृत्तमित्यक्षय्योदकादौ पितृशब्द इत्याशंकनीयं। सकलश्राद्धेन तन्निवृत्त्युपदेशात् इति स्मृतिरत्नावल्यां
॥ स्मृत्यर्थसारे॥ ॥ अथ सपिंडीकरणं॥ तत्र मंडलत्रयं॥ दैवे द्वौ विप्रौ॥ प्रेतस्थाने एकः। तत्पित्रादिषु त्रयः।
अशक्तौ दैवे पित्र्ये चैकैको विप्रः। कामकालौ विश्वेदेवाः॥ देवार्घदानं पूर्ववद्देवे। प्रेतार्थमेकं पात्रं। तत्पित्राद्यर्थं त्रीणि
प्रेते नवमिश्रे कोद्दिष्टवत्। पित्र्ये पार्वणवत्। पात्राणि पूरयित्वा गंधादि क्षिपेत्। पात्राणि तत्रैव। निवेद्य प्रेतपात्रं पितृ
पात्रेषु संयोजपिष्वे इति एष्ट्वा संयोजयेत्सनु त्वा ततः प्रेतपात्रकुशान्पितृपात्रेषु क्षिप्त्वा प्रेतपात्रे किंचिदेव जलं सकुश
मवशेष्य ये समाना इति द्वाभ्यां मंत्राभ्यां पितृपात्रे प्रसिंचेत्। प्रेतपात्रावशेषेण प्रेताय ४ ॥ ४ ॥

ई०क्रि०
५०
90

राम०
५०

पुत्रगयांछि

णोस्तुमंत्रुनाभिहितं। एवंशास्त्रगतिर्भिन्नासर्वकर्मसुभारत॥ उद्दितेनुद्दितेचैवहोमभेदंयथाभवेत्। तस्मात्कुलक्रमा
यातमाचारत्वाद्वरेद्बुधइति॥ ॥इतिस्त्रीसपिंडनेविशेषः॥ ॥अथैताः सपिंडीकरणांताः प्रेतक्रियाः केषां
चिन्तावत्सरादर्वाक्नारायणमवलिमकृत्वानकार्याः॥ तदाहगौतमः॥ पापकर्मिणोनसंसृजेरन्स्त्रियचातिचारि
णीः। वृद्धयाज्ञवल्क्यः॥ सर्पविप्रहतानांचशृंगिदंष्ट्रिसरीसृपैः॥ श्राद्धमेषांनकर्तव्यंब्रह्मदंडहताश्चये॥ संवर्तः।
महापातकिनांचैवतथाचैवात्मघातिनां। उदकंपिंडदानंचश्मशानंचैवानुयत्कृतं॥ नोपतिष्ठतितत्सर्वंराक्षसैर्विप्रलुप्यते
॥स्मृत्यंतरात्॥ विष्कद्रोन्यविप्रांस्तुशृंगिदंष्ट्राभिघातिताः। वृथोत्सन्नमहात्क्लीवव्रतिनोनोदभाजनाः। उदभाजना
अर्हौदिकसंसर्गभाजनाइत्यर्थः। तथा॥ ब्राह्मणादिहतेताते पतितेसंगवर्जिते॰ व्युत्क्रमाच्चमृतेदेयंयेभ्यएवददास
सौ। संगवर्जितोभिक्षुः॥ भविष्योत्तरात्॥ स्वेच्छयामरणंविप्रशृंगिदंष्ट्रिसरीसृपैः। अंत्यांत्यजविप्रोहुंधैरात्मना
चैवताडनैः॥ संपूर्णसर्वगात्राणांविषादामर्षतोथवा। जलाग्निभृगुपातैश्चनिराहारादिभिस्तथा॥ येषामेवंभवेन्ने
वैकल्पिताः पापकर्मिणः। पाखंडमाश्रिताश्चैवमहापातकिनस्तथा। स्त्रियश्चाप्यभिचारिण्यआरूढपतितास्तथा।

दे०क्रि०
९६ नतेषांस्नानसंस्कारो न श्राद्धं न सपिंडनं० श्राद्धानि षोडशोक्तानि न तान्यपि भवंति हि॥ वैतानं प्रक्षिपेत्तोये गृह्याग्नि
श्च चतुष्पथे० पात्राणि निर्दहेदग्नौ साग्निके पापकर्मणि॥ षड्त्रिंशन्मते० व्यापादयेद्य आत्मानं स्वयं ह्युदकादिभिः
विहितं तस्य नाशौचं नापि कार्योदकक्रिया० सर्पविप्रहतानां च शृंगिदंष्ट्रिसरीसृपैः। आत्मनस्त्यागिनां चैव श्राद्धमेषां
न कारयेत्॥ चांडालादुदकात्सर्पाद्ब्राह्मणाद्विद्युतस्तथा। दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्मिणां। उदकं पिंडदानं
च श्राद्धं चैव तु यत्कृतं नोपतिष्ठति तत्सर्वमंतरिक्षे वृत्तिष्ठति। नारायणवलिः कार्यो लोकगर्हाभयान्नरैः। त
स्मात्तेभ्योपि दातव्यमन्नमेव सदक्षिणं॥ नारायणवलिस्तु परस्ताद्वक्ष्यते॥ तस्मान्नारायणवलेरनंतरं॥ तथा
। कृत्वा चांद्रायणं पूर्वं क्रियाः कार्या यथाविधिः। नारायणवलिः कार्यो लोकगर्हाभयान्नरैः। अन्नमिष्टं प्रियं चैव
विप्रे दद्यात्सदक्षिणं। पिंडोदकक्रियाः पश्चाद्वृषोत्सर्गादिकं च यत्॥ एकोद्दिष्टानि कुर्वीत सपिंडीकरणं तथा।
योयमन्युदकादिमृतानां संस्काराभाव उक्तः स क्रोधमदशोकादिवेगेन यैरात्म घातितस्तेषामेव। न तु प्रमाद. राम०
तो विधितो वा तथा मृतानां॥ तथा च भविष्योत्तरे॥ अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः। संस्कारप्रभुरवं ९५

तस्य सर्वं कुर्याद्यथाविधिः। प्रमादाद्विक्षया वापि न गच्छेत्सर्वतो मृतः। न गच्छेत्संस्कारादिकर्मप्रतिनगच्छेत्। वक्ष्यमाणनाग
मृजां विना तन्नार्हतीत्यर्थः। षट्त्रिंशन्मते॥ अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः॥ तस्याशौचं विधातव्यं कर्तव्या चो
दकक्रिया॥ बौद्धायनः। बुद्धिपूर्वं गृह न्यूणां क्रियाल्लोपविधीयते॥ तेषामेव च संस्कर्तुर्दोषश्रुतिरुदाहृता॥ दाहपि
त्वा शवं तेषां शूद्रैरेव विधर्मके। अन्येषां पापकरणप्रमानां पापूकर्मणां। पूर्ववद्देहदाहोऽथ शरीरस्य प्रकल्पनं०
पलाशवृन्तैः संस्कुर्यात्पित्र्यज्ञविधानतः। आहिताग्नीनां पापमृतानां प्रकृतिवर्जितानां। मुख्यमेव शरीरमाहिताग्नि
मग्निभिर्दहंति यज्ञपात्रैश्च ते तेन संस्कुर्वंति। ब्रह्मगर्भ आह॥ योऽनुष्ठातुं न शक्नोति महाव्याध्युपपादितः। सोऽग्न्युदक
महायात्राः कुर्वन्नामुत्र दुष्यति। विवस्वान्। सर्वेंद्रियविरक्तस्य वृद्धस्य कृतकर्मणः। व्याधितस्यस्मृतं तीर्थे मरणं तप
सोऽधिकं॥ तथा गार्ग्योऽपि गृहस्थमेवाधिकृत्याह॥ महाप्रस्थानगमनं ज्वलनांबुप्रवेशनं। भृगुप्रपतनं चैव वृथा नेच्छेत्तु
जीवितं। भृगुः। पर्वतकटकः। वृथा। धर्मानुष्ठानशून्यं॥ मनुर्वानप्रस्थमधिकृत्याह॥ अपराजितां वास्थाय व्रजेद्दिशं
मजिह्मगः। आनिपाताच्छरीरस्य ब्रह्मलोके महीयते॥ अपराजिता हृतौ नैर्ऋ॥ ततो मा शरीरपाताद्दकुटिलं जलमति

लं वा भक्षयत्समाहितो व्रजेत्॥ आसां महर्षिवर्याणां त्स्कायापापमयींतनुं। वीतशोकभयो विप्रो ब्रह्मभूयाय कल्पते॥
गो ब्राह्मणहतानां च पतितानां तथैव च। ऊर्द्ध्वं संवत्सरात्कुर्यात्सर्वं चैवौर्ध्वदेहिकं॥ गृह्यकारिकायां॰ प्रमादादतिनिः
शंकचकस्माद्विधिचोदितः। शृंगिदंष्ट्रिनखिव्यालविषविद्युज्जलाग्निभिः। चांडालैर्ब्राह्मणैश्चौरैर्निहतो यत्र कुत्रचित
। चांद्रायणं तप्तकृच्छ्रं कुर्यात्तस्य विशुद्धये। यद्वा कृच्छ्राणि वै दश कृत्वोक्तविधिना दहेत। उर्ध्वोच्छिष्टाधरोच्छिष्टोभयोच्छि
ष्टेषु सत्स्वपि। अस्पृश्यस्पृष्टमरणे त्वद्भूयां निगदाद्विषु। त्रीन्यद्वाद्दशवापंचदशकृच्छ्रान्विधायतु। गृहीत्वा विप्रवचना
न्निमित्तस्यानुसारतः। शक्तौ तद्दैवकृच्छ्राणां प्रत्याम्नायं प्रयच्छति। धेनुर्गोभूहेमधान्यधनवस्त्रादिकं चयत्। तद्दानी
शुद्धिमाप्याद्दहनादियथोदितं। सर्वात्मनाशुद्धिमिच्छेत्पित्रादेः पापकर्मणः। तं दहेद्विधिना कृत्वा तद्योग्यं सर्वमेव तत्
। एवमेषात्मनः शुद्धिः कर्ता चिंत्याप्युपभवेत्॥ प्रेतस्य चात्मनः शुद्धिमनापाद्योदकादिके। लोभादिना कृते सर्वमंतरि
क्षे विनश्यति। नोपतिष्ठेत्तत्तद्दत्तमुभयोर्नरकं ध्रुवं॥ अमृतं मृतमाकर्ण्य कृतं यस्यौर्ध्वदेहिकं। आगते तु पुनस्तस्य
घृतकुंडे निमज्जनं। जातकर्मादिसंस्कारास्सद्यः कृत्वाद्यभार्यया॥ विवाहः सह कर्तव्यः स्ततोग्न्याधेयमेव च। होममात्रं

भवेत्तेषु होमस्तु तेषु कर्मस्तु ॥ द्वादशाब्दव्रतचर्या त्रिरात्रमथवा स्मृतं ॥ अधीनाध्यायविधिवद्धात्मस्तोमेन वा यजेत् ॥ तथैवं ज्ञायतेनप
सुताचेष्टिरायुष्मती भवेत् ॥ महाव्याहृतिहोमः स्याज्जातकर्मादिषु त्रिषु । नत्वेष स्मृद्दयश्राद्धं तेषयं नैमित्तिकं तत्ततः । वपने
मेखलादंडौ भैक्ष्यस्वर्पाव्रतानि च ॥ निवर्तंते हि त्वास्तीनां पुनः संस्कारकर्मणि ॥ पौर्णमासादिकाः सर्वाः क्रियाः कार्या
यथोदिताः । तत्राग्नय आयुष्मते पुरोडाशकपालं सन्निर्वपेत् ॥ अनुवाक्याग्नय आयूंषि आयुष्मान् तपइत्यतः । अत्र सप्तदशो
वज्र्यः शेषं स्यात्पौर्णमासवत् ॥ दूरादेशान्तरगते जीवन्तीनां पुनः ॥ इति तत्र स्मृत्वं तिष्ठेत् पर्णलो ह्यागतागतेः ॥ न
स्यात्स्वरूपमाणाणायां वयः कालविशेषतः । तस्य पूर्ववयस्कस्य विशत्य सूद्दतः क्रियाः । ऊर्ध्वं पंचदशाद्वात्तु मध्यमेव यस्मि
न्मृता । चांद्रायणत्रयं कृत्वा त्रिंशत्कृच्छ्राणि वा सुतैः । कृच्छ्रैः प्रतिकृतिं तस्य दग्ध्वा शौचादिकाः क्रियाः । एवं कृते स
स्यागच्छेत्तस्य स्यात्पूर्ववद्विधिः ॥ मंत्रः । अग्ना वरणेऽपोराट्ठे प्रमीयेत पतिर्यदि । प्रेतं सद्धूमर्थित्वाग्निं जत्वा चोपावरो
हणं ॥ घृतं वह्न्यदशोपात्रं तद्ग्नीडत्वा शवक्रिया । उपावरोह जातवेद इमं प्रेतं स्वर्गाय लोकाय नय प्रजामत्मा मरपि
मस्मास्तु धेहि प्रेताद्भुतं चास्य जुषस्व स्वाहा ॥ न देवेष्वग्निष्व वारणे पोन्नशेषावा मीम्रियेत वेत् ॥ आहारेद्दरणीं हुदमाधा
नोक्तं च तद्यथा । अग्निनाशे मृतश्चेत्स्याद्धाहिताग्निस्तदोच्यते । न योल्मुकं मथित्वैनं संस्कुर्यात्तदभावतः । तदभस्य
ष्टकाष्ठेन मथित्वा निर्दहेच्च तं । स चेद्विच्छिन्नवह्निः स्यादहकालं तु तो मृतः । सूत्रोक्तरोक्तमाधानसंस्कारायतदुच्यते ।

प्राचीनावीतवान् कुर्याद्दक्षिणाग्रीतथाखरान्॥ तत्राग्नीनां च संस्कृतैर्मेतं स्नाप्यासने क्षिपेत्॥ न पापिरे रणीस्थाप्य मंत्रे
घस्येतिमंत्रतः। यस्मात्त्वयोजुहूतो मोक्षकामाः संकल्पयंतेयजमानमांसं। जायंतु ते हविषे हिताय स्वर्गलोकमिमं
प्रेतंनयंतु॥ इति मंथनमंत्रः। तूष्णीमुद्धृत्य संस्थाग्नीसंस्कृतेन च सर्पिषा। शंस्येत्तु त्वास्के वा तद्धीगृही त्वाहूदशास्क
वान्। दक्षिणाग्निमसमुद्धृत्य निर्दहेत्पूर्ववत्क्रमं। उत्सन्नाग्नेर्मृतस्याथ नत्तः पूर्वं यदारणी। आग्नायामेतयोः प्रेतपाणि
स्थाप्याय दक्षिणे। अयं तइति भत्रादिः समारोपय जुर्जपेत्। मतामाधानवत्सर्वं कृत्वा तं पूर्ववद्दहेत्। अनाहिता
ग्नेरप्येवं मृताधानं यथोदितं॥ सूतिकायां मृतायां तु कथं कुर्वंति याज्ञिकाः। कुंभे सलिलमाधाय पंचगव्यं क्षिपेत्ततः। उ
दपगर्भि रमिमं आपोवा चा शुद्धिं लभेत्ततः। तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधिः। आलिंगैश्च तथा मंत्रैर्वामदेव्या
भिरेव च। अन्यैश्च वारुणैर्मंत्रैः संस्नाप्य विधिना दहेत्॥ दृहघमः। पंचभिः स्नापयित्वा तु गव्यैः प्रेतां रजस्वलां। वस्त्रां
तराच्च तां कृत्वा दाहयेद्विधिपूर्वकं॥ तथा रजस्वला चेदथ सूतिका च दैवात्स्त्रियेच्चेत्तु तदाप्युद्धृत्य द्धिं। यावत्तारि क्षिप्य व
उत्तरीयं सपंचगव्येन घटस्थवारी। मुरुपगर्भि रुत्थैरभिमंत्रितेन सस्नाप्य शुद्धां त्विति वापयित्वा विप्रानथ दत्वाधिक
दक्षिणां स्कृदहेत्तदन्यां वरध्वाद्विशुद्धये॥ कदाचिद्दैवसंयोगात्म्रियते चेद्रजस्वलाः। तस्याः दाहो न कर्तव्यः क्षिपेद्द
प्युदिनत्रयमिति॥ अस्यार्थः। दिनत्रयं दाहो न कर्तव्यः। किं कर्तव्यमित्यपेक्षायामुक्तं। दिनत्रयमप्सु क्षिपेदिति। दिन
त्रयमित्युपत्रयोऽस्यं। अप्रक्षेप एव योऽस्ते चेत्तदा दाहापेक्षाप्रसर्वथा प्रतिषेधः। प्राप्नोति। एवं च सति दिनत्रयाद्वहुमङ्धं

देव० ५८

98

राम० ५८

कर्मविशेषं कुर्वाणायाऽरजोनिः सत्तोऽस्म्यत्पंतरोक्तो विशेषः। तथा नियमस्याम्नतस्यावारजः पश्येत्कदाचन त्रि
रात्रं तु क्षिपेद्दूर्ध्वं व्रतसेषं समापयेत्। उच्छिष्टा तु द्विजाती नां रजः स्त्री यदि पश्यति। उपवासं त्वधोच्छिष्टा कूर्ध्वोच्छि
ष्टा अहं क्षिपेदिति।। प्रतीभूतात तथा नारी त्रिंशत्कृच्छ्रैर्विशुध्यति। प्राजापत्यानि षड्त्रिंश छुद्धिरुक्ता मनीषिभिः।
।। अथ सूतिकाप्रायश्चित्तं। सूतिकाले यदा साध्वी विस्नाता मरणंगता। त्रिवर्षपूर्णपर्यंतं शुध्येत्कृच्छ्रेण
सर्वदा। प्राजापत्य ९० एतत्प्रथमअहविषयं। प्रसूतिका यदा नारी रजसा च परिप्लुता। म्रियते तु च या नारी द्विवर्ष
कृच्छ्रमाचरेत्। प्राजापत्य ६० एतत्त्वपूर्वअहात्परमाषड्दिनविषयं। सूतिकाले यदा साध्वी अस्नाता प्रेततांग
ता। अहं कृच्छ्रेण शुध्येत व्यासस्य वचनं तथा। प्राजापत्य ३० सूतिकाले यदा साध्वी विस्नाता मरणंगता। त्रि
षण्नवदिनाद्र्वाग् एकाद्दे नैव शुध्यति। उत्तरेषु तथा हाहिषु० प्रसूतिका यदा नारी प्राणांश्चैव परित्यजेत्
मासमेकावधिं यावत् त्रिभिः कृच्छ्रैर्विशुध्यति।। प्रा० ३। अथ सशल्यामरणे प्रायश्चित्तं। सशल्यायां मृता
यास्तु कुक्षिं भित्त्वा समुद्धरेत्। उद्धृते च ततः शल्ये प्रायश्चित्तं समाचरेत्।। तथा गुर्विणीमरणे कुक्षौ भि

देव॰ त्वा शल्यं समुद्धरेत्॥ ततः शल्यं पृथक्कृत्वा निक्षिपेद्वसुधातले॰ ।यदा गर्भवती नारी सशल्या संस्थिता भवेत्। कुक्षौ
९८ भित्वा ततः शल्यं निर्हरेद्यदि जीवति। प्रमीतं निक्षिपेत्तं तु प्रायश्चित्तं ततः परं॥ त्रयस्त्रिंशता कृच्छ्रैस्तु मुच्यते शल्यदो
षतः प्रा॰३२ सगर्भदेहनेन तु दुर्लभं वधपातकं। प्रायश्चित्तं चरित्वा तु शुध्यंति पापकर्मिणः। भ्रूणहत्यापातिश्चैव
99 मुनिः स्वायंभुवोऽब्रवीत्। अतगर्भमृतस्त्रीणां पृथग्गर्भेण निःकृतिः। दग्ध्वा तु गर्भसंयुक्तां त्रिरब्दं कृच्छ्रमाचरेत्
॥ ॥ इति सशल्यामरणप्रायश्चित्तं॰ चिताभ्रष्टा यदा नारी मोहाद्विचलिता यदि। जीवती मृतवत्सा तु चरे
त्रयं च्चांद्रायणं चैव पैषा। तप्तकृच्छ्रं तथा चैकं पाराकत्रितयं चरेत्॥ एषामभावे सार्द्धैकमब्दं कृच्छ्रव्रतं चरेत्। चांद्रायणप्र
त्याम्नाये ऽष्टौ प्राजापत्याः। चांद्रायण ३ प्रा॰२४ तप्तकृच्छ्र १ प्रा॰३ पाराक ३ प्रा॰१८ एषामभावेऽप्यशक्तौ
प्राजापत्य ४५॥ अथ दुर्मरणानि ऊर्द्ध्वोच्छिष्टेऽधरोच्छिष्टे उभयोच्छिष्टे तथैव च॥ अस्पृश्यस्पर्शने चैव अन्त
रालमृतौ तथा॥ षष्ठ्यां मरणे चैव तथा निगडबंधने। सप्तस्वेतेषु कृच्छ्राः स्युस्त्रीन्स्यहाद्दशवाक्षमात्। पंचदशक रामं॰
मेरोर्वयथासंख्यं प्रकल्पयेत्। कृच्छ्रं चरित्वा विधिवद्दहेत्तं च ततः परं॥ पाषाणैर्लकुटैर्दंडैर्लोष्ठाविस्फोटकै ९९

ष्टिभिः। प्रपातनाद्यैर्विषये नवकृच्छ्रं विशोधनं। भित्वा दात्रुपघातेन पश्वादिषु तथैव च। अबुद्धिपूर्वमरणे त्रिंशत्कृच्छ्रं दशा
धिकं। कृत्वा तु प्रदहेत्तं तु पैठीनसिवचो यथा। उन्नाम्य मुद्बन्धने श्चैव विषशस्त्राहि दंष्ट्रिकैः। एषु षट्सु निमित्तेषु त्रिं
शं ३० कृच्छ्रैर्विशोधनं॥ आत्मघातवले श्चैव शृङ्गिव्याघ्रगणादिभिः। चौरैः श्वादिभोल्लूकैश्च जन्तुभिः कृच्छ्रशोधनं
। चाण्डालेन हतायेऽपि अग्निदाहविवर्जिताः। अलभ्ये च शरीरे तु कारये प्रतिमां कुशैः। विद्यमाने शरीरे च अ
स्थीनि विधिना दहेत्। बुद्धिपूर्वं मृतानां तु त्रिंशत्कृच्छ्रं समाचरेत्। अबुद्धिपूर्वमृतानां तु तदर्द्धं व्रतमाचरेत्। ततो
धिकारी भवति पिण्डेषु दहने क्रमात्। एकादशाह्निकं कुर्वीत नारायणबलिं ततः। सर्वमेवौर्ध्वदेहिकं कार्यं तु विधिव
द्बुधैः। खड्गाहतो ह्युच्छिष्टो धरोच्छिष्टस्त्वरे हतः। द्वादशषट्त्रीन्नाडः प्राजापत्याननुक्रमाद्बुधः। अस्पृश्यस्पर्शने
चैव च लङ्घने यथाचरेत्। अस्पर्शे कृतदाहाय प्रायश्चित्तविधिं शृणु। चान्द्रायणद्वयं चैव तप्त ७ कृच्छ्रद्वयं तथा सां
तपनं तथा कृच्छ्रं चैवार्यं वं प्रकल्पयेत्। चान्द्रायणद्वये प्राजापत्याः १६ तप्तकृच्छ्रे प्रा० ८ सांतपेते ४ एवं प्रा० २८
प्रवासस्थमृतानां तु शुद्धिरुक्ता मनीषिभिः। विषकृत्पातमृतानां तु ग्रकाटेन मृत्तौ यथा। उष्ट्रेण हस्तिनाऽश्वे वा मृतानां

देव.
१००
100

चविशेषतः। शीतादिनिहतमृतौ त्रिंशत्कृच्छ्रैर्विशोधनं। स्त्रियासक्तौमृतानां च त्रिभिः कृच्छ्रैर्विशोधनं। म्लेच्छेन नि
हयायेच भवर्ज्ञा नाशकच्युताः। चौरहताश्च तेषां च त्रिंशत्कृच्छ्रैर्विशोधनं॥ प्लीहभगंदराभ्यां च तथापस्मारदूषिते
।ग्रहणीराजयक्ष्मभ्यां त्रिंशत्कृच्छ्रैर्विशोधनं। भूतप्रेतपिशाचादिशाकिनीनां ग्रहेमृतौ॥ चतुःपंचसप्तनव तेषां कृ
च्छ्राविशोधनं। विसूचिकातथाध्मातविषांत्तकमृतौ तथा॥ शवरात्रुषितं चेत्त्रीन्कृच्छ्रान्कृत्वा दहेत्तुतं। रजस्वला
सूतिकयोः श्वपाकस्पर्शने मृते॥ अर्द्धेनैव तु कृच्छ्रेण शुचिर्वात्स्यायनोऽब्रवीत्॥ रजकश्चर्मकारश्च नटो वरुड एव
वा। कैवर्तमेदभिल्लाश्च सप्तैते अंत्यजाः स्मृताः। तेषां तु स्पृष्टो म्रियते यदि दैवात्कथंचन। एकत्रिंशता च कृच्छ्रैस्तु
शुद्धिरुक्ता मनीषिभिः। कूपे वाप्यां ह्रदे वापि तास्पृष्टांत्यजादिभिः। तत्र दुर्गास्पर्शजं च त्रिंशत्कृच्छ्रैर्विशोधनं।
अतिक्रांतैकादशाहा मृता ये पापकर्मिणः। कृच्छ्रत्रयं मासवृद्ध्या तेषां शुद्धिव्रतं चरेत्। असंबंधेन यः प्रेतं दहते
चेहतेन्तथा। सततं स्नातकः शुद्ध्यर्थं कुर्यात्कृच्छ्रत्रयं तथा॥ अथ रजस्वलायाः सहगमने प्रायश्चित्तं॥ ॥ पलद्व
यं तु प्रसृतिर्द्विगुणा कुडवं भवेत्॥ चतुर्भिः कुडवैः प्रस्थः प्रस्थाश्चत्वार आढकः। चतुर्भिश्चाढकैर्द्रोणः एत

राम
१००

द्रोणस्य लक्षणं ।। यदा स्त्रियाप्युदक्यायां पतिः प्राणान्परित्यजेत् ।। द्रोणमेकं तंडुलानामवहन्याद्धि शुद्धये । मुसलाघाते
स्तद्दस्तकस्तवत्तेयो निर्मंडलात् ।। विरजस्कां मन्यमाना स्वे चिन्तेत दस्कक्षयं ।। दृष्ट्वा शौचं प्रकुर्वीत पंचमृत्तिकया पृथ
क् । त्रिंशद्विंशतिर्दशपंचगवां दत्त्वा वहः क्रमात् ।। विप्राणां वचनाद्व्व शुद्धिः समे रोहे हुताशनं । नारीणां सरजस्कानां
मियं शुद्धिरुदाहृता ।। ब्रह्मपुराणे ।। ।। दृष्टांतरमृते तस्मिन्साध्वी तत्पादुकाद्वयं ।। निधायोरसि संशुद्धा प्रविशे
ज्जातवेदसं ।। ऋग्वेदवाक्यात्साध्वी स्त्री न भवेदात्मघातिनी ।। अहाशौचे तु निर्वृत्ते श्राद्धं प्राप्नोति शास्त्रवत् ।। गरुडपुराणे
हुताशं या समारूढा चतुर्थेऽह्नि पतिव्रता । तस्या भर्तृदिने कार्यं वृषोत्सर्गादिसूतकं । हुताशं या समारूढा भर्त्रा सह प
तिव्रता । तस्या भर्तुर्दिने कार्यं वृषोत्सर्गादिसूतकं । अन्यतः एकतो वापि प्रतिमन्त्यामृताल्पया ।। वृषोत्सर्गादिकं तस्याः पत्या
सह विधीयते ।। दूरस्थापि च या नारी मृतं श्रुत्वा तथा पतिं । शनैः स्वभवने गत्वा प्रतीक्षेता हि श्राद्धकं ।। न तस्ता पिंडमादा
य प्रविशेच्च हुताशनं । तस्याः श्रुतक्षणे कार्या वृषोत्सर्गादिकाः क्रियाः ।। अन्यक्षेत्रा च या नारी अन्यचित्तानुगामिनी
असवर्णा सवर्णा वा चरेत्सांतपनद्वयं ।। तथा ।। ब्राह्मणो क्षि हयेशूद्रा ज्ञाति स्त्री वद्धि गोमिका । ब्रह्मराक्षसपैशाचं जन्म

देव॰ १०१ 101

संप्राप्नुवंतिते ॥ कुमारीगामिनः पापाः साध्वीगच्छंतियेवलात् ॥ ब्रह्मराक्षसपैशाचीयोनिंप्राप्यपतंतिते । श्रुताध्ययन
संपन्नश्चांडालीयोधिगच्छति ॥ ब्रह्मराक्षसतांयातिदेवब्रह्मस्वहारकः । विप्रगोवृत्तिहंताचविप्रादेशसमर्पकाः । अरण्ये
निर्जलेघोरेजायतेब्रह्मराक्षसः ॥ तदुपशांतिकरमाह ॥ श्रवणाद्वादशीयोगेतत्सूत्रः श्राद्धकृद्धरिं । त्रिस्थलीषुतथा
श्राद्धैः पिंडदानैश्चतर्पणैः । जपहोमैश्चदानैश्चदेवतार्चनकृद्भवेत् । गयादिषुकृतेमुच्येद्ब्रह्मराक्षसतांगतः । गुर्वि
ष्टमीसमायोगेयः श्राद्धंकुरुतेनरः । करंभकरकाद्यैश्चपितॄनुद्दिश्यदुर्गतान् । तेनमुक्ताभवंतीहयेकेपिविगतिंग
ताः । कृत्वानीलवृषोत्सर्गंनिपानंवाप्युभावहं ॥ पिशाचत्वगतान्सर्वान्मोचयत्सेवनात्सदा । सहस्रंभोजयेद्विप्रान
न्नाद्यैर्हीनदुःखितान् । पितॄणांकुरुतेमोक्षंदुर्गतानांहरिंयजन् ॥ कृत्वानारायणबलिंकृत्वावाविष्णुतर्पणं । र
क्षः पिशाचादत्वेविमुच्यंतेनैवसंशयः ॥ एतद्देवोक्तंब्रह्मन्मनुना । गयायांपिंडदानेनजपहोमार्चनादिभिः । ब्र
ह्मतर्पणतः सम्यक्जपनाद्देवनित्यशः । देवतानांचसेवाभिः । कन्यादानेनचैवहि । ब्रह्मराक्षसपैशाच्यात्मु
च्यतेमनुरब्रवीत् ॥ इतिब्रह्मराक्षसत्वपिशाचहरं ॥ अथकुष्ठामरणेपूर्वकर्मलक्षणानि ॥ व्याघ्राहिगजभूपा राम॰ १०१

लचौरवैरिहिंस्रकाहताः। अष्टशल्यामृतायेच शौचसंस्कारवर्जिताः। तथान्ये पापकर्माणो ये मृतास्तु रणाहताः। श्वक्रोडकृमि
वृक्षैश्च शृंगिभिः शकटाहताः। म्लेच्छाग्निदारुशस्त्रोत्थविषोद्बंधजलैर्मृताः। विसूचिकान्नकवलश्रमातीसारतो
मृताः। शाकिन्यादिग्रहैर्ग्रस्ता विद्युत्पातहताश्च ये। अस्पृश्याः स्पर्शसंदुष्टाः पतिताः पुत्रवर्जिताः। पंचत्रिंशत्प्रकारै
श्च प्राप्नुवंत्यगतिं नराः। पिंडाद्याः पिंडभाजः स्युस्त्रिपोलेपभुजस्ततः। ततो नांदीमुखाः प्रोक्तास्त्रयोप्यश्रुमुखास्त्रयः
द्वादशैवपितरगणास्तर्पिताः संततिप्रदाः। गतिहीनाः स्तुताहीनां संतानं नाशयन्तुतः। दंष्ट्रिव्याघ्रादिभिर्हता गर्भनि
घ्नश्चतुष्क्रमात्। द्वादश्यास्त्राहिनिहता आवर्षं प्रतिवालकं। विषाहिनिहताघ्नंति दशस्त्रद्वादश स्वपि। वर्षेषु वा
लकं कुर्यान्निरपत्यो न पत्यतां। अथ। व्याघ्रेण हते जंतुः कुमारीगमनेन तु। विवदश्चैव सर्पेण गतेन नृपदुष्ट
कृतः। राज्ञा राजकुमारघ्नश्चौरेण पशुहिंसकः। वैरिणा मित्रमोदी च वकदन्ति ईर्षकेण तु। गुरुघाता दशव्याया
मसूरीश्चौचवर्जितः। द्रोही संस्काररहितः स्तनानि क्षेपहारकः। तपाग्नियेत कुगति शूकरेण विपाशकः। कृ
मिभिः कृतनाशी च द्रुमेन वनकृंतनः। शृंगिना शंकरद्रोही शकटेन च सूचकः। सूचकः पिशुनः। म्लेच्छेनाम्ने

देव
१०२
102

दिनीहत्तविह्वितायज्ञहानिकृत ॥ दारुणा दक्षिणावीरः शास्त्रेणाकृतिनिंदकः । अश्मना विप्रनिंदाकृत्तद्विषेणाकुम
तिप्रदः । उद्बंधनेन हिंसास्तेनस्तु भेदी जलेन च ॥ गोग्रासहृद्धि सत्याच कवलेन द्विजातहृत् ॥ भ्रमेणा राजपत्नीहा अ
तीसारेणा निःक्रियः । शाकिन्याद्यैर्म्रियंतेऽवसत्तदर्पकार्यकारिणः ॥ अनध्यायेष्वधीयाना म्रियंते विद्युता तथा । अ
स्पृश्यो ऽस्पृश्यसंगी च भ्रांतिकृद्दुष्टशास्त्रकृत् । पतितोपस्थविक्रेता ऽनपत्यो द्विजान्नहृत् ॥ इति अथ तेषां क
मेणैव प्रायश्चित्तं विधीयते ॥ कारयेल्लिङ्गमात्रं तु पुरुषं प्रेतरूपिणं ॥ चतुर्भुजं दण्डहस्तं महिषासंस्थितं । पिष्टैः कृष्ण
तिलैः कुर्यात्पिंडं प्रस्थप्रमाणतः ॥ मध्वाज्यशर्करायुक्तं स्वर्णखण्डेन संयुतं ॥ अकालमूलकलशं पंचपल्लवसं
युतं । कृष्णवस्त्रसमाछन्नं सर्वौषधिसमन्वितं ॥ तस्योपरिन्यसेद्वंशपात्रं धान्यैः फलैर्युतैः । सप्तधान्ये च कलशे
तत्र तं पुरुषं न्यसेत् ॥ कुंभोपरि च विन्यस्य पूजयेत्प्रेतरूपिणं । कुर्यात्पुरुषसूक्तेन प्रत्यृचं पितृतर्पणं । षडं
गांश्च जयेद्रुद्रान् कलशे तत्र वेदवित् । यमसूक्तेन कुर्वीत जपपूजार्चनादिकं । गायत्र्याश्चैव कर्तव्यो जपस्तत्रा
त्मविशुद्धये । ग्रहशांतिकपूर्वं च दशांशं जुहुयात्तिलैः । अज्ञातनामगोत्राय प्रेताय सतिलोदकं । प्रदद्या राम०
१०२

ग्नितत्तीर्थेन पिंडं मंत्रमुदीरयन्॥ इमं तिलमयं पिंडं मधुसर्पिर्विमिश्रितं। तस्मै ददामि प्रेताय यः पीडां कुरुते मम।
अयं तिलमयपिंडदानमंत्रः। सजलान्वस्त्रकलशान्तिलपायससंयुतान्। द्वादश प्रेतमुद्दिश्य दद्याद्देकं च वि
ष्णवे। ततोभिषिंचेदाचार्यो दंपती कलशोदकैः। सुचिरं तावरुधरौ मंत्रैर्वरुणदेवतैः। यजमानो ततो दद्याद्दा
चार्याय च दक्षिणां। ततो नारायणबलिः कर्तव्यः शास्त्रनिश्चयात्॥ एषसाधारणो विधिरगतीनामुदाहृतः।
विशेषास्तत्र तु नर्त्तव्या व्याघ्रादिनिहतेऽपि। व्याघ्रादिते प्रेते च परकन्यां विवाहयेत्। सर्पदष्टे नागबलिर्देयः सर्प
स्तु कांचनः। चतुर्निष्कमितं हैमं गजं दद्याद्गजाहते॥ राजाविनिहते दद्यात्पुरुषं च हिरण्मयं। चौरेण निहते धेनुं
वैरिणा निहते वृषं। वृकेण निहते दद्याद्यथाशक्त्या सकांचनं। शय्या० मृते प्रदातव्या शय्या तूली समन्विता।
निष्कमात्रसुवर्णस्य विष्णुनासमधिष्ठिता। स्त्रीवहीने मृते दद्यात् द्विनिष्कं स्वर्णजं हरिं। संस्कारहीने च मृते कुमारं चोप
वीतयेत्। निष्कत्रयस्वर्णमितं दद्यादश्वे हयाहते॥ शुना हते क्षेत्रपालं स्थापयेत्त्रिजभक्तितः। सूकरेणाहते दद्या
न्महिषं दक्षिणान्वितं। कृमिभिश्च हते दद्याद्गोधूमान्नस्य खारिकाः। वृषे वृक्षहते दद्यात्सौवर्णं रत्नसंयुतं। शृंगि

देव
१०३ नाग्निहते दद्याद्वृषभं वस्त्रसंयुतं। शकटेन हते दद्यादश्वं सोपस्करं शुभं। भृगुपाते मृते चैव अन्नं दद्याद्धान्यपर्वतं। अ
ग्निना निहते कार्यमुदपानं स्वशक्तितः। शत्रुणा निहते चैव कर्तव्या सदने सभा। शस्त्रेण निहते दद्यान्महिषीं दक्षि
णान्वितां। अश्मना निहते दद्यात्सवत्सां गां पयस्विनीं। दृषदा च हते दद्यान्महिषीं हेमनिर्मितां। उद्बंधनमृते दद्या
त्कपिं कनकनिर्मितां॥ मृते जलेन वरुणं दद्यात्स्वर्णत्रिनिष्ककं। विसूचिकामृते चैव भोजयेच्च शतं द्विजान्। तिल
धेनुः प्रदातव्या कंठेन्नकवले मृते। अपस्मारमृते कार्यमष्टं कृच्छ्रव्रतं तथा। अतीसारमृते लक्षं गायत्र्याः प्रयतो ज
पेत्। शाकिन्यादिग्रहग्रस्ते जपेद्रुद्रं यथोचितं॥ विद्युत्पाते न च मृते विधानं समाचरेत्। अस्पृश्ये च मृते कार्यं वे
दपारायणं तथा। सच्छास्त्रपुस्तकं दद्यादस्पर्श्यस्पर्शनान्मृते। पतिते च मृते कुर्यात्प्राजापत्यानि षोडश। मृते चाप
त्यरहिते कृच्छ्राणां नवतिं चरेत्। एवं कृते विधाने च विदध्याद्दूर्ध्वदैहिकं। ततः स प्रेतनिर्मुक्तिः पितरस्तर्पितास्तथा
। दद्युः पुत्रांश्च पौत्रांश्च आयुरारोग्यसंपदः॥ इति दुर्मरणपूर्वकर्मचिह्नानि प्रायश्चित्तानि चोक्तानि॥ अथ राम॰
सहगमनविधिः॥ मृते भर्तरि ब्रह्मचर्यमन्वारोहणं वेति॥ आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते १०३

103

म्रियेत यापत्यौ सा स्त्री ज्ञेया पतिव्रता। न म्रियेत समं भर्त्रा ब्राह्मणी शोकमोहिता। प्रव्रज्यागतिमाप्नोति मरणादात्मघातिनी
। यदि भर्त्तृमृतया म्रियेत तदा महत्फलं लभेत्। यावच्चाग्नौ मृते पत्यौ न दद्यात्मानं देहे क्वचित्। तावन्न मुच्यते नारी स्त्री
शरीरात्तु कर्हिचित्। पतिं कण्ठगतप्राणं दृष्ट्वा चैव पतिव्रता। संकल्प्य चात्मनः प्राणानिदं वचनमब्रवीत्। देवैः सं
पादितो मह्यं पतिस्त्वं साक्षिदेवताः॥ त्वया सह गमिष्यामि भर्त्तस्त्वं चान्यजन्मनि। संकल्पः॥ सा सती स्नात्वा तां स्व
शक्त्या दानानि ततः। कुङ्कुमाञ्जनमुक्ताद्यैः स्वशरीरमलंकृत्य सौवासिनीभिः पायसं मधुघृतमिश्रितं भुक्ते
। सती या स च तत्पूर्वं कामं भुंक्ते वै ध्रुव्यं तामेन कदापि भूयात्सा वियोगो न मम अस्तु जातु। वंध्या च मे तत्र कदापि चा
स्तु दौर्भाग्यमेवं न कदापि चास्तु। वस्त्राणि समस्तान् प्रणम्य विसृजेत्। हर्षमना भर्त्तृगतमनाः सा स्वगृहमक्षते
राशीर्वादपात्रं स्थापयेत्। अग्ने पुरस्वेति मंत्रेण वड्वामारोहेत्। अथ वा स्मशानं नीयमानं भर्त्तारमनुयाति
। पदे पदे यज्ञफलं लभते नात्र संशयः। आरुह्य शीघ्रं हरिमुच्चरंती पथि अक्षतैरवाकिरंती। भर्त्तृपादौ या श्मशाने
पुलकोद्भूता। एकहस्तप्रमाणात् स्थला पर्णमयी कुटी। दक्षिणस्यां दिशि चिन्ता द्वारं च मुनिभिः स्मृतं। विन्यस

देव॰ १०५ कुशापं तत्र चितामध्ये प्रयत्नतः। सतीशौचादिकं कृत्वा ऽद्येत्याहिदेशकालौ संकीर्त्य भर्त्रा सह गमनार्थं अस्मिन् तीर्थे
स्नानमहं करिष्ये। स्नानानन्तरं कुसुम्भवस्त्रपरिधानं। कुंकुमांजनस्रग्विभूषिता विष्णुं ध्यायन्ती चितासमीपमागत्य
पिंडान् स्वहस्तेन प्रातिनिधिकेन वा। भावितक्रान्तिनिमित्तमिति प्रयोगः। एवं सर्वत्र॥ चितामर्घः प्रदातव्यः फलैश्च
विविधैः शुभैः। चितस्थो भगवानग्निर्विष्णुरूपी सनातनः। पतिलोकसमावाप्त्यै गृहाणार्घं नमोऽस्तु ते॥ ततः सूर्यार्घः
एष चार्घो मया दत्तः सूर्य साक्षी त्वदृश्यतः। प्रसादं कुरु मे देव गृहाणार्घं नमोऽस्तु ते॥ अथ स्तुतिः। त्वं ब्रह्मा त्वं च
विष्णुस्त्वं रुद्रस्त्वं च प्रजापतिः। त्वं सर्पो विसर्वश्चाष्टौ परमात्मा त्वमेव हि। त्वमेव शरणं विष्णो शरणं तु पतिर्मम स्व
र्गे वा नरके त्वं हि यत्र यत्र गमिष्यसि। तत्र तत्र ह्यहं दृष्टे स्वर्गमेष्यामि माशुचः। ब्रह्महत्यादिभिः पापैस्त्वां मोक्षामि
यमालयात्। अहं ब्रह्मा ह्यहं विष्णुरहं वैसर्यदिक्पतिः। आदित्यश्चन्द्रो वनिलोऽथ वायुर्द्यौर्भूमिरापो हृदयं मनश्च
। एते च सर्वे मम साहसेन तुष्यन्तु मे देव प्रवराश्च सर्वे। सप्त प्रदक्षिणां कृत्वा चितामारोहयेत् सती॥ चरणौ हृदये भर्तु
स्तं ध्यात्वा जगदीश्वरं॥ इमा नारीरविधवाः सुपत्नीरांजनेन सर्पिषा संविशन्तु। अनश्रवोऽनमीवाः सुरत्ना आरो राम॰ १०५

हंतुजनयोयोनिमग्नो। इत्यनपर्वादिवरादिशित्तामारोहयति॥ अथप्रवेशनमंत्रः। इदंशरीरंसकलंमदीयंदग्ध्वाहु
शनोक्रतुदिव्यमास्तु। यथाचभर्तुः क्रतुदिव्यदेहंभर्तुःसमीपंभगवन्व्रजामि। किंमयानकृतंसाधुभवेद्यद्धित
वानघ। इदंशरीरमालिंग्य प्रविशामिहुताशनं॥ इत्युक्त्वासाहसंहृष्टाकरतालीःप्रदापयेत्॥ हरिनामोच्चारणंस्व
जनैःकार्यं॥ इतिसहगमनविधिः॥ ब्रह्मघ्नोवाकृतघ्नोवामित्रघ्नोपञ्चदुष्कृतं। भर्तुः पुनातीवैनारीतमादायम
नाक्तया। यदिप्रविष्टोनरकंबद्धःपाशैःसुदारुणैः। संप्राप्तोयातनास्थानंगृहीतोयमकिंकरैः। तिष्ठतेविवशो
दीनोवेष्टमानःस्वकर्मभिः। व्यालग्राहीयथासर्पंविलादुद्धरतेबलात्। तद्वद्भर्तारमादायदिवंयातितपोबला
त्। तिस्रःकोट्योर्द्धकोटीचयानिरोमाणिमानवे। तावत्कालंवसेत्स्वर्गेभर्तारंयानुगच्छति। मृतेभर्तरियानारीस
मारोहेत्तकर्हिचित्॥ अरुंधतीसमाचारास्वर्गलोकेमहीयते। मातृकंपैतृकंचैवयत्रकन्याप्रदीयते। पुनातित्रि
कुलंनारीभर्तारंयानुगच्छति। तत्रसाभर्तृपरमास्तूयमानाप्सरोगणैः। क्रीडतेपतिनासार्द्धंयावदिन्द्राश्चतुर्दश
पतितेचान्यदेशस्थेमृतेश्रुत्वापतिव्रता। समारोहतिदीप्ताग्निंतस्याःशुद्धिर्निबोधत। शरीरार्द्धंस्मृताजायायेन्या

र्व
१०५
पुरायफलेसमा। अन्वारूढासजीवंतीसाध्वीभर्तृहिताचसा।। गृह्यकारिकायां० पत्यासहसवर्णायाश्चितारोह
णमिष्यते। आरोहस्सवर्णाचेत्पृथक्चितिमितिस्मृतिः। ब्राह्मण्याएकचितान्वारोहणंनपृथक्चितौ तत्रा
न्वारोहणमहंकरिष्यामिगुरुंवदेत्।। नमस्कृत्यपरंब्रह्मरूपमारुह्यसाचितिं। पात्रन्यासादिकंसर्वंप्रयोगंकारयेदि
ह। पद्मागूर्पकृतेमात्रप्रयोगेतंप्रणम्यसा।। यथोक्तंप्रविशेदग्निंदह्यमानेचभर्तरि। मोहाद्विचलिताचारीचितिभ्र
ष्टाकथंचन।। प्राजापत्यंचरेत्सापिव्यवहार्याभवेदतः। पृथक्चित्यारोहणेतांदहेन्नयैकदेशतः। औपासनीत्युके
नाथपद्येकाग्निरसौभवेत्।। नाग्निनाद्विविधिस्तासांशूद्राचेल्लौकिकाग्निना।। कृशानुरनुगच्छेच्चेत्कथंचिन्नर्यमंतरा
। स्वपोनेतानयेद्देवहुतेसंतापजाग्निषु।। मथित्वातापनंकुर्यान्निर्यंश्चेद्दूरगच्छति। प्राक्चाहेश्वकुलाञ्चेत्समंथनाद्वा
महानसात्। आहृत्तोदक्षिणाग्निश्चेत्तमानीयस्वयोनितः। कृत्वानैमित्तिकेतत्रकुर्यात्संतापजानलं। स्थालीस्थे
नुगतेवह्नौस्थालीस्थेदक्षिणानले।। कुर्यान्नैमित्तिकंनैव [illegible] पूर्वाग्नौत्यागसंभवात्। अन्येव्याचक्षतेभूमौवह्निं राम० १०५
कृत्वैवभेषजं।। संतापजाग्निसंस्कारोदाहार्थत्वाद्दसौयतः। अन्वारोहणमृतास्तुस्त्रीषुविशेषोविधीयते। तेत्र

105

भर्तुर्मरणदिने एकचितारोहणेन स्त्रिया मरणे सति प्रत्यब्दं मृताहश्राद्धकाले ऐक्यं कर्त्रैक्यं पाकैक्यं च भवंति। पिंडोपि द्विपि
तृकश्राद्धवद्द्वयोरुद्देशेनैक एव देयः। यथा द्विपितृकश्राद्धद्वयोः पित्रोरमुकनाम्नोरमुकनाम्नोश्चेत्युद्दिश्य एक एव
पिंडो दीयते। तथेहाप्येकस्मिन्पिंडे द्वयोर्मातापित्रोरमुकायामुकाय चेत्युद्देशं कृत्वा एक एव पिंडो देयः। पार्वणपक्षे
वैश्वदेविकतंत्रेण भवति। एवं ब्राह्मणा अपि द्वौ वृद्धिश्राद्धयुग्मा भोजनीयाः। नवश्राद्धं तु पृथक् भवति। तदाह लौगा
क्षिः। मृताहनि समासेन पिंडनिर्वपणं पृथक्॥ नवश्राद्धं तु दंपत्योरन्वारोहण एव तु॥ समासेन पिंडनिर्वपणं॥ नवश्राद्धं
पृथगित्यन्वयः। नवश्राद्धं प्राग्द्वादशाहान्नवश्राद्धदिनेषु क्रियमाणं श्राद्धं तत्पृथक्पितुर्मातुश्च कार्यं॥ अत्र मृताहनीति
विशेषोपादानात्तिथिभेदेषु पृथक् एव श्राद्धं कुर्यान्न समासेनेति गम्यते। किंच। मृताहनि समासेन कुर्यादिति विशे
षाभिधानाद्देवसांवत्सरिकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणान्वष्टकादिश्राद्धेव च नांतरे श्रपृथग्विहितेषु पृ
थक्कर्तव्यतायां प्राप्तायां नवश्राद्धं पृथगिति परिसंख्यया नवश्राद्धस्यैकपृथक्त्वविधानान्नवश्राद्धव्यतिरिक्तेषु षोडश
श्राद्धादिषु सांवत्सरिकवदेव समासेनैव विधानं। एवमेकचितारूढानां सर्ववर्णानां वह्नीनामपि हि आद्युद्देशेन द्विवि

देव॰
१०६

पितृकश्राद्धवदेक एव पिंडो देयः। यत्तु स्मृत्यंतरवचनं। एकचितां समारूढौ दंपती निधनं गतौ। पृथक् श्राद्धं तयोः कु
र्यादोदनं च पृथक् पृथगिति। तन्नवश्राद्धविषयं॥ नवश्राद्धं कैश्चित्स्वकाले न क्रियत इत्युक्तं गिरसौ वा क्षेत्रे न गम्यते।
तद्विषयमोदनं च पृथक् पृथगिति। वाक्यं च॥ नवश्राद्धेषु पंक्तिश्चरुहे पर्युषितं च वर्जयेत्। दंपत्योर्भुक्तशेषं च तन्त्रमुं
ञीत कर्हिचित्। यदा त्वेकस्यामेव तिथौ पूर्वाह्नदिनद्वयव्यापिन्यां पूर्वदिनव्यापिभागे पत्युर्मरणं उत्तरदिनव्यापिभागे पत्न्या
एकचितारोहणेन मरणं तदापि समासेनैव पिंडादि विधायक वाक्यबलात् मृततिथेरेकत्वाद् भर्तुश्च प्राधान्यात्तदहे शरीर
मृतायाः पत्न्या अपि तद्दैव मरणसंकल्पेन मृतप्रायत्वाद्द्वितीयदिनमारणरूपिकनिमित्तापेक्षया बहूनामनुग्र
होत्पत्त्य इतीतिथ्येकत्वादिनिमित्तानामेकत्वात्पत्नीभर्तुर्मरणप्रभृत्येव दिनगणनां कृत्वा तिलोदक पिंडदाना
शौचादिकं कर्तव्यं॥ यानि पुनर्भर्तुर्मरणानंतरं चिरकालव्यवधानमप्यनुगमनेन मृतायाः अपि पत्न्याः भर्तृमरण
समकालमेव मरणप्रतिपादकानि वाक्यानि तान्यर्थवादरूपाणि प्रोत्साहकानि। तान्यपि तिथ्यभेदेनानेकाहिके क
चितारोहणविषये योज्यानि॥ यत्तु मनुवचनं॥ या समारोहणं कुर्याद्भर्तुश्चितां पतिव्रता। तां मृताहनि संप्राप्ते पृ राम॰ १०६

106

पृथक्पिंडेन नियोजयेत्। प्रत्यहं च नवश्राद्धं युगपत्तु समापयेदिति। तद्भर्तृमृततिथिव्यतिरिक्तान्यतिथ्यान्वारोहणविषयं।
युगपत्तु समापयेदित्यस्यायमर्थः। मातापित्रोर्मृताहैक्ये मात्रा चैकचित्यामन्वारोहणे कृतेपि तु न नवश्राद्धं मातुर्नवश्राद्धं चैक
कालमेकपाकेन प्रधानात्पूर्वाङ्गकलापं कृत्वा प्रथमं पित्रे पश्चान्मात्रे। च श्राद्धकलापाश्च तत्सामककलापं च तन्त्रेण कुर्यादिति।
अनेकमातृभिरेकचित्यामन्वारोहणे कृतेपि तदनन्तरं साक्षान्मातुस्सपत्न्यास्तदनु उपमातुरित्येवं ज्येष्ठादिक्रमेण नवश्राद्धं
कुर्यादिति॥ मदनपारिजाते॥ यदा भर्तुर्मरणतिथ्यावेव पत्नी सहगमनं करोति। तत्सांवत्सरिके लौगाक्षिणा विशे
षो दर्शितः। मृताहनि समासेन पिंडनिर्वपणं पृथक्। नवश्राद्धं तु दंपत्योरन्वारोहण एव तु॥ अस्यार्थः। दंपत्योरन्वारो
हणेन सहगमनेन निमित्तेन मृततिथ्योरेकत्वे पिंडनिर्वपणं श्राद्धं समासेन तत्संक्षेपेण यथा हि पितृकश्राद्धे एकस्मिन्
पिंडद्वयोद्देशः। एवमत्रापि द्वावुद्दिश्य युग्मा ब्राह्मणा भोजयितव्याः। पिंडनिर्वपणमपि द्वावुद्दिश्येति। एवमेकदै
व श्राद्धद्वयकरणात्समासः। अत्रैवैकोद्दिष्टविकमपि तन्त्रेणैव पार्वणश्राद्धपक्षे। मृताहनीति विशेषोपादानान्मृततिथ्ये
भेदे तु न समासेन श्राद्धं किंतु पृथगेव। मृताहनि समासेन पिंडनिर्वपणं कुर्यादिति विधिबलादन्वारोहणे नैकतिथि

देव.
१०७
107

मृतयोर्दंपत्योः सांवत्सरिकव्यतिरिक्तनवश्राद्धषोडशश्राद्धसपिंडीकरणगयान्वष्टकादिश्राद्धेषु यथा द्विवचनांतरवशाद्
पृथक्कर्तव्यतायां प्राप्तायां नवश्राद्धं पृथगिति केवलं नैव श्राद्धस्यैव पार्वणविधेः परिसंख्यायादितरश्राद्धेषु पृथ
क्त्वनिषेधात् सांवत्सरिकवद्देवषोडशश्राद्धादिष्वपि समासेनैवानुष्ठानं। अमावास्यादिषु पृथक्श्राद्धप्राप्त्यभावाद्देव
न पृथक्करणं किं तु एकैव। अयं विशेषः। षोडशश्राद्धादिषु मातापित्रोः पृथक् देवतात्वं। अमावास्यादिषु तु पितृपिं
डे नैव सपत्नीकश्राद्धे द्वारेणेन मातुरपि तृप्तिरिति। दंपत्योरिति पदोपादानादेके चित्सारोहणाधिकारिण्या सवर्णया
मात्रा मातृत्वं प्राप्ता मातृभिर्वा न्वारोहणे कृते पितृपत्न्योर्मृततिथिरेकत्वे एवं वत्समासेन नवश्राद्धव्यतिरिक्तं सर्वं भवेत्
तथा एकस्मिन्नाहवनीये यस्यानीय ब्राह्मणेत्र द्विजाः तद्देशास्तथैकस्मिन्नेव पिंडे पि। यथा त्रिपितृकस्य। अस्यां
यो जायते पुत्रः स मे पुत्रो भविष्यतीति समयं विधाय याविवाहिता। ततो न पत्न्याया एव तस्या भर्तृमरणे नियोगेन
देवरादिभ्यः पुत्रोत्पादनसमये उत्पाद्यमानः पुत्र आवयोरपीति अस्मिन् संकेते तत्रोत्पन्नः पुत्रस्त्रिपितृकः। ए
को मातामहः। अपरः क्षेत्राधिपतिः अन्यश्च बीजी इति त्रयः पितरः। तस्यामावास्यादिश्राद्धेषु यथा त्रयोद्देशो नैक एक

तम.
१०७

पिंडस्तथापित्राद्युद्देशेनाप्येकएवपिंडोदेयइत्यर्थः। यदि जन्मन्वारोहणएवायं निषमस्तदापित्रोरिति ब्रूयात्। तद्दंपत्यो
रिति। तस्मात्सर्वोक्तएवनिर्णयः। यत्तु स्मृत्यंतरं॥ एकचितांसमारूढौ दंपतीनिधनंगतौ॥ पृथक्श्राद्धंतयोः कुर्यादोदनं
चपृथक्पृथक्॥ इति। तन्नवश्राद्धमात्रविषयं। नवश्राद्धपिंडदानं तु येषांपक्कान्नेनैवतेषां मोदनो पिंडपृथगेवेत्यर्थः
अथवानवश्राद्धंभोक्तःसद्भावेयदापक्कान्नेनक्रियते। तदौदनमपिपृथक्पृथक्पृथगेवेत्यर्थः। नवश्राद्धस्यपक्कान्नेनकरण
मंगिरवचनेनद्योतितं। नवश्राद्धेषुयच्छिष्टंगृहेपर्युषितंचयत्। दंपत्योर्भुक्तशिष्टंच तन्नभुंजीतकर्हिचिदिति। य
त्तुनर्मदागुणोक्तं॥ वासमारोहणेकुर्यान्नवश्राद्धंपतिव्रता। तां मृताहनिसंप्राप्तेपृथक्पिंडेनियोजयेत्। प्रत्यब्दंच
नवश्राद्धंयुगपत्तुसमापयेत्। इति तन्नवमृततिथिव्यतिरिक्तान्यतिथावन्वारोहणमृतविषयं। नवश्राद्धंतुयुगप
दित्यस्यायमर्थः। प्रथमंपितुर्नवश्राद्धोपविष्टस्यब्राह्मणस्यपादप्रक्षालनंपश्चान्मातुर्नवश्राद्धोपविष्टस्यैवंक्रमेण
विसर्जनांतंकृत्वायुगपच्छ्राद्धद्वयंसमापयेदिति। यदाचैकस्यामेवतिथौपूर्वदिनेएकस्याएवतिथेर्भागेभर्तृमरणं
। उत्तरदिनेतस्याएवतिथेरुत्तरभागेपत्न्याअन्वारोहणेनमरणं। तदापिसमासेनैवपिंडाहिविधायकवाक्यवला

दृढ्धेनाप्यनुग्रहीतास्याप्यइति भिन्नदिनमरणे रूपैकनिमित्तापेक्षया पूर्वोक्तानेकनिमित्तानुरोधस्यान्याय्यत्वाद्भर्तृम
रणप्रभृत्येव दिनपरिगणनां कृत्वा तिलोदकपिंडदानं शौचैकादशाहादिकं कर्तव्यं। एवं च यानि वाक्यानि भर्तृ
मरणानन्तरं चिरकालस्य व्यवधानेनान्वारोहणमृताया अपि भार्याया भर्तुर्मरणसमकालमेव मरणप्रतिपादका
नि अर्थवादरूपाणि वाक्यानि चिंतामणिरत्नावल्यादिषु दर्शितानि पूर्वोक्तविषये योज्यानि। ननु स्मृतावहनि समासे
न पिंडनिर्वपणमित्युक्तं तद् वचनबलात् मृताहादिश्राद्धाहवनीयार्थोपविष्टएकस्मिन्ब्राह्मणे एकस्मिन्पिंडे द्वयोरु
द्देशेन समासः संक्षेप इति वक्तव्यं। संक्षेपश्च ब्राह्मणभेदेपि घटते तद्यथा। एकश्राद्धनियुक्तब्राह्मणचरणप्र
क्षालनानंतरमितरश्राद्धनियुक्तचरणक्षालनं। एवमेकत्रासनादिकं दत्वा इतरत्रासनादिकमित्यास समासे
देवं क्रियमाणे संक्षेपापेक्षेरिति चेत्। मेवं। समासेन पिंडनिर्वपणमिति पिंडनिर्वपणेपि संक्षेपो दर्शितः। पूर्व
पक्षोक्तरीत्या क्रियमाणे पिंडस्याभिन्नत्वात्तत्र समासो न घटते निरपेक्षश्च समासशब्दोपात्तः। स च सर्वात्मना।
संक्षेपयोग्यः सकृत्स्येति कर्तव्यता संक्षेपप्रतिपादयति। बाधकाभावात्। तस्मात्सार्वत्रिककर्तव्यतानुसृतः संक्षे

पएवांगी कर्तव्या। तथा च द्विपितृक श्राद्धव देवसंक्षेपश्रुतिसिद्धं। यदा तु पितृसांवत्सरिक श्राद्धकालो मातृसांवत्सरिक श्राद्ध
कालेतदापितृादीनां सपत्नीकानानामुद्देन कर्तव्यः किंतु मरणपौर्वापर्यानुसारेण तयोः सांवत्सरिक श्राद्धद्वयं तंत्रेण
अपणं कृत्वा निमंत्रणादिद्विजविसर्जनांतं पृथगेव कार्यं। यदा तु मरणपौर्वापर्यमज्ञानं तदा पूर्वं पितुः सांवत्सरिकं
प श्चान्मातुरित्येवं श्राद्धद्वयं कार्यं। पितुर्मुख्यत्वात्। एवमेव युगपन्मरणेन पितृमातृभ्रात्रादिसांवत्सरिक श्राद्धदिने
कोपि ज्येष्ठादिक्रमेणैकश्राद्धं कर्तव्यं॥ पूर्वं पितुस्ततो मातुस्ततो न्येषामिति प्रधानोपसर्जनेतरतमभावेन सांवत्सरि
कं पृथक्पाके न कुर्यात्॥ यत्तुनर्भगुणोक्तं॥ एककालगतानां तु बहूनामथवा द्वयोः। तंत्रेण श्रपणं कुर्याच्छ्राद्धं
कुर्यात्पृथक्पृथक्॥ पूर्वकस्य मृतस्यादौ द्वितीयस्य ततः पुनः। तृतीयस्य ततः कुर्यात्संनिपाते त्वयं क्रमः॥ पूर्वकस्य मुख्यस्य।
द्वितीयस्य मुख्यापेक्षया जघन्यस्य। तृतीयस्य जघन्यतरस्येत्यर्थः। तत्रायं क्रमः। पितृब्राह्मणनिमंत्रणानंतरं मा
तृब्राह्मणनिमंत्रणं। ततो न्यनिमंत्रणं। एवं पादप्रक्षालनादिविसर्जनांतं कुर्यात्। एतत्पौर्वापर्येणैकश्राद्ध
करणे कुतपादिश्राद्धकालातिपातप्रसक्तौ द्रष्टव्यं। श्राद्धकालातिनपाते तु पृथक्पाके नपथोक्तक्रमेण कर्म पृथक्

देव० पृथक्कर्त्तव्यं स्पष्टशृंगोपि। भवेद्यादिसपिंडानां युगपन्मरणं तदा। संबंधासत्तिमालोच्य तत्क्रमाच्छ्राद्धमाचरेत्।
१०९ इति। तत्क्रमादिति संबंधक्रमात्। पत्नी पतित्वलक्षणसंबंधस्यासन्नत्वात्तत्पत्न्याः प्रथमं श्राद्धं कुर्यात्। अनंतरमु
भयप्रतियोगिकपुत्रत्वलक्षणसंबंधभाजः पुत्रस्य। अनंतरं व्यवहितत्वसंबंधभाजो भ्रातुः। एवं तत्पुत्रादिष्व
प्यूहनीयं। यत्तु कृत्वा पूर्वमृतस्यादौ द्वितीयस्य ततः पुनः। तृतीयस्य ततः कुर्यात्संनिपाते त्वयं क्रमः। मातुर्मा
तापितृव्यतिरिक्तानां तुल्यसंबंधानामेकस्मिन्दिने क्रमेण मृतानां मरणक्रमेण श्राद्धं कर्त्तव्यमित्येवंपरं। भृगुस्मृ
त्यसंगवाक्ये तु अग्निजलाद्युपद्रवेण तुल्यकालमृतविषये।। ननु पत्न्यादीनां पित्रोश्च संघातमरणे कथमित्यत्राह।
पत्न्याः पुत्रस्य तत्पुत्रभ्रात्रोस्तत्तनयस्य च। स्नुषायाश्च स्वसुश्चैव पित्रोश्च संघातमरणेऽपि हि। अर्वाग्ज्ञान्मातृपितृपूर्वं
सापिंड्यमाचरेत्। पुत्रतत्पुत्रः पुत्रपुत्रः। तत्तनयो भ्रातृतनयः। पित्रोर्मातापित्रोः। पत्न्यादीनां पित्रोश्च क्रमेण युगप
त्संघातमरणं यदि स्यात्तदा संवत्सरादर्वाग् मातापितृसापिंड्यपूर्वकं सापिंड्यं कुर्यात्।। तदाह भृगुः। माता भ्राता च एम०
तत्पुत्रः पत्नी पुत्रः स्नुषा स्वसा। एषां मृतौ चरेच्छ्राद्धमसंख्येषु न पुनः पितुरिति। पत्न्या अनंतरं मातापितृमृतौ मर १०९

णक्रमेणैव श्राद्धप्रसक्तौ तन्निवृत्त्यर्थं मातृपितृपूर्वकमित्युक्तं॥ सापिंड्ये लौगाक्षिणा विशेषो उक्तः॥ पत्नीपुत्रस्नुषा गोत्र
भ्रातृतत्पुत्रका अपि। पितरो वा मदेकस्मिन् म्रियेरन् वासरे तथा। आद्यमेकादशे कुर्यात् त्रिपक्षे वत्सपिंडनमिति। पित्रोः
संघातमरणे विशेषमाह कार्ष्णाजिनिः। पित्रोः श्राद्धं समं प्राप्ते न वेपर्युषितेपि वा। पितृसर्वं स्नातः कुर्याद् अन्यच्चासति
योगतः॥ अन्यत्र मातृपितृव्यतिरिक्त विषये संबंधासन्नियोगतः कुर्यादित्यर्थः। ननु नैकश्राद्धद्वयं कुर्यात् त्स्वधा ने
ऽहनि क्वचिदिति प्रचेतसा। एकस्मिन् कस्मिन् अह्नि श्राद्धद्वयकरणं निषिद्धं। तत्कथमुच्यते संबंधक्रमेणैकोवह्नि नि
श्राद्धानि कुर्यादिति। सत्यं देवताभेदे निमित्तभेदे नैकस्यानेक श्राद्धविधानात्॥ तदुक्तं जाबालिनः। श्राद्धं कृत्वा तु त
स्यैव पुनः श्राद्धं तत्तद्दिने। नैमित्तिकं तु कर्तव्यं निमित्तानुक्रमोदयमिति॥ श्राद्धं कृत्वा पुनः श्राद्धं न कुर्यादेकवासरे
। यदि नैमित्तिकं तस्मादेकोद्दिष्टं भवेदिह। कात्यायनः। द्वे बहूनि निमित्तानि जायेरन्नेकवासरे। नैमित्तिकानि कार्याणि
निमित्तोत्पत्त्यनुक्रमादिति॥ अथ बालमरणे कर्तव्यमुच्यते॥ गर्भे नष्टे क्रिया नास्ति दुग्धं देयं शिशौ मृते। वयं च पा
पसंक्षीरं दद्याद्बालविपत्तितः। एकादशाह द्वादशाह वृषवर्ण विधिं विना॥ महादान विहीनं च कुमारे कृत्यमाचरे

त्। कुमाराणांचबालानां भोजनंवस्त्रवेष्टनं॥ बालेवातरुणेवृद्धेघटोभवतिदेहिनां॥ भूमिनिक्षेपणंबाले आवर्षद्वयमा
शिषं। ततःपरंखगश्रेष्ठदेहदाहोयथाविधिः। शिशुरादंतजननाद्बालःस्याद्यावदाशिखः। कथ्यतेसर्वशास्त्रेषु
कुमारोमौं। जिबंधनात्। शूद्राहीनांकदापिस्यात्संशयोमौंजिवर्जनात्॥ गर्भाच्चनवमंनीत्वाशिशुरामासषोडशं
। बालश्चार्धवलेहीयात्रमासात्सप्तविंशतिः॥ आपंचवर्षात्कौमारःपौगंडोनवहायनः। किशोरःषोडशसमा
स्ततोयौवनमाविशेत्। मृतश्चत्वंचमेवर्षेत्रव्रतःसव्रतोपिवा॥ पूर्वोक्तमेवकर्तव्यमीहृतेदशपिंडकं। स्वल्पक
र्मप्रसंगाच्चस्वल्पाद्विषयबंधनात्। स्वल्पंचयुषिवासांसिक्रियांस्वल्पामपीछति॥ यावद्रूपमयाजंतुर्यावद्विष
यव्यापृतिः। यद्यदस्योपजीविस्यात्तत्तद्देयमिहेछति। ब्रह्माद्वीजोद्भवाःपुत्रादेवर्षीणांचवल्लभाः। यमेनयमदू
तैश्चशास्यंतेनिश्चितंखग। बालोवृद्धोयुवावापिदेहोभवतिदेहिनां। सुखंदुःखंसदावेत्तिदेहीसर्वगतस्त्विह। प
रित्यज्यतदात्मानंजीर्णांत्वचमिवोरगः। अंगुष्ठमात्रःपुरुषोवायुभूतःक्षुधार्दितः। तस्माद्देयानिदानानिमृतेत
स्मिन्नृस्तुनिश्चितं। जन्मतःपंचवर्षाणिभुंक्तेदत्तमसंस्कृतं॥ पंचवर्षाधिकेबालेविपत्तिर्यदिजायते। वृषोत्स

र्गाद्देकं कर्मकर्त्तव्यमुदकं ततः। अहन्यहानेसंप्राप्ते कुर्याच्छ्राद्धानि षोडश॥ पायसेन गुडेनापि पिण्डान्दद्याद्यथाक्रमं॥
उदकुम्भप्रदानं तु यद्दानानि यानि च। भोजनानि द्विजेभ्यश्च महादानानि शक्तितः। दीपदानानि यात्किंचित्तं च वर्षा
ब्दिके सदा॥ कर्त्तव्यं तु खगश्रेष्ठ प्रेतार्थाक्यैतत्क्षये। यद्दानं क्रियते सर्वं मुद्गलं लभ्यगच्छति। प्रेतार्थमग्ने देवं वह्निं यं ततः। पि
तृगणस्य च। स्वाहाकारेणैव कुर्यादेकोद्दिष्टानि षोडश॥ सत्तु दर्भैस्तिलैः पुष्पैः प्राचीनावीतिनिश्चितं॥ अपसव्यं
च कर्त्तव्यं कृते याति परां गतिं॥ उपनिश्चिरायुर्भूत्वा च स्वकुले संवसेत्तु ध्रुवं। सर्वसौख्यप्रदः पुत्रः पित्रोः प्रीतिविवर्द्धनः
चूडाकर्मणि संजाते विपत्तिस्तु यदा भवेत्॥ सूतकाले प्रकर्त्तव्यं वृषस्योत्सर्जनं तु तैः। तत्र दाहः प्रकर्त्तव्य उदकं तत्र
निश्चयः। श्राद्धानि षोडशा पापा घासपिण्डीकरणं विना। यज्ञोपवीते वा लब्धे तत्र द्विजाय दीयते। किंचित्समानवयसां
सद्धूत्वान्नं यथाविधि॥ भक्ष्यं भोज्यं च दातव्यं तथा च सुखमक्षिका। तद्दुग्धानि प्रदेयानि सोपानत्कानि तत्समे वि
रुद्धविधि विध्वंसे। कुमार्यनुपनीतानां सावत्सरिकादीनि पिण्डरहितान्येव॥ तेषां तु सपिण्डीकरणाभावः। शूद्रंगा
ति वन्नमस्कारमात्रेण सर्वाः क्रिया इति। पंचवर्षादूर्ध्वं कृमृतानां तु वृषोत्सर्गविकल्पः॥ तथा चोक्तं॥ आमौजिबंध

नाद्विप्रपंच नाद्दिषु चेन्मृतः। केचिदुत्सर्गमिच्छंति केचित्पिंडक्रियाध्रुवमिति॥ अस्यार्थः। पंचमाद्दिषु चेन्मृत
स्तदा वृषोत्सर्गमिच्छंति। नार्वाक् केचित्पिंडक्रियावधूत्सर्गमिच्छंति। पिंडक्रियावध्रुवो निश्चयः। पिंडक्रियाध्रुवत्त्वमिति वृ
षोत्सर्गविशेषणं॥ तत्र चापि पिंडक्रियावद्वृत्सर्गमिच्छंति॥ यथा पिंडक्रिया पंचमवर्षादिगम्यतानां नियमेन स्यात्तथा वृ
षोत्सर्गोपीत्यर्थः। अथवा पिंडक्रियायां ध्रुवः पिंडक्रियाध्रुवस्तमित्युत्सर्गविशेषणं। यदाप्रभृति पिंडक्रिया तदा
प्रभृति वृषोत्सर्गोपीत्यर्थः॥ इति बालमरणोक्तस्य॥ अथ पंचकमध्येमरणे॥ आदौ कृत्वा धनिष्ठार्द्धमेतन्नक्षत्र
पंचकं रेवत्यंतं सदा दूष्यं अशुभं सर्वदा भवेत्॥ दाहस्तत्र न कर्तव्यो विप्रादिसर्वजातिषु। दीयते न जलं तत्र अशु
भं जायते भृशं। अथवा ऋक्षमध्ये तु दाहश्चविधिपूर्वकः। शवस्य च समीपे तु क्षिप्यं ते पुत्तलास्ततः। दर्भमयाश्चत्वार
स्तु ऋक्षमंत्राभिमंत्रिताः। ऋक्षमंत्रा ग्रहयज्ञोक्ता नक्षत्रमंत्राः। वसोः पवित्रं वरुणस्योत्तमं॥ उत ततो हिर्बुध्न्यः। शिवो नाम।
पूषं नवेत्येते मंत्राः। ततो दाहः प्रकर्तव्यः सौश्च पुत्तलकैः सह॥ सूतकांते तदा पुत्रः कुर्याच्छांतिकमुत्तमं॥ पंचके तु मृतो यो
सौ लभते न गतिं नरः। तिलान् गाश्च हिरण्यं च तस्योद्दिश्य दत्तं ददेत्॥ विप्राणां दीयते दानं सर्वोपद्रवनाशनं। सूतकां

ते च सत्तुत्रैः सम्प्रेतो लभते गतिं। भाजनोपानहौ छत्रं हैमकुंडलवाससी। दक्षिणा दीयते विप्र सर्वपातकमोचनी। बाल
दहने श्वपचे नष्टे पंचकेषु मृतस्य हि। विधावनं यो न कुर्वीत विघ्नस्तस्य हि जायते॥ इति पंचकमृतविधिः॥ अथ नारा
यणबलिरुच्यते॥ विप्रवैश्यक्षत्रचांडाल शृंगिदंष्ट्रिजलाग्निभिः। नदिविसर्पादिभिर्दुष्यादर्भक्रोधादिभिर्मृताः। नकु
र्याद्दहनाशौचोदकमेषां कृतं यदि॥ नोपतिष्ठति तत्सर्वमंतरिक्षे विनश्यति॥ गंगायां प्रक्षिपेद्देहं सरित्स्वान्यासु वा ततः
तत्रातानाग्नौ प्रक्षिपेद्दग्धकुश मृगाग्निं च वाङ्मथे॥ यत्पात्राणि सर्वाणि लौकिकेनाग्निना दहेत्॥ तेषां शवानां स्पर्शन
स्नानालंकरणादिकं। रज्जुच्छेदाश्रुपातादीन् ज्ञानात्कुरुते यदि। महासांतपनं स्नानात्तप्तं कृच्छ्रं समाचरेत्॥ ए
तेष्वेकैककरणे चन्द्रायणादुपवासतः। कृच्छ्रातिकृच्छ्रौ मत्या चेद्मासाद्वैदं वं चरेत्॥ योऽर्षिविप्रभृतीनां च सर्वेषां
नास्ति निःकृतिः। प्रायश्चित्ता कृतौ तेषां वत्सं ते क्रिया भवेत्। प्रायश्चित्ते कृते सर्वं तदेव स्यादिति स्मृतिः। वत्सरांते
लोकगर्हापरिहारार्थमस्य च। शुध्यर्थं दहनाशौचादौ योग्यतार्थमेव च॥ कुर्यान्नारायणबलिं योग्यं कृत्वैव भेषजं
आत्मघातकशुद्ध्यर्थं चरेच्चान्द्रायणद्वयं॥ तप्तकृच्छ्रं चतुष्कं च तत्र शतकृच्छ्राणि वा चरेत्॥ सर्वप्रायश्चित्तयोग्यं कृ

त्वा तथैव चा तेषां। पार्वणादि प्रभृतीनामपि वा कालांतरे तस्यात्॥ अर्वाक् संवत्सरात्कुर्यादिह नादियथोदितं॥ कृत्वा ना
रायणबलिमनिरसत्वात्तदा पुषः। नारायणबलिस्तेषां शुध्यर्थं समभिधीयते। कस्यांचिच्छुक्लैकादश्यां विष्णुं वैव
स्वर्णं यमं। अर्चयेद्गंधपुष्पाद्यैर्मध्याह्ने च सरित्तटे। शालितंडुलपुंजेषु प्रतिमा द्वे रमावतः। तिलमिश्रान्मध्वाज्याभ्य
क्तान्दश पिंडान्मधुप्लुतान्। दक्षिणाग्रेषु दर्भेषु प्राक्संस्थं दक्षिणामुखः। प्राचीनावीती हविषा सव्यं ज्ञानुनि
पात्य च। देवा यतो विष्णुरूपं प्रेतस्तन्मनसा स्मरेत्॥ नामगोत्रं गृहीत्वैव तत्तल्लीं दद्यात्तथार्चयेत्। गंधपुष्पादिभि
र्धूपभोज्यैस्तान्विविधैरपि। कृत्वा पिंडप्रवाहांतं नद्यंभसि ततः क्षिपेत्। स्नात्वा सम्यग्गृहान्गत्वा ह्नि देवादिकं ततः
पत्न्यादिभ्यो न दद्यात्स पतुर्नेहाधिकारता। दिनशेषं ततो नीत्वा तस्यां रात्रौ निमंत्रयेत्॥ विप्रान् शुचिकुलोत्पन्ना
न्संच समाथवा नवेत्ति विद्यातपः समृद्धांश्च सुशीलान्विजितेंद्रियान्॥ अपरेहनि संप्राप्ते मध्याह्ने समुपोषितः
विष्णोरभ्यर्चनं कृत्वा विप्रांस्तानुपवेशयेत्॥ उदङ्मुखोऽन्यथान्येष्टं पितृरूपमनुस्मरन्। मनो निवेश्य विप्रो वै सर्वं
कुर्यादंतं द्विजः। तत्कुर्वार्थं लोकगर्हापरिहारार्थमाचरेत्। आशौचादौ पोगपतायै करिष्ये हमिमं बलिं। पादप्रक्षा

लनाद्यत्रतत्सप्रश्नांतत्समाचरेत्॥ एकोद्दिष्टविधानेनप्रेतएवान्नदेवता। तत्सप्रश्नांततस्तत्तुलसीमवनिज्यात्तुपंचसुह
विष्णुव्यंजनेनैवतिलादिसहितेनच। पंचपिंडान्प्रदद्याद्धै देवंरूपमनुस्मरन्। प्रथमंविष्णवेदद्याद्ब्रह्मणेचशिवायच
यमायसानुचरायचतुर्थं पिंडमुत्सृजेत्॥ मृतंसंकीर्त्यमनसानामगोत्रमतःपरं। विष्णोर्नामगृहीत्वैवपंचमंपिं
डमुत्सृजेत्। गोत्रायदेवदत्तायविष्णवेनमउच्चरेत्॥ यज्ञोपवीतिनापिंडांश्चतुरःप्राक्समंनिर्वपेत्। नावनेजनमिच्छं
ति पिंडेषूपरितद्विदः। प्राक्संस्थान्निर्वपेत्पिंडान् तुलसीगंधादिनार्चयेत्॥ आचांतांस्तांस्ततोविप्रान्दक्षिणाभि
श्चतोषयेत्। तेषामेकंचवृत्तमंहिरण्येनसमर्चयेत्॥ गवावस्त्रेणभूम्याचप्रेतंतंमनसास्मरन्। ततस्तिलांभोविप्रा
न्दर्भैर्हस्तसमन्वितैः। क्षिपेत्पुर्गोत्रपूर्वंहिनामबुद्धौनिवेश्यच। । वहिर्गत्वातिलांभःसतस्मैदद्यात्समाहितः॥
गोत्रायदेवदत्तायएतत्तेउदकंब्रुवन्। मित्रबंधुजनैःसार्द्धंपश्चाद्भुंजीतवाग्यतः। एवंविष्णुमतेस्थितानांयोदद्याद्द
लद्यातिने॥ समुद्धरतितंक्षिप्रंनात्रकार्याविचारणा॥ दहनादितत्स्तेषांत्रिरात्राशौचमिष्यते। इंदुक्षयेविषुवति
मन्वादिषुयुगादिषु। वैष्णवायतनेकार्यमितिकेचिद्ब्रुवंतिहि॥ तथा। एकादश्यांकृष्णपक्षेकुर्यान्नारायणबलिं।

दूव०
११३
113

तेगताद्यक्षयंस्थानं दाहप्रलयवर्जितं । एकादशी ग्रहणं पंचमी श्रवणर्क्षयोरुपलक्षणं ॥ तथा च स्मृतिः । एकादश्यां
च शुक्लायां पंचम्यां श्रवणेन वा ॥ इत्यामृतानां शुध्यर्थं कार्यो नारायणो बलिः । अयं च नारायणबलिः । एतज्जातपुत्रा
णां जातमृतपुत्राणां च पुत्रप्रतिनिध्यभावे पत्नी भ्रातृभ्रातृपुत्रादिभिः । आप्तैर्दुहित्रादिकाधिकारैः कार्यः । तथा च गरुड
पुराणे ॥ यस्यैवं मृत्युकाले तु शुक्लन्नांसंततिस्तथा । सवसेन्नरके नित्यं पंके मग्नः करी यथा ॥ योन्यंतरेषु यो पत्र वृक्षः
पक्षी सरीसृपः । संततिं च विना सोत्र मुच्यते नरकात्कथमिति गरुडकृतप्रश्नानंतरं विष्णुवाक्यं । कश्चिद्वाचार्यः शि
ष्यो वा हृदेवाहिपाहिगोत्रजः । बलिं नारायणं कुर्यात्तस्योद्दिष्टो न भक्तिमान् । विशुद्धः सर्वपापेभ्यो मुक्तः स नरकाद्भव ।
स्वर्गवासेव सेद्दिव्ये नात्र कार्या विचारणेति । नात्र शुक्लसंततिग्रहणेन यस्यौरसं ज्ञातीनां पुत्राणां मरणेन शुक्लसं
ततिः स एव ज्ञेयः । किं तु तदुपलक्षणत्वेनाजातपुत्रोपि । अपुत्रस्य गतिर्नास्ति स्वर्गे नैव च नैव चेति । गरुड एव
सामान्येनोक्तत्वात् । विशेषस्त्वेष एव ॥ मरणानंतरं शुक्लसंततेः पुरुषस्य संनिहितायां । कस्यांचिदेकादश्यां
पंचम्यां श्रवणर्क्षे वा केवलो नारायणबलिरेव पत्न्याद्यधिकारिणा कर्तव्यः । इतरौर्ध्वदेहिकस्य तद्विषये पूर्वमेव राम०
११३

संजातत्वात्। जीवितएव मुत्सन्नप्रकारेणामृतपुत्रस्य वाशौचांतर्हित जलपिंडदानोत्तरकालमासहवृषोत्सर्गश्राद्धा
द्यर्थं संनिहितैकादश्यां पंचम्यां श्रवणर्क्षे वा कार्यः। नारायणबल्यनंतरं श्री प्रेतश्राद्धादिक्रिया विधिप्रोक्तवक्ष्यमाणा
तिथिवारनक्षत्रादिविशिष्टकालोपेतएकस्मिन्नेवाहनि नवश्राद्धादीनि मरणानंतरमेवाग्निहोत्रादिना विहितशवदा
हस्य प्रेतस्य कर्तव्यानि। अविहितशवदाहस्य भूम्यां निखातशवमुख्यस्य यथाविधिदग्धावतः उत्तरेण नवश्राद्धादीनि
स्वस्वकालएव कर्तव्यानि।। तथा च गरुडपुराणे।। अज्ञानाद्दिग्धतो वापि नकृते चेत्सपिंडनं।। नवकं षोडशश्राद्धा
न्येकाहे कारयेत्ततः।। अदाहेन च कर्तव्यं संस्दाहे कारयेद्बुधः। दर्भैः पुत्तलकं कृत्वा वह्निना दाहयेत्क्रुवमिति। अ
न्यथा पापमृतानां शुध्यर्थं श्राद्धमुच्यते। कृतेन येन तत्पांडप्रदत्तमुपतिष्ठते। दंती शृंगी नखीव्यालनीरागुहं धनेस्त
था। विद्युत्पात्रैर्वृक्षैः श्वविप्रैः श्वस्त्रात्मना हताः। व्रणे संजातकीटाश्च म्लेच्छैश्चौरैस्तथा हताः। पापमृत्यव एते वै अप्रम
गस्यर्थमुच्यते। नारायणबलिः कार्यो विधानं तस्य चोच्यते। ऊर्ध्वं षण्मासतः कुर्यादिक ऊर्ध्वं तु वत्सरात्।
तेषां पापक्षयोहार्थं कार्यो नारायणे बलिरिति। ब्रह्मघ्नादेर्विपन्नस्य तथा चैवात्मघातिनः। आचाण्डिहाय नादग्नि

दव न दद्यात्प्रेतकस्य तु ॥ किं तु तान्निखनेद्भूमौ कुर्यान्नैवोदकक्रियां । सर्पादिप्राप्तमृत्यूनां नाग्निदाहादिका क्रिया ॥
११४ एवं मासे तु गते कार्य इति प्राह पराशर इति ॥ बौधायनसूत्रे ॥ अथातो नारायणबलिं व्याख्यास्यामोऽभिशस्त
114 पतितस्त्वरयात्मत्यागिनां ब्राह्मणहतानां च द्वादशवर्षाणि त्रीणि वा यत्र यत्र मरणं यस्य यस्य तत्र तत्र कुर्वीत सहिता
नां पालाशानुग्रामे वा ह्रूयपर्णमरूपाणां कृष्णाजिनेन पुरुषाकृतिं कृत्वा तिहोत्तारकल्पेन वा पितृमेधिकेन वा संस्कारं
कुर्यादिंगप्रयोगमंत्रांते नोध्वत्सपुरुषस्सूक्तस्य प्रत्वं मंत्राणां पौरुषेणोपस्थानं समानमेतत्तीर्थे स्नात्वा प्रेताय
दकक्रियां कृत्वा नामगोत्रे मनसा ध्यात्वा नारायणायैतत्र उदकमिति वाग्निं व्याहरेद्देवमेव सायं प्रातर्दशरात्रं क
रोति त्रिरात्रेण वा पिंडदानमसावेतत्ते पिंड इति विशेषः ॥ एकादश्यामेकोद्दिष्टं कुर्वीत । संस्कारविधिं प्रकृतो
क्तः । तत्रैव सर्पहतानां नमोऽस्तु सर्पेभ्य इति तिस्र आहुतीर्हुत्वा । उदकेन च मृतानां समुद्राय वरुणायेत्याहुतीर्हु
त्वा तस्य कुद्धं संस्थानविद्याः । देहसंस्कारपक्षे ज्ञातमृतदेहिनामित्याहुः । सर्वेषामेतेषामिति ॥ नारायणब नाम०
लिप्रयोगस्कंध षट्त्रिंशन्मते प्रदर्शितः । तेषां पुत्राश्च पौत्राश्च दायादासमभिप्लुताः । यथा श्राद्धं प्रतन्वीत विष्णुना ११४

मप्रतिष्ठितं॥ तथा च संप्रवक्ष्यामि नमस्कृत्य स्वयंभुवे। एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं॥ नारायण
बलिः कार्य इति विशेषः। अत्र विशेषो भविष्योत्तरे विशेषो दर्शितः। पूर्णे संवत्सरे तेषां मध्ये कार्यं दयालुभिः॥
एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिं। विष्णुं यमं च संपूज्य गंधपुष्पादिभिस्तथा॥ दश पिंडान् घृताभ्यक्तान्
दर्भेषु मधुसंयुतान्। यज्ञोपवीती सतिलान् ध्यात्वा विष्णुं यमं तथा॥ दक्षिणाभिमुखो वस्तु भूमौ एकैकं निर्वपेत्तान्
उधृत्य निष्ठुतान्पिंडांस्तीर्थांभसि निक्षिपेत्। एतच्च विष्णुध्यानपूर्वकं कर्त्तव्यमिति। षट्त्रिंशन्मते। वि
ष्णुं ब्रह्मौ समासाद्य नद्यंभसि ततः क्षिपेत्॥ भविष्योत्तरे॥ क्षिपेत्तान्कीर्तयन्नाम गोत्रं तु मृतकस्य तु। पुन
रभ्यर्च्य ये द्विष्णुं यमं कुसुमचंदनैः। धूपदीपैः सनैवेद्यैः भक्ष्यभोज्यसमन्वितैः। तस्मिंश्चोपवसेदह्नि विप्रांश्चैव
निमंत्रयेत्। कुलविद्यातपोयुक्तान् रूपशीलसमन्वितान्। नव सप्ताथ वा पंच स्वसामर्थ्यानुसारतः। बौधा
यनसूत्रे॥ अथ नारायणबलिं व्याख्यास्यामो दक्षिणायने चोत्तरायणे वा अपरपक्षस्य द्वादश्यां क्रियेत पूर्वे
द्युः षड् द्वादश वा ब्राह्मणान्निमंत्रयेत् योनिगोत्रश्रुतिसंपन्नान्॥ भविष्योत्तरे॥ अपरेहनि संप्राप्ते म

देव· ध्याद्भेषु समाहितः। विष्णुं यमं च संपूज्य विप्रांस्तानुपवेशयेत्॥ उदङ्मुखो न्यथ्यास्पृष्टं पितृरूपमनुस्मरन् आ
११५ वाहनार्घदानादीन्विष्णुध्यानसमन्वितान्। यज्ञोपवीती कुर्वीत प्रेतनामप्रकीर्तयेत्॥ प्रेतं यमं च विष्णुं च स्मरन्
115 श्राद्धं समापयेत्। तस्मान्स्नात्वा ततो विप्रान्पितृन्पृष्ट्वा यथाविधि। अन्नेभ्यस्तु यथ सर्वेभ्यः पिंडदानार्थमुद्धरे
त्। पृथग्दर्भेषु पिंडांस्तु पंच दद्यात्क्रमेण तु। प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च। सभृत्याय यमायाथ
प्रेतायापि च पंचमं। नामगोत्रं स्मरेत्तस्य विष्णुशब्दं च कीर्तयेत्। नमस्कारशिरस्कं तु पंचमं पिंडमुद्धरेत्। द
द्यादाचमनं पश्चात्तांबूलं दक्षिणां तथा। एकं विप्रं शिष्टतमं हिरण्येन प्रपूजयेत्। गोभूमिवस्त्रायानाद्यैः
शक्त्या प्रेतं स्मरन्सुतः। ततस्तिलांभो विप्रास्तु हस्ते दर्भैः समन्वितैः। क्षिपेयुर्गोत्रमुद्दिश्य नाम तु द्वौ निवेश्य
च। बहिर्गत्वा तिलांभस्तु तस्मै दद्युः समाहिताः। इति पाठः। ततस्तिलांस्तु विप्राणां दर्भयुक्तेषु पाणिषु।
नामगोत्रं स्मरन्दद्याद्विष्णुः प्रीतोऽस्त्विति ब्रुवन्। अन्नं व्रजाद्द्विजान्पश्चात्तिलांभो दक्षिणामुखः। कीर्तयेन्ना
मगोत्रे तु भुवि प्रीतोऽस्त्विति क्षिपेत्। मित्रं वै बुजनैः सार्द्धं शेषं भुंजीत वाग्यतः॥ एवं कृते गमिष्यंति स्वर्लोकं पा राम॰
११५

पकर्मणः॥ इतिनारायणबलिः॥ प्रमादादिच्छया वापि नागाद्वा सर्पतो मृतः। पक्षयोरुभयोर्नागात्पंचमीषु प्रपूजयेत्
कुर्यात्पिष्टमयीं लेख्यां नागप्रतिकृतिं भुवि। अर्चयेत्तां सितैः पुष्पैः सुगंधैश्चंदनेन तु। प्रदद्याद्धूपदीपं तु तंदुलांश्च सि
तान्क्षिपेत्। आमपिष्टं तथैवान्नं क्षीरं चैव निवेदयेत्॥ उपस्थाप्य तु देवेशं मुंच मुंचाशु केलिवित्। मधुरं तद्दिने दद्या
देवमद्यं समाचरेत्॥ सौवर्णं शक्तितो नागं ततो दद्याद्द्विजातये। गामेव वत्सां ततो दद्यादित्यान्नागारुद्रीस्मृता। य
थाविभागं कुर्वीत कर्माणि प्राकृतानपि। नागाद्विमोक्षणार्थं तु प्रोक्तमभ्यधिकं त्विदं। द्विजान्विमोक्षयित्वा
तु तुष्टा तोः संतु पन्नगा इति॥ ॥इति भविष्योत्तरे नागप्रजाविधिः॥ गरुडपुराणोक्तप्रकारातोऽपि
नारायणबलिः कः॥ श्रीगरुड उ० भगवन्ब्राह्मणाः केचिदपमृत्युवशंगताः। कथं तेषां भवन्मार्गः किं स्था
नं का गतिर्भवेत्। किं च पुण्यं भवेत्तेषां विधानं चापि कीदृशं॥ तदहं श्रोतुमिच्छामि ब्रूहि मे मधुसूदन। प्रेतभू
त द्विजातीनां संभूते मृत्यु वैकृते। श्रीभगवानुवाच॥ तेषां मार्गगतिं स्थानं विधानं कथयाम्यहं। शृणु तार्क्ष्य परं
गोप्यं कृष्णं दुर्मरणे च यत्। लंघनैर्येमृता विप्रा दंष्ट्रिभिश्चापि घातिताः। कंठग्राहविलग्नानां क्षीणानां तु उद्घातिनां

देव० ११६ 116

विषाग्निदंष्ट्रिविप्रेभ्यो विद्युद्व्यालात्मघातकः। पतनोद्बंधनजलैर्मृतानां शृणु संस्थितिं।। यांति ते निरये घोरे ये चान्ये
म्लेछादिभिर्हताः। श्वसृगालादिभिः स्पृष्टाश्च दग्धाः कृमिसंकुलाः। उल्लंघिता मृता ये च महारोगैश्च मोहिताः।
लोकशप्ताश्च ये चान्ये च पापान्नपोषिताः। चांडालादुदकात्सर्पात् ब्राह्मणाद्वैद्युतादपि। दंष्ट्रिभ्यश्च पशुभ्यश्च
वृक्षादिपतनान्मृताः। उदक्यासूतकीस्पृष्टा रजकादिविदूषिताः। तेन पापेन नरकान्भुक्त्वा प्रेतत्वभाजिनः।
न तेषां कारयेद्दाहं सूतकं नोदकक्रियां। न विधानं मृताद्यं च न कुर्यादौर्ध्वदैहिकं।। तेषां तार्क्ष्य प्रकुर्वीत नारायण
बलिक्रियां।। सर्वलोकहितार्थाय शृणु पापभयापहं। गंगायां यमुनायां वा नैमिषे पुष्करेऽपि वा। तडागे जलपूर्णे वा
ह्रदे वा विमले जले। वापीकूपे गवां गोष्ठे गृहे वा प्रतिमालये। कुर्याद्ये कारयेद्विप्रैर्विधिं नारायणाह्वयं। पूर्वं तु
तर्पणं कार्यं मंत्रैः पौराणवैदिकैः। सर्वौषध्यक्षतैर्मिश्रैर्विष्णुमुद्दिश्य तर्पयेत्। कार्यं पुरुषसूक्तेन मंत्रैर्वा वैष्ण
वैरपि। दक्षिणाभिमुखो भूत्वा प्रेतं विष्णुमिति स्मरन्। अनादिनिधनो देव शंखचक्रगदाधर।। अव्ययः पुंडरी राम०
काक्ष प्रेतमोक्षप्रदो भव।। तर्पणस्यावसाने तु वीतरागो विमत्सरः। यतेंद्रियमना भूत्वा शुचिष्मान्धर्मतत्परः। स ११६

न धर्मरतः शांतः प्रणम्य वाग्यतः शुचिः। यज्ञमानी भवेत्तत्र श्चुवि वर्द्धुसमन्वितः। भक्त्या तत्र प्रकुर्वीत श्राद्धान्येकादशैव तु
सर्वकर्मविधानेन एकैकं तु समाहितः। तोयपत्री हिरण्यवान् दध्याज्यो धूमां स्वप्रियं युकान्। हविष्यान्नं शुभं मुद्रां कुत्रोली
पंचचोलिकां। स्थापयेत्सर्वसस्यानि क्षीरक्षौद्रसमन्वितं। दातव्यं सर्वविप्रेभ्यो वेदशास्त्रविधानतः। शंखपात्रे यथा
ताम्रे तर्पणं च पृथक् पृथक्। ध्यानधारणसंयुक्तो जानुभ्यामवनिं गतः। स्वधावेद्यां पये दर्घ्यं एकोद्दिष्टं पृथक् पृथक्
आपो देवा मधुमतीश्चादि पिंडे प्रकल्पिता। उपयामगृहीतोसि इति येर्घ्यान्निवेदयेत्ता। येना पावक चक्षसा तृतीयास्मा
प्रकीर्तिता। ये देवासश्चतुर्थे तु समुद्रं गच्छ पंचमे॥ अग्निर्ज्योतिस्तथा षष्ठे हिरण्यगर्भस्तु सप्तमे। इषे त्वाष्टमे
यज्ञाग्रतो दैनवमे दशमे पाः फलिनीति च। दध्याद्वि विश्वतश्चक्षुः पिंडे वैकादशे ततः। भद्रं कर्णेभिरिति च
कुर्यात्पिंडविसर्जनं। कृत्वैकादशदैवत्यं श्राद्धं कुर्यात्परेहनि। विप्रान्नावाहयेत्तत्र श्राद्धे चतुर्थे वेदशास्त्रगान्। विद्या
शीलगुणोपेतान् स्वकीयान् शीलसन्नमान्। अव्यंगान् सत्यशास्त्रांश्च न त्वव्ज्यात कदाचन। विष्णुः स्वर्ण
मयः कार्यो रुद्रस्ताम्रमयस्तथा। ब्रह्मा रौप्यमयस्तत्र यमो लोहमयो भवेत्। सहितः सामवेदेन गोविंदं पश्चिमे

देव न्यसेत्॥ अग्निमीळेतिमंत्रेण पूर्वे रौवप्रजापतिः। इषेत्वोर्जेतिमंत्रेण दक्षिणेस्थापयेद्घटं। मध्येमंडलकं कृत्वा
११७ स्थाप्योदर्भमयोनरः। ब्रह्मा विष्णुस्तथा रुद्रो यमः प्रेतश्च पंचमः। पृथक्कुंभेततः स्थाप्याः पंचरत्नसमन्विताः
पृथग्यज्ञोपवीतानि पृथक्मुद्रापनानि च। जपं कुर्यात्पृथक् तत्र ब्रह्मादौ देवतासु च। पंच श्राद्धानि कुर्वीत देवतानां
यथाविधि। तुलधारां ततः कुर्यात्पिंडेपिंडे पृथक् पृथक्॥ शंखे वा ताम्रपात्रे वा अलाभे मृन्मयेपि वा। तिलोदकंस
मादाय सर्वौषधिसमन्वितं॥ आसनौपानहौ छत्रं मुद्रिका च कमंडलु॥ भाजनं भाजनाधारं वस्त्राण्यष्टविधं पदं।
२६ ताम्रपात्रं तिलैः पूर्णं सहिरण्यं सदक्षिणं। दद्याद्ब्राह्मणमुख्याय विधियुक्तवरोत्तरं। ऋग्वेदपाठके दद्यात्तत
सस्यां वसुंधरां॥ यजुर्वेदमये विप्रे गां च दद्यात्पयस्विनीं॥ सामगाय शिवोद्देशे प्रदद्यात्कलधौतकं। यमोद्देशेति
लोल्लोहं ततो दद्याच्च दक्षिणां। पश्चात्पुत्तलकं कृत्वा सर्वौषधिसमन्वितं॥ पलाशस्य च वृंतानां विभागं श्रूयतां तार्क्ष्य
वै। कृत्वाजिनसमास्तीर्य कुशैश्च पुरुषाकृतिं। शतत्रयं षष्टियुक्तं वृंतैः प्रोक्तोस्थिसंचयः। विन्यस्य तानि वृंता राम०
नि अंगेष्वेषु पृथक् पृथक्। चत्वारिंशच्छिरोभागे ग्रीवायां दश विन्यसेत्। विंशत्युरस्थले देया विंशतिर्जठरे तथा ११७

वक्षद्वये शतं दद्यात् कटिदेशे च विंशति। ऊरूद्वये शतं चापि त्रिंशज्जंघाद्वये न्यसेत॥ दद्याद्दशचतुष्टयं शिश्ने षड्दद्याद्वृषणद्वये
दशपादांगुलीभागे एवमस्थीनि विन्यसेत। नालिकेरं शिरःस्थाने तु दद्याच्च तालुके। पंचरत्नं मुखे दद्यात् जिह्वायां
कदलीफलं॥ आंत्रेषु नालकं दद्याद्वालकं घ्राणमेव च। वसायां मृत्तिकां दद्याद्गोमूत्रेण तु मूत्रकं। गंधकं धातवो दद्या
हरितालमनःशिला। पारदं रेतसःस्थाने पुरीषे पित्तलं तथा॥ मनःशिला तथा गात्रे तिलकल्कं च संधिषु। यवपिष्टं तथा मां
से मधुशोणितमेव च। केशेषु च जटाजूटं त्वचायां च मृगत्वचा। कर्णयोस्तालपत्रं च स्तनयोश्चैव गुंजका। नासायां शत
पत्रं च कमलं नाभिमंडले। वृंताकं वृषणद्वंद्वे लिंगे स्याद्गृंजरं शुभं। घृतं नाभ्यां प्रदेशं स्यात् कौपीने च त्रपु स्मृतं। मौक्ति
कं स्तनयोर्मूर्ध्नि कुंकुमेन विलेपनं। कर्पूरागुरुधूपैश्च सुभैर्माल्यैः सुगंधिभिः। परिधानपट्टसूत्रं हृदये तु रुक्मकं न्यसेत
ऋद्धिवृद्धी भुजौ द्वौ च चक्षुर्भ्यां च कपर्दकं॥ सिंदूरं नेत्रकोणेषु तांबूलाद्युपहारकैः। सर्वौषधियुतं प्रेतं कृत्वा पूजां
यथोदितां। साग्निके चापि विधिना यज्ञपात्रं न्यसेत् क्रमात्। शिरो मे श्रीः पुनंतु मेति इमं मे वरुणेति च। प्रेतस्य पावनं कु
र्याद्वाल्लिंग्यामशिलोहकैः। विष्णुमुद्दिश्य दातव्यास्तु शीलागोः पयस्विनी। तिलाल्लोहं हिरण्यं च कार्पासं लवणं तथा।

स्व०
११८ समधान्यं क्षितिगांव एकैकं पावनं स्मृतं॥ तिलपात्रं ततो दत्वा पदत्रानं तथैव च। ततो वैतरणी देया सर्वाभरणभूषि
ता। कर्तव्यं वै सवं श्राद्धं प्रेतमुक्त्यर्थमात्मना॥ प्रेतमोक्षं ततः कुर्याद्विधिविस्तुं प्रकल्प्य च। ॐ विष्णुरिति संस्मृत्य स
प्रेततं विष्णुमेव च॥ अग्निदाहं ततः कुर्यात्सूतकं च दिनत्रयं। गर्त्तपिंडं च कर्त्तव्यं दशाहं प्रेतपूर्वकं। सर्वं वर्षाविधिं
कुर्यादेवं प्रेतश्च मुक्तिभाक्॥ इति पुत्तलकविधिः॥ अथाधिकारिण उच्यंते॥ दाहादि मंत्रवत्पित्र्यं विदध्यादौ
रसः सुतः॥ तदभावे तु पौत्रश्च प्रपौत्रः पुत्रिकासुतः। क्षेत्रजो दत्तकः क्रीतः कृत्रिमो दत्त एव च। पितामातास्वकं चैव
वस्वसा तत्सुत एव च ४ अपविद्धश्च पत्नी च गूढजः कन्यकासुतः। पौनर्भवः सहोढो वा नन्दनश्च सुतीकृतः। दौहित्रो
धनहारी च भ्राता तत्पुत्र एव च ४ सपिंडः सोदको मातुः सपिंडश्च सहोदकः। स्त्री च शिष्यर्त्विगाचार्या जामाता च सखा
पिता। उत्सन्नबंधुरिष्येन कारयेदवनीपतिः। अरसः सुतः पित्रोर्माताऽपि त्रोर्दाहाद्यौर्ध्वदैहिकं मंत्रवत्पितृमेधो राम०
क्तमंत्रवद्विदध्यात्कुर्यात्॥ तदाहस्तु मेत्रैः। मातुः पितुश्च कुर्वीत मृतपौरोरसः सुतः। पैतृमेधिकसंस्कारं मंत्रपूर्व ११८
कमाहृत इति॥ तदभावे अरसपुत्राभावे पौत्रः पुत्रसुतः। पितामहस्य पितामह्याश्च दाहादिकं कुर्यात्। मंत्रवदिति

सपूर्वस्यानुषंगः। तदाभावे प्रपौत्रः पौत्रस्ततः। तदभावे पुत्रिकासुतः। तदुक्तं स्मृतिसंग्रहे॥ पुत्रः पौत्रः प्रपौत्रः पु
त्रिकासुतश्चेति बृहस्पतिनाप्युक्तं। पौत्रश्च पुत्रिकापुत्रः स्वर्गप्राप्तिकरावुभौ॥ रिक्थे च पिंडदाने च सम्मौ तौ परिकी
र्त्तिताविति। नन्वेवं पौत्रपुत्रिकापुत्रयोः। श्राद्धे विकल्पः स्यात्। मैवं। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव वेति।
। पौत्राद्यभावे पुत्रिकापुत्रस्य विधानात्। पुत्रेषु सत्सु पौत्रेषु नाप्यंवे कारये न्स्वधामिति श्रृष्यश्रृंगवचनात्
द्विकल्पो नास्ति पुत्रिकासुत इत्यत्र पुत्रिकायाः पुत्र इति पुत्रिकैव वा पुत्र इति द्वेधा विग्रहः। तदाह वशिष्ठः॥
अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलंकृतां॥ अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यतीति। द्वितीयः पुत्रिके
वेति। पुत्रिकापुत्राभावे क्षेत्रजः पुत्रः। भर्तृविप्रयुक्तायां देवरेण सपिंडेनासपिंडेन वा उत्पादितः क्षेत्रजः। त
दभावे दत्तकः। मात्रापित्रा वोभाभ्यां दत्तः। तदभावे क्रीतः। पुत्रार्थिना धनक्षेत्रादिप्रलोभनैः पुत्रीकृतः कृत्रिमः
तदभावे दत्तः। मात्रापितृविहीनस्ताभ्यां वा परित्यक्तस्त्वाहं पुत्रो भविष्यामि त्यात्मानं यो दद्यातिस्त्र दत्तः। त
दभावे अपविद्धः। मातापितृभ्यामुत्सृष्टो न्येन गृहीतः गृहीतः पुत्रोपविद्धाख्यः। तदभावे पत्नीपत्न्यादि

देव॰ धर्मसहाधिकारिणी॥ तदुक्तं स्मृतिसंग्रहे॥ कानीनगूढसहजपुनर्भूतनयाश्चापि। पत्न्यभावेऽधिकुर्युस्ते त्वप्रशस्ताः
११९ स्मृता हि त इति॥ गूढश्चासहजश्चेति विग्रहः। यत्तु॥ पितुः पुत्रेण कर्तव्या पिंडदानोदकक्रिया। पुत्राभावे तु पत्नी
स्यात्पत्न्यभावे तु सोदर इति शंखवचनं तदौरसाद्यपविद्धपर्यंतपुत्राभावविषयं। तदभावे गूढजः। मातुर्गृहे प्र
छन्नतः उत्पन्नो गूढजः॥ तदभावे कन्यकासुतः। पितृवेश्मनि कन्यायां रहस उत्पन्नः कानीनः। तदभावे पौन
र्भवः। विधवापुत्रः तदभावे सहोढः। भ्रातृगेहे गर्भस्थो या भिण्यापरिणीता तायां परिणीतः सहोढः। तदाह या
ज्ञवल्क्यः। औरसो धर्मपत्नीजः तत्समः पुत्रिकासुतः। क्षेत्रजः क्षेत्रजातस्तु सगोत्रेणेतरेण वा। गृहे प्रच्छन्न
उत्पन्नो गूढजस्तु सुतः स्मृतः। कानीनः कन्यकाजातो मातामहसुतः स्मृतः। अक्षतायां क्षतायां वा जातः पौन
र्भवस्मृतः। दद्यान्माता पिता वा यं स पुत्रो दत्तको भवेत्। क्रीतश्च ताभ्यां विक्रीतः कृत्रिमः स्यात्स्वयं कृतः।
दत्तात्मा तु स्वयं दत्तो गर्भो विन्नः सहोढजः। उत्सृष्टो गृह्यते यस्तु सोपविद्धो भवेत्सुतः। पिंडदोंशहरश्चैषां एम॰
पूर्वाभावे परः पर इति। ननु अनेन वचनेन द्वादशविधपुत्राणामेव पत्रे इत्युक्तं। तत्र पौत्रप्रपौत्रपत्न्यंतर्भावो ११५

वाधितः स्यात्॥ मैवं॥ नात्र पौत्रप्रपौत्रपत्न्यंतर्भावेपि पूर्वस्य पूर्वत्वमपैतिपरस्यापि परत्वं नापैति। यद्यपि रंध्र
व धानमात्रं। तच्च वचनांतरानुरोधेन स्वीकर्तव्यमेव॥ तदुक्तं तदा द्विवामिसंवं धात्तदंतस्यापकर्षः स्यादिति
। ननु पूर्वाभावे परः पिंडदः प्रक्लृप्तदैवयोगात्पुत्राद्यावसंनिहिते पौत्रादिभिर्दाहादिकं नक्रियेतेति॥ उत्तरं अत्रा
भावशब्दोननाशवचनः। किंत्वसंनिधानवचनः। असंनिधानं च देशांतरस्थित्यानाशाद्वा। अतएव। असगो
त्रः सगोत्रोवा यदिस्त्रीयदिवापुमान्। प्रथमेहनि यो दद्यात्सदशाहं समापयेदिति पद्धवचनं तदप्युपपन्नं।
यदिनाशवचनः स्यात्तदा प्रथमेहनियोग्निदः। स एव सपिंडीकरणप्रयोगे कर्तेति दशाहांतसमाप्तिवचनं।
स्यात् दभाववचनस्यासंनिधानवचनत्वेन पुत्राद्यसंनिधाने पौत्रादीनां कर्तव्यमुपपन्नं। नत्वभावशब्दः स
पिंडदानपक्षेऽसंनिधानएव। अंशग्रहणपक्षे नाशपरः॥ तत्कथं सकृदुच्चरितस्यानेकपरत्वं। अत्रापिंडदा
नमंशग्रहणं चार्थद्वयं विधेयं॥ तत्राहत्यार्थद्वयपरत्वमित्यविरोधः। तदभावेस्तुतीकृताः। मातामहेन पुत्र
त्वेन स्वीकृतः। पत्नी दुहितरइतिन्यायेन धनहारी दौहित्रः। तदाह स्मृतिसंग्रहकारः। स्तुतः कृपीतिलः

रेव॰ श्राद्धंपत्नीचतद्दत्तंनिधौ। धनहार्यथदौहित्रःस्ततोभ्राताचतत्सुताइति॥ वृद्धमनुः। अपुत्राशयनंभर्तुः पा
१२० लयंतीगृहेस्थिता॥ पत्न्येवदद्यात्तत्पिंडंकृत्स्नमंशंलभेतच॥ व्याघ्रः। पितुःपुत्रेणकर्त्तव्यापिंडदानोद
कक्रिया। पुत्राभावेतुपत्नीस्यात्पत्न्यभावेतुसोदरः। वृद्धपाराशरः॥ श्राद्धंपत्न्यापिकार्यंस्यादपुत्राया
120 स्तुपोषितः। तस्यापिहितयाकार्यमेकत्वंहितयोर्यतः॥ कूर्मपुराणे। पितुःपुत्रेणकर्त्तव्यापिंडदानो
दकक्रिया। पुत्राभावेतुपत्न्यास्तुतदभावेतुसोदरः। पुत्राभावेपतिश्राद्धंपत्नीकुर्यात्समंत्रकं। तथा
पत्नीकुर्यात्सुताभावेपत्न्यभावेसहोदरः। तथा। भ्रातुर्भ्रातास्वयंचक्रेतज्जायाचेन्नविद्यते। तस्यभ्रात
सुतस्त्वक्रेयस्यनास्तिसहोदरः। अतःपुत्राभावेपत्न्येवप्रथमंश्राद्धाधिकारिणी॥ तदभावेकनिष्ठः
सोदरोभ्राता॥ कनिष्ठानांबहूनांमध्येयोज्येष्ठस्तस्याधिकारः॥ बहूनांज्येष्ठानांयःस्वानंतरोज्येष्ठस्याधि
कारः। तदभावेसोदरोभ्रातृसुतः। तदभावेकनिष्ठासोदरोभ्राता। तदभावेज्येष्ठाभिन्नोदरः। तदभावेतत्सुतः
। तदाहस्मृतिसंग्रहकारः। भ्रातुःसहोदरोभ्राताकुर्याद्दाहादितत्सुतः। ततस्त्वसोदरोभ्राता तदभावेच राम॰ १२०

तत्सुतइति॥ तदभावेपिता। तदभावेमाता॥ ननु। नचमातानचपिताकुर्यात्पुत्रस्यपैतृकं। नाग्रजस्स्यात्तथाभ्राता
भ्रातॄणांतुकनीयसामितिकात्यायनेनोक्तं। तत्कथं। उत्तरं। पुत्रादावधिकारिसत्वेतत्॥ असत्यधिकारिणि
पित्रादिभिरपिकर्तव्यमेव। तदुक्तंस्मृतिसंग्रहे॥ उत्सन्नबांधवंप्रेतंपिताभ्रातातथाग्रजः। जननीवापि
संस्कुर्यान्महदेनोन्यथाभवेत्॥ यत्तुकात्यायनवचनं॥ नवोढायाःपतिर्दद्यात्सपुत्रायानकुत्रचित्
नपुत्रस्यपितादद्यान्नानुजस्यतथाग्रजइति॥ यत्तुबौधायनवचनं॥ पित्राश्राद्धंनकर्तव्यंपुत्राणांचकथं
चन। भ्रात्राचैवनकर्तव्यंभ्रातॄणांचकनीयसा मितितत्रधिकारिपुत्रादिसद्भावविषयंस्नेहविहीनवि
षयंवा॥ अतएवबौधायनः। यदिस्नेहेनकुर्यात्तांसपिंडीकरणंविना। गयायांतुविशेषेणज्यायानपिसमाचरेत्।
कुर्यातांमातापितरावित्यर्थः। तदभावेस्नुषापुत्रभार्यातदभावेस्वसाअनुजाअग्रजावा॥ तदभावेतत्सुतः। सोदरस्वस्र
भावेअसोदरा। स्वसाद्विविधा। तदभावेतत्सुताः॥ तदाहकात्यायनः। अनुजाअग्रजावापिभ्रातुःकुर्वीतसंस्क्रियां
ततस्वसोदरातद्वत्क्रमेणतनयस्तयोरिति। तदभावेसपिंडः। तदभावेसोदकः। तदभावेमातुःसपिंडः। तदभावे

देव० १२१ मातुः। सोदकः। मातामहतत्सुतादिमातामहसंततावेवं च सप्तपुरुषादूर्ध्वं त्रिपुरुषपर्यंतं मातृसमानोदकाः। त
दभावे स्त्री। ननु स्त्री पत्न्येव। अतः पृथङ्निर्देशो व्यर्थः। मैवं। ब्राह्मादिविवाहोढा पत्नी। आसुरादिविवाहोढा स्त्री
अतो न व्यर्थः। तदाह शातातपः। धर्म्ये विवाहे चूढा या सा पत्नी परिकीर्तिता। सहाधिकारिणी ह्येषा यज्ञादौ धर्म
कर्मणि। क्रयक्रीता तु या नारी न सा पत्न्यभिधीयते। न सा दैवे न सा पित्र्ये दासीं तां मुनयो जगुरिति। तदभावे शिष्यः
तदभावे ऋत्विक्। तदभावे आचार्यः। उपनीय सांगवेदाध्यापयिता। तदभावे जामाता दुहितुः पतिः। तदभावे सखा
। तदुक्तं मार्कंडेयपुराणे। सद्बंधुरसंनबंधोर्वसखा पितुरस्य च। जामाता स्नेहतः कुर्यादिविलंपेतन्मे
धिकमिति। तदभावे अवनीपतिः। उत्सन्नबंधो मृतस्यारिक्थं सर्वं कंचित्पुरुषं प्रेतजातीयं प्रेषयित्वा अवनी
पतिः श्राद्धं कारयेत्। तदुक्तं स्मृतिसंग्रहे। पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकापुत्र एव वा। पत्नी भ्राता च तज्जश्च।
पिता माता स्नुषा तथा॥ भगिनी भागिनेयश्च सपिंडः सोदकस्तथा॥ असंनिधाने पूर्वेषामुत्तरे पिंडदाः स्मृताः
। विष्णुपुराणेप्युक्तं। पुत्रः पौत्रः प्रपौत्रश्च तद्वद्भ्रातृसंततिः। सपिंडसंततिर्वापि क्रियाभाङ्नृप जायते। ते राम० १२१

षामभावे सर्वेषां समानोदकसंततिः॥ मातृपक्षसपिंडेन संबंधो यो जनेन वा॥ कुलद्वयेपि चोत्सन्ने स्त्रीभिः कार्या
क्रियानृप॥ तत्संघातगतैर्वापि कार्या प्रेतस्य संस्क्रिया॥ मार्कंडेयपुराणे॥ सकुल्यस्तत्सन्नबंधोग्रसखोप्यथवास्व
रस्य च। जामाता स्नेहतः कुर्याद्दविलंपैत्रमेधिकं॥ सर्वाभावे तु नृपतिः कारयेत्तस्य रिक्थतः॥ तज्जातीयै
र्नरैः सम्यग्दाहाद्याः सकलाः क्रियाः। सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः॥ स्कंदपुराणेपि। सर्वाभावे स्त्रि
यः कुर्युः स्वभर्तॄणाममंत्रकं॥ पित्रोरनुपनीतोपि विदध्यादौरसः सुतः॥ और्ध्वदैहिकमन्ये तु संस्कृताः श्रा
द्धकारिणः॥ औरसः सुतोऽनुपनीतोपि पित्रोर्मातापित्रोरौर्ध्वदैहिकं कुर्यात्॥ तदाह मनुः। नह्यस्मिन्युज्यते
कर्म किंचिदामौंजिबंधनात्। नाभिव्याहारयेत्कर्म स्वधानिनयनादृते इति। स्वधानिनयनं प्रेतकर्म। सुमंतुर
पि। नाभिव्याहारयेद्ब्रह्म यावन्मौंजी न बध्यते। मंत्राननुपनीतोपि पठेद्दैहिक एव यमिति। ननु त्र्यसमर्थे बा
लके पुत्रे तदनंतराधिकारिभिः समर्थैः। सर्वमंत्रवत्किं न क्रियत इति चेत्। सत्यं। सति पुत्रे निषेधात्।
तथा चर्ष्यशृंगः॥ पुत्रेषु वर्तमानेषु नान्यं वै कारयेत्स्वधां। अनुकल्पोऽद्यपुत्रस्य श्राद्धं कुर्यात्सनाभिक इति

देव० अन्येत्वक्षेत्रजाद्याः पुत्राभ्रातृतनुजाद्याश्चसंस्कृता उपनीताः श्राद्धकारिणः स्युः। किंपुत्रोजन्मतः प्रभृत्याधि
१२२ कारीत्यतआह चौलादाद्याष्टिकादर्वाक्कुर्यात्पितृमेधिकं। प्रथमवार्षिकचूडाकरणात्पूर्वं पैतृमेधिकं न
कुर्यात्। तदाहस्मृमंतः। पुत्रोत्पत्तिमात्रेणसंस्कुर्याद्दिणमोचनात्। पितरंनाहिकाद्वौलात्पितृमेधेनकर्मणा। न
न्वसौमंत्रेणकुर्यान्नामंत्रेणेत्यतआह। तृतीयवत्सरादूर्ध्वमुत्तवत्तत्समाचरेत्। सोनुपवीतस्तृतीयवर्षादूर्ध्वंतु
पैतृमेधिकंकर्ममंत्रवन्मंत्रपूर्वकमाचरेत्। तृतीयवत्सरादित्येतत्तृतीयवर्षचौलोपलक्षकं।। तदाहस्मृमंतः
। अनुपनीतोपिकुर्वीतमंत्रवत्पैतृमेधिकं।। यद्यसौकृतचौलस्याद्यदिस्यात्तुत्रिवत्सरः। नह्यस्मिन्युज्यत
इतिमनुवचनंनाभिव्याहरयेदिति। यत्स्मृत्यंतुवचनं तद्धयं तृतीयवर्षकृतचूडविषयं। यत्तु। यः कुर्या
दनुपनीतोपिश्राद्धमेकोपियः सुतः। पितृयज्ञाहुतिंपाणौजुहुयान्मंत्रपूर्वकमिति। तदपितृतीयवर्ष
कृतचौलविषयं। यत्तु। कृतचूडस्तुकुर्वीतउदकंपिंडमेवचम। स्वधाकारंप्रयुंजीतवेदोच्चारंनकारये राम०
त्।। इतिव्याघ्रवचनं।। यच्चकृतचूडोनुपेतस्तुपित्रोःश्राद्धंसमाचरेत्।। उदाहरेत्स्वधाकारंनतुवेदाक्षरा १२२

एतस्माविति स्मृतिसंग्रहकारस्त्कृवचनं तद्द्वयं प्रथमवर्षकृतचूडविषयं। ननु अनुपवीतः कथं मंत्रवत्कुर्याद्वितैक
देशमित्यत आह। असंस्कृतश्च पत्नी च यथाविध्येव मंत्रवत्। अनुपवीतः पत्नी च यद्यत्कर्म मंत्रवत्। कु
र्यादिति विहितं। तत्र देवमन्त्रवत्कुर्यात्। तदाह कात्यायनः। असंस्कृतेन पत्न्या वा ह्यग्निदानं समंत्रकं॥ स्कंद
पुराणे प्युक्तं। यत्तेषु मंत्रवत्कर्म पत्नी कुर्याद्यथाविधि॥ तदौर्ध्वदेहिके साहि मंत्राहा धर्मसंस्कृतेति। यत्तु
सर्वाभावे स्त्रियः कुर्युः स्वमंत्रं नाममंत्रकमिति॥ तदधर्माविवाहोढविषयं। ननु उपनीतः कथं कुर्यादुप
नयन व्रतभंगप्रसंगादित्यत आह। मातापित्रोरुपाध्यायाचार्ययोरूर्ध्वदैहिकं। कुर्वन्मातामहस्यापि व्रती न
भ्रश्यते व्रतात्। मंत्रात्मकस्य ब्राह्मणस्य चावैदैकदेशस्य वेदांगस्य नां वाध्यापयिता उपाध्यायः। उपनयनमात्रं
कृत्वा सांगवेदाध्यापयिताचार्यः। मात्रादीनामौर्ध्वदैहिकं कुर्वन् व्रती उपनीतः व्रतादुपनयननिमित्तभिक्षा
चरणादिनता न भ्रश्यते। भ्रष्टो न भवति॥ तदाह याज्ञवल्क्यः। आचार्यपितृपाध्यायानिर्हृत्यापि व्रती व्रती।
वशिष्ठोपि। ब्रह्मचारिणः पितृकर्मकारिणो व्रतान्निवृत्तिरत्र मातापित्रोरिति। भविष्यत्पुराणेप्युक्तं॥ व्रतस्थोपि

दे॰ यदापुत्रः पितुः कुर्यात्क्रियांनय। तथामातामहस्यापिदौहित्रः कर्तुमर्हति॥ अत्रदौहित्रशब्देनपुत्रीकृतोविव
१२३ क्षितः॥ ननुपुत्रपत्नीभ्रातृतत्पुत्रमातापितृसपिंडसोदकाद्यवनिपतेर्नाऔर्ध्वदेहिकं॥ कुर्युरित्युक्तं। अत्रयोदा
यहरः॥ सकुर्यात्पुत्राद्यभावेति। उत्तरं। योदायहरः सकुर्यान्नान्यः॥ यदाहयाज्ञवल्क्यः॥ पिंडदोंऽशहरश्चैषां
123 पूर्वाभावेपरःपरः॥ विष्णापस्तंबौ। पश्चार्थहरः सपिंडदायीति॥ ननुवित्ताभावेकथं। उत्तरं। दायाभावेप्यत्र
पुत्रपत्नीभ्रातृतत्पुत्रशिष्यमातृपितृभिरवश्यंश्राद्धंकर्तव्यं॥ तदुक्तंमार्कंडेयपुराणे॥ पुत्राभावेचात्पुत्रः
पत्नीमातापितातथा। पित्राभावेचशिष्यश्चकुर्यात्तत्रौर्ध्वदैहिकमिति॥ विष्णापस्तंबौ॥ पुत्रः पितुर्वित्ताभा
वेपिदद्यादितिपुत्रग्रहणंद्वादशविधपुत्रोपलक्षणं। भ्रातृग्रहणंसोदरासोदरोपलक्षणं। तत्पुत्रग्रहणमपु
भयपुत्रोपलक्षणं। ननुभ्रातृणामेकजातानामेकश्चेत्पुत्रवान्भवेत्। सर्वेतेतेनपुत्रेणपुत्रिणोमनुरब्रवीदि
तिभ्रातृपुत्रस्यपुत्रत्वमुक्तं॥ अतोद्वादशविधपुत्राभावेधनहारिणोदौहित्रस्यभ्रातृपुत्रस्यपिंडदानकर्तृत्वकथन
मयुक्तं॥ नैवं। अपुत्रोभ्राताभ्रातृपुत्रसंभवेनमेवपुत्रीकुर्यात्। नान्यत्रेति। अस्यार्थः। अन्यथापुत्रीदुहितर राम॰ १२३

इति न्यायोसमंजसः स्यात्। अपुत्रायाः सपत्नीजः क्षेत्रजाद्याः पतिस्तथा।। पूर्वाभावे परः कुर्याद्वृद्धिवत्पैत्रिमेधिकं
अपुत्रायाः औरसक्षेत्रजपुत्ररहितायाः सपत्नीपुत्रक्षेत्रजाद्याः एकादश पुत्राः पतिश्चेति। एतेषु पूर्वाभावे पर
परः विधिवत्पितृमेधोक्तमंत्रादिविधिवत्पैतृमेधिकं कुर्यात्। अत्र क्षेत्रजशब्दः सपत्नी क्षेत्रजाभिप्रायः। तत्र म
नुः। बह्वीनामेकपत्नीनामेका चेत्पुत्रिणी भवेत्।। सर्वास्तास्तेन पुत्रेण प्राह पुत्रवती मनुः। कात्यायनोपि।।
विद्ध्यादौरसः पुत्रो जनन्या अर्द्धदैहिकं। तदभावे सपत्नीजः क्षेत्रजाद्यास्तथा वृता।। तेषामभावे तु पतिस्तदभा
वे सपिंडका इति। तथा आहृताहृतेन प्रकारेण औरसवद्वेत्यर्थः।। तेषु पुत्रादिषु किं कर्म केन कर्तव्यमित्यत आह
। दाहाद्दशाहपर्यंताः सपिंडांता दशाहतः। तदूर्द्ध्वं क्रमात्पूर्वमध्यमाश्चोत्तराः स्मृताः।। पुत्रैश्च भ्रातृतत्सुतैः
पत्न्याशिष्येण वाखिलाः।। क्रियाः कार्याः समादिष्टाः शेषैः पूर्वाश्च मध्यमाः। वृद्धदायग्रहाद्दूर्द्ध्वं कर्तव्यास्तौर
पि स्मृताः।। अथ दायहरो ऽपुत्री हृतोपि दुहितुः सुतः।। मातामहस्य विधिवत्कुर्याद्दिवोत्तराः क्रियाः।। दाहादा
रभ्य दशाहपर्यंताः क्रियाः दाहाद्दूर्द्ध्वं सपिंडांताः क्रियाः। तदूर्द्ध्वं सपिंडीकरणादूर्द्ध्वं क्रमात्पूर्वमध्यमाश्चोत्तराः

देव० १२४

स्मृताः ॥ दे तत्र पुत्रैर्भ्रातृभिश्चाप्त पुत्रैर्भ्रातृपुत्रैः पत्न्या शिष्येण वा अखिलाः पूर्वमध्यमोत्तराः क्रियाः कार्याः ॥ स
मादिष्टा उक्ताः पत्नीग्रहणं स्त्रिया अप्युपलक्षणं ॥ तदुक्तं स्मृतिसंग्रहे ॥ सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्र
कं । ऊर्ध्वदैहिकमन्यानि दशाहादीनि यथाविधीति । शेषैः पित्राद्यैः राजांतैः पूर्वमध्यमाश्च क्रियाः कार्याः द्वाहादि
सपिंडांताः क्रियाः । पर्याप्तवसुधनग्रहणे तैरपि पित्रादिभिरप्युत्तराः क्रियाः कर्तव्याः स्मृताः ॥ तदुक्तं स्कंदपु
राणे । मलमेतन्मनुष्याणां द्रविणं यत्प्रकीर्तितं । तद्गृह्णन्मलमादत्ते दुर्विधाज्ञानिनामपि । ऋषिभिस्तस्य
निर्दिष्टा निष्कृतिः पावनी परा ॥ आदेहपतनात्कुर्यात्पिंडदानोदकक्रियामिति । अदायहरोऽप्यपुत्री कृतोपि दु
हितुः सुतो मातामहस्योत्तरक्रियां विधिवत्कुर्यात् । तदाह पराशरः ॥ सर्वाः क्रिया मध्यमाश्च तथैवोत्तरसं
ज्ञिताः ॥ त्रिप्रकाराः क्रिया ह्येतास्तासां भेदं ततः शृणु षमे । आद्वादशानां मध्ये या दाहाद्याश्च क्रियाः स्मृताः ॥ ता
पूर्वा मध्यमा मासि मासि एकोद्दिष्टसंज्ञिताः ॥ प्रेते पितृत्वमापन्ने सपिंडीकरणादनु । क्रियंते याः क्रियाः पित्र्याः प्रो
च्यंते ता नृपोत्तराः ॥ पितृमातृसपिंडैस्तु समानसलिलैस्तथा ॥ तत्संघातगतैश्चापि राज्ञा वा धनहारिणा । आद्या

राम० १२४

दव. दशः क्रियाः कार्याः पुत्राद्यैरेव चोत्तराः॥ दौहित्रैर्वा नरः श्रेष्ठ कार्यास्तत्तनयैस्तथा॥ स्नेहाद्धि सपिण्डादिभिर्वर्णो वर्णालि
१२५ ङ्गौर्ध्वदैहिकं। कर्त्तव्यं नैव विप्रेण शूद्रस्यानेन तत्सदा॥ भर्तुः श्राद्धं पंचमेऽह्नि कुर्यान्नार्यारजस्वला। पुत्रः पित्रोः
प्रकुर्वीत मृताहनि शुचिर्यतिः॥ ॥ इति दाहादिकर्मकर्तृनिर्णयः॥ ॥संवत १८६९ शाके १७३४ समय
125 फाल्गुण शुक्ल एकादशी ११ बुधवासरे॥ लिखितं विश्वनाथ ब्राह्मण गौड काश्यांमध्ये क्षेत्रपाल समीपे इति
यादृशं पुस्तकं दृष्टं तादृशं लिखितं मम॥ यदि शुद्धमशुद्धं वा मम दोषो न दीयते १॥ भग्नपृष्टि कटिग्रीवा बद्ध
दृष्टिरधोमुखं॥ कष्टेन लिखितं ग्रंथं यत्नेन प्रतिपालयेत्॥ २॥ ॥शुभं भूयात्॥ ॥श्री विश्वेश्वराय नमः॥ रामराम
[illegible] स्य इदं पुस्तकं लिखावितं काश्यां द्रव्य दत्तं लेखकेन॥ ॥ ॥

राम०
१२५

१७

दाहादिकर्म

२४०